जायंतेद्भुतमत्र वांछितफलैः सौहित्यभाजो जनाः ॥ १
मुक्तावत्तत्र वंशे समजनि विदितो धाहडः श्रेष्ठिवर्यः
सद्वृत्तः कांतकांतिः प्रवरगुणगणः प्रास्तनिःशेषदोषः ।
आनंदाधायिमूर्त्तिस्त्रिभुवनभवनोत्संगरंगत्सुकीर्त्तिः
स्फूर्जत्पुण्यप्रवाहोद्भववशविलसत्प्राभवत्स्फूर्त्तिमूर्त्तिः ॥ २
नयविनयवितितिविटपितसितांशुसितकीर्त्तिधवलितदशाशः ।
पुण्याचारपवित्रस्तत्पुत्रो धवलनामासीत् ॥ ३
अजनीह मरुसंज्ञा मरुस्थली पापपंकजवनस्य ।
तस्य प्रवरा जाया विशुद्धशीला विगतमाया ॥ ४
तत्पुत्री ठक्कुराणी समभवदसमक्षांतिविस्तीर्णशीला
नाऊनामा शशांकद्युतिधवलितगुणैः[1] साधुशस्यैर्विशाला ।
धर्मानुष्ठाननिष्ठो[2] विधिवशविकसत्कीर्त्तिसंभारसारा
प्राज्यस्फूर्जद्विवेकप्रतिहतवितताहामदुर्वारमारा ॥ ५ ॥

॥ श्र ॥

संजातोऽत्रैव वंशे निरुपममहिमा भाग्यसौभाग्यभूमिः
श्रीपालष्ठक्कुराख्यः प्रथितशुचियशाः पालितप्राज्यनीतिः ।
दिव्यश्रीकेलिगेहं समजनि परमं मंडनं धाम लक्ष्म्याः
श्रीदेवी तस्य पत्नी विकृतिकलुषतालोलतानां सपत्नी ॥ ६

तयोः सुतः शोभनदेवनामा
मुख्यो यशोदेव इति द्वितीयः ।
जातोभिजातो नृपमान्यतादि-
गुणैरशेषैर्भुवि सुप्रसिद्धः ॥ ७

तत्र शोभनदेवस्य ठक्कुरस्य गृहाश्रयं ।
सूहवमहणूसंज्ञं सोढूनामा सुता पुनः ॥ ८

नाऊकायाः पाणिग्रहणं कृतवानसौ यशोदेवः ।
तत्रातिरत्नभूतेति रत्नदेवीति विदितेयं ॥ ९

या शीतेव कलौ कलंकविकलप्रोल्लासिशीलोज्ज्वला
धर्मानुष्ठितिनिष्ठया त्रिभुवने प्राप्तप्रतिष्ठा हि या ।
लब्धागण्यवरेण्यपुण्यनिवहा या चैत्यकृत्यादिभि-
र्ग्लानास्थानपुरादिधार्मिकसभाप्रख्यातनामा च या ॥ १०

ज्ञानं मोहमहांधकारदलने रत्नप्रदीपायते
ज्ञानं दुर्गतिदुर्गकूपपतने हस्तावलंबायते ।
गंभीरे भववारिधौ भवभृतां ज्ञानं सुपोतायते
ज्ञानं कामितवस्तुलाभविषये सत्कामधेनूयते ॥ ११

इत्येवं शुभदेशनां बहुविधां श्रुत्वा गुरूणां मुखा-
देषा दोषपराङ्मुखी जिनमते रक्ता विरक्ता भवे ।
सप्तक्षेत्रनिजार्थबीजवपनासक्ता विशेषात्पुन-
र्ज्ञानापुस्तकलेखने कृतमतिर्ज्ञाऊरिह श्राविका ॥ १२

तथ्यतुर्भिः संबंधः ।

श्रीशीलगणसूरीशपूज्यपट्टप्रतिष्ठितैः ।
बाल्यादपि महापुण्यश्रेण्या नित्यमधिष्ठितैः ॥ १३

श्रीमानतुंगसूरिभिराराध्यैस्तत्र यज्जयंत्याख्यं ।
प्रकरणमकारि शुभदं भगवत्यंगान्मनोहारि ॥ १४

तस्योपरि गुरुभक्त्या विदधे सुधिया मनोरमा वृत्तिः ।
श्रीमलयप्रभसूरिभिरिह या पूज्यैः प्रसन्नतमैः ॥ १५

तामिह सा नाऊका ज्ञानाराधनधिया सुगुरुभक्त्या ।
लेखितवती गुणवती महासती शुद्धशुभभावा ॥ १६

यावच्चारुमरीचिसंचयचिते चंद्रार्कयोर्मंडले
राजेते गगनश्रियो मणिमये दिव्ये चलत्कुंडले ।
ताराश्रेणिरियं पुनः सुकुसुमालंकारशोभावहा
तावत्पुस्तकमेतदद्भुततमं व्याख्यायतां सूरिभिः ॥ १७

221, 2. Upadesapada by HARIBADRASÛRI [उपदेशपदम्। हरिभद्रसूरिः].

Ends on Folio 158. R. ० L. १५८.

Begins:

नमिऊण महाभागं तिलोयनाहं जिणं महावीरं ।
लोयालोयमयंकं सिद्धं सिद्धोवएसत्थं ॥ १
वोच्छं उवएसपए ...

Folio 92:

महगिरिअज्जसुहत्थीदिट्ठंतो कालमासज्ज ॥ २
पाडलिपुत्त महागिरि अज्जसुहत्थी ययसेट्ठि वसुभूइ ।
वइदिसज्जेणीए जियपडिमाए लगत्थं च ॥ ३
दो थूलभद्दसीसा ज होइया आइमो घइघरंति ।
ठविउं गच्छ अतीउ कप्पोत्ति तमासिउ किरियं ॥ ४
एसणसुठ तिजुउ वसुभूइ गिहमि कारणगएण ।
दिट्ठे मोहावतीइ पारणवुड्डिउ विहिणा ॥ ५
नानं दुर्गतिम्हउ खलु तग्गुणकहणाए तउय बहुमाणो ।
गंभीरे भवज्झियधमं[1] पापमणा भोगसद्धाए ॥ ६ ॥
ज्ञानं कामि उवदेसपया इहं समखाया[2] ।
त्येवं शुभदेउद्धरिऊण मंदमतिविबोहणट्ठाए ॥ ३९
जाइणिमयहरियाए रइता एतेउ धम्मपुत्तेण
हरिभद्दायरिएणं भवविरहं इच्छमाणेण ॥ १०४० ॥

221, 4. **Upadesamala** by HEMACHANDRA [उपदेशमाला। हेमचन्द्रः].

Ends on Folio 223. R. $\frac{\text{धू}}{\text{ध}}$ L. २२३. In 505 gâthâs.

Gâthâ No. 501 :

हेममणिचंददप्पणसूररिसिप्पढमवज्जनामेहिं ।
सिरि अभयदेवसीसेहिं विरइयं परगणं इणमो॥५०१

An anagram on the author's name.

221, 5. **Karmastava** [कर्मस्तवः].

Ends on Folio 227. In 57 gâthâs.

221, 6. **Karmavipaka** [कर्मविपाकः].

Ends on Folio 237. In 168 gâthâs.

221, 7. **Sataka** [शतकम्].

Ends on Folio 244. In 111 gâthâs.

221, 8. **Sattariya** [सत्तरिया].

Ends on Folio 250. R. $\frac{\text{सू}}{\text{०}}$ L. २५०. In 91 gâthâs.

Ends:

गाहा य सत्तरीए चंदमहत्तरवयाणुसारेण ।
टीकाए नियमियाणं पगहिया होइ नउईए ॥ ९१
सत्तरिया संमत्ता ॥ प २५०

221, 9. **Prasamaratiprakarana** by UMÂSVÂTIVÂCHAKA [प्रशमरतिप्रकरणम् । उमास्वातिवाचकः].

Ends on Folio 270. R. $\frac{\text{सू}}{\text{०}}$ L. २७०.

In 313 âryâ verses.

Begins :

नाभेयाद्याः सिद्धार्थराजसूनुचरमाश्चरमदेहाः ।
पंचनवदशदशविधधर्मविधिविदो जयंति जिनाः ॥ १

जिनसिद्धाचार्योपाध्यायान्प्रणिपत्य सर्वसाधूंश्च ।
प्रशमरतिस्थैर्यार्थं वक्ष्ये जिनशासनात्किंचित् ॥ २

Ends:

जिनशासनार्णवादाकृष्टां धर्मकथिकामिमां श्रुत्वा ।
रत्नाकरादिव जरत्कपर्दिकामुद्धृतां भक्त्या ॥ ३१०

सद्भिर्गुणदोषज्ञैर्दोषानुत्सृज्य गुणलवा ग्राह्याः ।
सर्वात्मना च सततं प्रशमसुखायैव यतितव्यं ॥ ३११

यद्यसमंजसमिह च्छंदःशब्दसमयार्थतो मयाभिहितं ।
पुत्रापराधवत्तन्मर्षयितव्यं बुधैः सर्वं ॥ ३१२

सर्वसुखमूलबीजं [1]सर्वार्थविश्चयप्रकाशकरं ।
सर्वगुणसिद्धिसाधनधनमर्हच्छासनं जयति ॥ ३१३

प्रशमस्थितेन येनेयं कृता वैराग्यपद्धतिः ।
तस्मै वाचकमुख्याय नमो भूतार्थभाषिणे ॥ ३१४

इति श्रीमदुमास्वातिविरचितं प्रशमरतिप्रकरणं समाप्तमिति भद्रं भवतु लेखकवाचकस्य ॥ छ

221, 10. **Ekkavisathanapagarana** by SIDDHASENA [एक्कवीसट्ठाणापगरणम् । सिद्धसेनः].

Ends on Folio 274. R. सूत्र एक्क L. २७४. In 66 gâthâs.

221, 11. **Chhaththanapagarana** [छट्ठाणापगरणम्].

221. [12]. **Atmanusasana** [आत्मानुशासनम्].

Ends on Folio 285. R. $\frac{\text{सू}}{\text{नं}}$ L. २८९. In Mâgadhi. Incomplete.

222. Commentary on the **Dasavaikalikasutra**, by TILAKÂCHÂRYA [दशवैकालिकटीका । तिलकाचार्यः].

Folios 1 to 269 : 23½ inches long, 2 inches broad. 8 to 10 lines in a folio. 60 to 65 aksharas in a line. Numbered as 183. Folio 269.

R. $\frac{\text{सू}}{\text{उं}}$ L. २६९. Illustrated. Dated Samvat 1314 = A.D. 1258.

Begins:

५० ॥ नमः श्रीपंचपरमेष्ठिभ्यः ॥

अर्हतः प्रथयंतु मंगलममी शृंगारयंतः सदा...

शय्यंभवस्य श्रुतरत्नसिंधोः
सर्वस्वभूतं दशकालिकं यत् ।
उद्धाटच ब्रह्मर्थसुवर्णकोशं
तद्भव्यसुग्राह्यमहं करोमि ॥ ९

Ends:

मोक्षं महानंदपदं समासादयति ॥ इति समाप्तौ ब्रवीमीति पूर्ववत् ॥

इति श्रीश्रीतिलकाचार्यविरचितायां दशवैकालिकटीकायामुत्तरचूलिकायाष्टीका समाप्ता ॥

223. Kammapayadi with **Commentary** by MALAYAGIRI [कम्मपयडी सटीका । टी० मलयगिरिः].

Folios 1 to 276 : 14½ inches long, 1½ inches broad. 8 to 10 lines in a folio. 100 to 108 aksharas in a line. Numbered as 183. Folio 275.

R. $\frac{\text{सू}}{\text{एर्क}}$ L. २७९. Dated Samvat 1451 = A.D. 1395.

Commentary begins :

॥ ॐ नमो वीतरागाय ॥

प्रणम्य कर्मद्रुमचक्रनेमिं
नमत्सुराधीशमरिष्टनेमिं ।
कर्मप्रकृत्याः कियतां पदानां
सुखावबोधाय करोमि टीकां ॥१

Text begins :

सिद्धं सिद्धत्थसुयं वंदिय निद्धोयसव्वकम्ममलं ।
कम्मइगस्स करणइगुदयसइताणि वोच्छामि ॥ १

Text ends :

जस्स वरसासणवयवलवफरिसविकसियविमलमइकिरणो ।
विमलंति कम्ममइले सो मे सरणं महावीरो ।

Commentary ends :

कर्मप्रकृतिनिधानं बुद्ध्यर्थं येन मादृशां योग्यं ।
चक्रे परोपकृते श्रीचूर्णिकृते नमस्तस्मै ॥ ५

एतामतिगंभीरां कर्मप्रकृतिं विवृण्वता कुशलं ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥ ६

अरहंता मंगलं मे स्युः सिद्धाश्च मम मंगलं ।
मंगलं साधवः सम्यक् जैनो धर्मश्च मंगलमिति ॥ ७

संवत् १४६१ वर्षे फागणवदि १२ बुधे अद्येह स्तंभतीर्थे कर्मप्रकृतिवृत्तिपुस्तकं लेखितमस्ति ॥ शुभं भवतु ॥

224 Parisishtaparva by HEMACHANDRA [परिशिष्टपर्व । हेमचन्द्रः].

Folios 1 to 225 : 24½ inches long, 1¾ inches broad. 4 to 8 lines in a folio. 80 to 85 aksharas in a line. The last eleven leaves (paper) have been added to complete the book. The palm-leaf folios are numbered as 183. Folio 214. R. सू ई एकै L. २१४.

Ends:

इत्याचार्यश्रीहेमचंद्रविरचिते परिशिष्टपर्वणि स्थविरावलीचरिते महाकाव्ये आर्यरक्षितव्रतग्रहणपूर्वाधिगमवज्रस्वामिस्वर्गगमनतद्वंशविस्तारवर्णनो नाम त्रयोदशः सर्गः समाप्तः ॥ समाप्तं परिशिष्टपर्व. ॥ ग्रंथसंख्या ३९०० ॥

225. Kalpasutra [कल्पसूत्रम्].

Folios 1 to 156 : 13½ inches long, 1¾ inches broad. 6 to 10 lines in a folio. 42 to 45 aksharas in a line. Numbered as 183. Folio 156. R. ख ई फैं L. १९६. Dated Samvat 1247 = A. D. 1191.

Ends:

पज्जोसवणा कप्पदसा अट्ठमज्झयणं समत्तं ॥

संवत् १२४७ वर्षे आषाढसुदि ९ बुधेऽद्येह श्रीभृगुकच्छे समस्तराजावलीविराजितमहाराजाधिराज उमापतिवरलब्धप्रसादजंगमजनार्दनप्रतापचतुर्भुजश्रीमद्भीमदेवकल्याणविजयराज्ये एतत्प्रसादादवाप्तश्रीलाटदेशे निरूपितदंडश्रीसोभनदेवे अस्य निरूपणया मुद्राव्यापारे रत्नसीहप्रतिपत्तौ इह श्रीभृगुकच्छे श्रीमदाचार्यविजयसिंहसूरिपट्टोद्धरणश्रीमज्जिनशासनसमुच्चयआदेशनामृतपयःप्रपापालक आबाधजनपथिकाज्ञानश्रमपीलिनकर्णपुटपेयपरममोक्षास्पदविश्रामश्रीमदाचार्यश्रीपद्मदेवसूरिशिष्याणां हेतोः परमार्थमंडपपर्यूषणाकल्पं पं० साजणेन लिखितेति ॥ मंगलं महाश्रीः ॥ सं. २२००[1]

[1] १२००?

226. A collection of books in one manuscript [दशवैकालिकसूत्रमित्यादि].

Folios 1 to 174: 14 inches long, 2½ inches broad. 8 to 10 lines in a folio. 45 to 50 aksharas in a line. Numbered as 183. See separate entries which follow. Dated Samvat 1284 = A.D. 1228.

226, 1. Dasavaikalikasutra [दशवैकालिकसूत्रम्].

Ends on Folio 53. R. ६३ L. ५३.

226, 2. Pakshikasutra [पाक्षिकसूत्रम्].

Ends on Folio 78. R. थू ह्रां L. ७८.

226, 3. Ughaniryukti [ऊघनिर्युक्तिः].

Folios 79 to 174. Folio 174. R. सु ई एकै L. १७४.

Ends:

एसा अगुग्गहत्था फुडावियडाविसुद्धवंजणा इणमो ।
एक्कारससएहिं अट्ठहिं अहिएहिं संगहिया ॥ गा० ११०८

॥ संमत्ता ऊहनिजुत्ती ॥ छ

संवत् १२८४ वर्षे फाल्गुनामावस्यां सोमे अद्येह श्रीमदाघाटदुर्गे समस्तराजावलीसमलंकृतमहाराजाधिराजश्रीजैत्रसिंहदेवकल्याणविजयराज्ये तन्नियुक्तमहामात्यश्रीजगत्सिंहे समस्तमुद्राव्यापारान् परिपंथयतीत्येवं काले प्रवर्त्तमाने सा० उद्धरसूनुना समस्तसिद्धांतोद्धारैकधुरंधरेण विशुद्धसिद्धांतश्रवणसमुद्भूतप्रभूतश्रद्धातिरेकेण परमार्हत सा० हेमचंद्रेण दशवैकालिकपाक्षिकसूत्रऊघनिर्युक्तिसूत्रपुस्तिका लेखिता लिखिता च ठ० साहडसुतश्रवणोपासक ठ० महिलणसुतखेमसिंहेन ॥ छ ॥ शिवमस्तु संघस्य ॥

227. Abhidhanachintamani by HEMACHANDRA [अभिधान-चिंतामणिः । हेमचन्द्रः].

Folios 1 to 190: 13¼ inches long, 1½ inches broad. 8 to 10 lines in a folio. 40 to 44 aksharas in a line. Numbered as 183. Folio 190. R. सु ७१ ० L. १९०.

228. Danaprakasa [दानप्रकाशः].

Folios 12 to 113: 12 inches long, 1½ inches broad. 8 to 10 lines in a folio. 90 to 94 aksharas in a line. Numbered as 183. Folio 113. R. सु ला ३ L. ११३. Incomplete, the beginning and end alike being wanting.

229. Dharmabindu by HARIBHADRASÛRI, with the **Commentary** of MUNICHANDRASÛRI [धर्मबिंदुः सटीकः । मू० हरिभद्रसूरिः टी० मुनिचन्द्रसूरिः].

Folios 1 to 227: 13¼ inches long, 1½ inches broad. The last four folios are broken. Numbered as 183. Folio 217. R. सू ० ल्म L. २१७.

A form of इ in this MS. is ०. Dated Samvat 1181 = A.D. 1125. Commentary begins:

ए ॥ ॐ नमः सर्वज्ञाय ॥

शुद्धन्यायवशायत्तीभूतसद्भूतसंपदे ।
पदे परे स्थितायास्तु श्रीजिनप्रभवे नमः ॥

जयंतु ते पूर्वमुनीशमेघा
यैर्विश्वमाश्वेव हतोपतापं ।
चक्रे [1]वृहद्धर्मप्वसिंधुपान-
प्रपन्नतुंगातिगभीररूपैः ॥

यच्चामानुस्मृतिमनयनयं सज्जतश्चित्रचक्षुः-
क्षेपाह्व्यांजनमनुसरन् लब्धशुद्धावलोकः ।

[1] वृहत्पार्वणसिंधु° ?

226. A collection of books in one manuscript [दशवैकालिकसूत्रमित्यादि].

Folios 1 to 174: 14 inches long, 2½ inches broad. 8 to 10 lines in a folio. 45 to 50 aksharas in a line. Numbered as 183. See separate entries which follow. Dated Samvat 1284 = A.D. 1228.

226, 1. Dasavaikalikasutra [दशवैकालिकसूत्रम्].

Ends on Folio 53. R. $\frac{६}{३}$ L. ९३.

226, 2. Pakshikasutra [पाक्षिकसूत्रम्].

Ends on Folio 78. R. $\frac{४}{का}$ L. ७८.

226, 3. Ughaniryukti [उघनिर्युक्तिः].

Folios 79 to 174. Folio 174. R. $\frac{सु}{एकै}$ L. १७४.

Ends:

एसा अगुग्गहत्था फुडवियडविसुद्धवंजणा इणमो ।
एक्कारससएहिं अट्ठहिं अहिएहि संगहिया ॥ गा० ११०८

॥ संमत्ता उहनिजुत्ती ॥ छ

संवत् १२८४ वर्षे फाल्गुनामावस्यां सोमे अद्येह श्रीमदाधा-
दुर्गे समस्तराजावलीसमलंकृतमहाराजाधिराजश्रीजैत्रसिंहदेवकल्या-
णविजयराज्ये तन्नियुक्तमहामात्यश्रीजगत्सिंहे समस्तमुद्राव्यापारान्
परिपंथयतीत्येवं काले प्रवर्त्तमाने सा० उद्धरसूनुना समस्तसिद्धांतो-
द्धारैकधुरंधरेण विशुद्धसिद्धांतश्रवणसमुद्भूतप्रभूतश्रद्धातिरेकेण पर-
माहत सा० हेमचंद्रेण दशवैकालिकपाक्षिकसूत्रउघनिर्युक्तिसूत्रपुस्तिका
लेखिता लिखित्वा च ठ० साहडसुतश्रवणोपासक ठ० महिलणसुतखे-
मसिंहेन ॥ छ ॥ शिवमस्तु संघस्य ॥

227. Abhidhanachintamani by HEMACHANDRA [अभिधान-चिंतामणिः। हेमचन्द्रः].

Folios 1 to 190: 13¼ inches long, 1½ inches broad. 8 to 10 lines in a folio. 40 to 44 aksharas in a line. Numbered as 183. Folio 190. R. सु ६७ ० L. १९०.

228. Danaprakasa [दानप्रकाशः].

Folios 12 to 113: 12 inches long, 1½ inches broad. 8 to 10 lines in a folio. 90 to 94 aksharas in a line. Numbered as 183. Folio 113. R. सु ला ३ L. ११३. Incomplete, the beginning and end alike being wanting.

229. Dharmabindu by HARIBHADRASÛRI, with the **Commentary** of MUNICHANDRASÛRI [धर्मबिंदुः सटीकः। मू० हरिभद्रसूरिः टी० मुनिचन्द्रसूरिः].

Folios 1 to 227: 13¼ inches long, 1½ inches broad. The last four folios are broken. Numbered as 183. Folio 217. R. सूं ० ल ग्रं L. २१७.

A form of इ in this MS. is ०. Dated Samvat 1181 = A.D. 1125. Commentary begins:

ॐ ॥ ऊँ नमः सर्वज्ञाय ॥

शुद्धन्यायवशायत्तीभूतसद्भूतसंपदे ।
पदे परे स्थितायास्तु श्रीजिनप्रभवे नमः ॥

जयंतु ते पूर्वमुनीशमेधा
यैर्विश्वमाश्वेव हतोपतापं ।
चक्रे [1]वृहद्ब्रह्मप्वसिंधुपान-
प्रपन्नतुंगातिगभीररूपैः ॥

यन्नामानुस्मृतिमनयनयं सज्जतश्चित्रचक्षुः-
क्षेपाहिव्यांजनमनुसरन् लब्धशुद्धावलोकः ।

[1] वृहत्पार्वणसिंधु° ?

सद्यः पश्यत्यमलमतिहृन्मेदिनीमध्यमग्रं
गंभीरार्थं प्रवचननिधिं भारतीं तां स्तवीमि ।
विदधामि धर्मबिंदोरतिविरलीभूतगर्भपदबिंदोः ।
भव्यजनोपकृतिकृते यथाबोधं विवृतिमेनां ॥

Text begins:

प्रणम्य परमात्मानं समुद्धृत्य श्रुतार्णवात् ।
धर्मबिंदुं प्रवक्ष्यामि तोयबिंदुमिवार्णवात् ॥

Text ends:

स तत्र दुःखविरहादत्यंतसुखसंगतः ।
तिष्ठत्ययोगो योगींद्रवंद्यस्त्रीजगतीश्वर[1] ॥ इति ।

Commentary ends:

जगत्त्रयंपरमेश्वर इति ॥ छ

इति श्रीमुनिचंद्रसूरिविरचितायां धर्मबिंदुप्रकरणवृत्तौ विशेषतो — — ध्यायः समाप्तः ॥ संवत् ११८१ वैशाखवदि ५ — — — लिखितं — — ग्रं० ३००० ॥

230. Suktavali by LAKSHMAṆA [सूक्तावलिः । लक्ष्मणः]

Folios 1 to 96: 12½ inches long, 1½ inches broad. 8 to 12 lines in a folio. 73 to 78 aksharas in a line. Incomplete.

Begins:

॥ नमः सर्वज्ञाय ॥

सूक्तिरत्नसुधासिंधुं ध्यात्वा श्रीश्रुतदेवतां ।
सूक्तानां संग्रहं चक्रे लक्ष्मणो लक्षसूक्तिकं ॥ १ ॥

अथ जिनस्तुतिः

अथ कविः

कवेः श्रीवामदेवस्य कामदेवस्य धन्विनः ।
वाणीव पंचबाणीव न लभ्या कस्य मानसे ॥ १
कवींद्राश्च करींद्राश्च मदमंथरगामिनः ।
वने च स्थातुमिच्छंति भवने वावनीभृतः ॥ २
कवेः श्रीकालिदासस्य तस्य किं स्तुमहे वयम् ।
यस्य काव्यत्रयीं श्रुत्वा मर्त्योपि विबुधो भवेत् ॥ ३
स्तोतुमेककविं न श्रीवाल्मीकिमृषयो विदुः ।
द्वितीयो यस्य नास्त्येव स कथं प्रथमः कविः ॥ ४
स एव पदविन्यासस्ता एवाक्षरपंक्तयः ।
वक्रे वक्रे मनुष्याणां क्वापि क्वापि विदग्धता ॥ ५
सुभाषितरसास्वादबद्धरोमांचकंचुकाः ।
विनापि कामिनीसंगं कवयः सुखमासते ॥ ६
लंघिताः कवयः स्थाने पदन्यासैर्मुरारिणा ।
पुराप्येष त्रिपद्यापि त्रिलोकीमप्यलंघयत् ॥ ७
जीयाद्बुधसुधाधुन्याः क्षुब्धबुधःप्रभवाचलः ।
यद्भंगाश्लेषमासाद्य भंगः कविभिराश्रितः ॥ ८
आहतप्रतिभाः केचित्केचिदाहतनिःप्रभाः ।
घटदीपनिभाः केचित्केचिट्टुंथानुसारिणः ॥ ९
कवयः कालिदासाद्याः कवयो वयमप्यमी ।
मेरौ च परमाणौ च पदार्थत्वव्यवस्थितिः ॥ १०
कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पांडुपुत्राणां गतया कर्णगोचरम् ॥ ११

सद्यः पश्यत्यमलमतिहन्मेदिनीमध्यमग्रं
गंभीरार्थं प्रवचननिधिं भारतीं तां स्तवीमि ।
विदधामि धर्मबिंदोरतिविरलीभूतगर्भपदबिंदोः ।
भव्यजनोपकृतिकृते यथाबोधं विवृतिमेनां ॥

Text begins:

प्रणम्य परमात्मानं समुद्धृत्य श्रुतार्णवात् ।
धर्मबिंदुं प्रवक्ष्यामि तोयबिंदुमिवार्णवात् ॥

Text ends:

स तत्र दुःखविरहादत्यंतसुखसंगतः ।
तिष्ठत्ययोगो योगींद्रवंद्यस्त्रीजगतीश्वर[1] ॥ इति ।

Commentary ends:

जगत्त्रयंपरमेश्वर इति ॥ छ

इति श्रीमुनिचंद्रसूरिविरचितायां धर्मबिंदुप्रकरणवृत्तौ विशेषतो - - ध्यायः समाप्तः ॥ संवत् ११८१ वैशाखवदि ६ - - - - लिखितं - - ग्रं० ३००० ॥

230. Suktavali by LAKSHMANA [सूक्तावलिः । लक्ष्मणः]

Folios 1 to 96: 12½ inches long, 1½ inches broad. 8 to 12 lines in a folio. 73 to 78 aksharas in a line. Incomplete.

Begins:

॥ नमः सर्वज्ञाय ॥
सूक्तिरत्नसुधासिंधुं ध्यात्वा श्रीश्रुतदेवतां ।
सूक्तानां संग्रहं चक्रे लक्ष्मणो लक्षसूक्तिकं ॥ १ ॥
अथ जिनस्तुतिः ...

अथ कविः

कवेः श्रीवामदेवस्य कामदेवस्य धन्विनः ।
वाणीव पंचबाणीव न लग्ना कस्य मानसे ॥ १

कवींद्राश्च करींद्राश्च मदमंथरगामिनः ।
वने च स्थातुमिच्छंति भवने वावनीभृतः ॥ २

कवेः श्रीकालिदासस्य तस्य किं स्तुमहे वयम् ।
यस्य काव्यत्रयीं श्रुत्वा मर्त्योपि विबुधो भवेत् ॥ ३

स्तोतुमेककविं न श्रीवाल्मीकिमृषयो विदुः ।
द्वितीयोऽयस्य नास्त्येव स कथं प्रथमः कविः ॥ ४

स एव पदविन्यासस्ता एवाक्षरपंक्तयः ।
वक्रे वक्रे मनुष्याणां क्वापि क्वापि विदग्धता ॥ ५

सुभाषितरसास्वादबद्धरोमांचकंचुकाः ।
विनापि कामिनीसंगं कवयः सुखमासते ॥ ६

लंघिताः कवयः स्थाने पदन्यासैर्मुरारिणा ।
पुराप्येष त्रिपद्यापि त्रिलोकीमप्यलंघयत् ॥ ७

जीयाद्व्यसुधाधुन्याः सुबंधुःप्रभवाचलः ।
यद्भंगाश्लेषमासाद्य भंगः कविभिराश्रितः ॥ ८

आहतप्रतिभाः केचित्केचिदाहतनिःप्रभाः ।
घटदीपनिभाः केचित्केचिट्टंथानुसारिणः ॥ ९

कवयः कालिदासाद्याः कवयो वयमप्यमी ।
मेरौ च परमाणौ च पदार्थत्वव्यवस्थितिः ॥ १०

कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पांडुपुत्राणां गतया कर्णगोचरम् ॥ ११

निःश्वासोऽपि न निर्याति बाणे हृदयवर्त्तिनि ।
किं पुनर्विकटाटोपपदबंधा सरस्वती ॥ १२
संति श्वान इवासंख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहवः कवयः सरभा इव ॥ १३
उच्छ्वासांतेप्यखिन्नास्ते येषां वक्त्रे सरस्वती ।
कथमाख्यायिकाकारा न ते वंद्या कवीश्वराः ॥ १४

अथ काव्यम्

लक्ष्मीः सुवर्णरूपापि पाणिपादे विलंबते ।
भूषयत्यंतरात्मानं वर्णरूपाऽपि भारती ॥ १
अपूर्वसूक्तिसद्वस्तुः कोपि काव्यफले रसः ।
चर्वणे सर्वसामान्ये स्वादुज्ञो विरलो जनः ॥ २
अपूर्वः सूक्तिकोशोयं दृश्यते तव भारति ।
अव्यये व्ययमायाति व्यये याति च विस्तरम् ॥ ३
धरित्र्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखंडेषु रत्नसंज्ञा नियोजिता ॥ ४
ते धन्यास्ते महात्मानस्तेषां लोके स्थिरं यशः ।
यैर्निबद्धानि काव्यानि ये च काव्येषु कीर्त्तिताः ॥ ५
चोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमंगे सुभाषितम् ॥ ६
किं कवेस्तस्य काव्येन किं कांडेन धनुष्मता ।
परस्य हृदये लग्नं न घूर्णयति तच्छिरः ॥ ७
काव्यं किमपि तद्वाच्यमर्वाचीनं करोति यत् ।
श्रुतमात्रममित्राणां वक्त्राणि च शिरांसि च ॥

भवतस्तुल्यतामेति न सोमो न दिवाकरः ।
यस्य दातुः परिश्रांतो न रात्रौ न दिवा करः ॥ १
क्षणमप्यनुगृह्णाति यं दृष्टिस्तेनुरागिणी ।
ईर्ष्ययेव त्यजत्याशु तं नरेंद्र दरिद्रता ॥ २
दरिद्रान्सृजतो धातुः कृतार्थान्कुर्वतस्तव ।
श्रीकीर्त्तीश न जानीमः कः श्रमेण विरंस्यति ॥ ३
राजंस्तवासिपत्रस्य राजते पुष्करावली ।
कालाहूतद्विषल्लेखलिखितेवाक्षरावली ॥ ४
अमी पानकरंकाभाः संप्राऽपि जलराशयः ।
त्वद्यशोराजहंसस्य पंजरं भुवनत्रयम् ॥ ५
सर्वदा सर्वदोसीति मिथ्या संस्तूयसे बुधैः ।
नास्यो लेभिरे पृष्ठं न वक्षः परयोषितः ॥ ६
अगम्यगमनात्प्रायः प्रायश्चित्तीयते जनः ।
अगम्यं त्वद्यशो याति सर्वत्राऽपि प्रपूज्यते ॥ ७
इयता स द्युसद्गोपि विचिकित्सां चिकित्सति ।
श्रुतिर्न यदहल्यादौ जारेत्येनं जुगुप्सते ॥ ८
उष्मायमाणया तन्वा दृशा बाष्पायमाणया ।
नद्यः शुष्यंति पुष्यंति विंध्ये यस्यारियोषिताम् ॥ ९
दिशः पटपटायंते गगनं लोहितायते ।
कर्णतालास्तसिंदूरे हास्तिके यस्य सर्पति । १०
भयमेकमनेकेभ्यः शत्रुभ्यो युगपत्सदा ।
ददासि तच्च तेनास्ति राजंश्चित्रमिदं महत् ॥ ११

सौकरं रूपमास्थाय हरिणाप्युद्धृता मही ।
असौकरं त्वया कृत्वा राजंश्चित्रमिदं महत् ॥ १२

चित्रं कारणमन्यत्र कार्यमन्यत्र दृश्यते ।
महान्प्रतापो देवस्य द्राहस्तु हृदि विद्विषाम् ॥ १३

दोषाणां च गुणानां च त्वयि संख्या न विद्यते ।
गुणानामप्रमेयत्वाद्दोषाणामप्यसंभवात् ॥ १४

भूभृद्वंशप्रसूतानां धनुषां च द्विषां च यः ।
जीवापकर्षणं चक्रे समं समरसीमनि ॥ १५

आशंकितभुजाशीरे नाशीरे यस्य सर्पति ।
स्पर्द्धयेव प्रसर्पति प्राणाः प्रत्यर्थिभूभृताम् ॥ १६

सोमेश्वरस्येतौ ।

मन्ये वास्तव्यमेवासीत्त्वच्चापंहृदि विद्विषाम् ।
रणभूमौ नमत्यस्मिन्नेमुस्ते कथमन्यथा ॥ १७

वाहडस्य ।

प्रायेण सर्वे पश्यंति विपरीतं विनश्वराः ।
यतः कांचनगोरोपि काल एवासि विद्विषां ॥ १८

तुलामारुह्य रविणा वृश्चिके निहितं पदम् ।
भवता शिरसि न्यस्तमयत्नेनैव भोगिनाम् ॥ १९

विचरेदेकपाद्धर्मः कथमस्मिन्कलौ युगे ।
यदि वंशस्त्वदीयोयं न स्यादस्यावलंबनम् ॥ २०

असिंदूरेण सीमंता माभूत्तेयोषितामिति[1] ।
त्यक्त्वा प्रयांतु सीमंतादसिं दूरेण तेरयः ॥ २१

किं कृतेन न यत्र त्वं यत्र त्वं किमसौ कलिः ।
कलौ चेद्भवतो जन्मकृतिरस्तु कृतेन किं ॥ २२

पद्मानां नालदंडेषु देहदंडेषु कामिनाम् ।
दृश्यंते यदि नान्यत्र त्वयि रक्षति कंटकाः ॥ २३

कीर्त्तिस्ते जातजाड्येव चतुरंभोधिमज्जनात् ।
आतपाय जगन्नाथ गता मार्त्तंडमंडलम् ॥ २४

अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः ।
मार्गणौघः समभ्येति गुणो याति दिगंतरम् ॥ २५...

231. Uvaisutra [उवाईसूत्रम्].

Folios 1 to 48: $28\frac{1}{2}$ inches long, $2\frac{1}{4}$ inches broad. 8 to 10 lines in a folio. 120 to 130 aksharas in a line. Numbered as 183. Folio 47. R. $\frac{\text{सं}}{\text{मो}}$ L. ४७. Dated Samvat 1326 = A.D. 1270.

232. Vritti on the **Uvaisutra** by ABHAYADEVA [उवाईसूत्रस्य वृत्तिः । अभयदेवः].

Folios 1 to 105: agreeing in all respects with 231, and of same date. Folio 105. R. $\frac{\text{सु}}{\text{ल्हे}}$ L. १०५.

233. Rayappasenai [रायप्पसेणइ].

Folios 1 to 66: agreeing in all respects with 231, and of same date. Folio 66. R. $\frac{\text{सु}}{\text{फ्}}$ L. ६६. The "granthâgra" is given as 2078.

234. Commentary on the foregoing by MALAYAGIRI [तस्या एव टीका । मलयगिरिः].

Folios 1 to 193: agreeing in all respects with 231, and of same date.

Ends:

ताडनानि कशाघाताः ॥

इति श्रीमलयगिरिविरचिता राजप्रश्नीयोपांगस्य वृत्तिका समर्थिता ॥ यादृशं० ॥ संवत् १३२६ माघ - - -

235. **Jnatadharmakatha** [ज्ञाताधर्मकथा].

Folios 1 to 154: agreeing in all respects with 231. Dated Samvat 1307 = A. D. 1251. Folio 153. R. $\frac{\text{सु}}{\text{६}}$ L. १५३. The "granthâgra" is given as 5065.

236. **Commentary** on the foregoing by ABHAYADEVASÛRI [तस्या एव टीका। अभयदेवसूरिः].

Folios 1 to 120: agreeing in all respects with 235, and of same date. Folio 120. R. $\frac{\text{सु}}{\text{६}}$ L. १२०.

Ends:

अनुष्टुभां सहस्राणि त्रीणि सप्तशतानि च ॥ छ ॥

संवत् १३०७ वर्षे ॥

अस्तीह श्रेष्ठपर्वप्रचयपरिचितः क्ष्माभृदाम्नप्रतिष्ठः
सच्छायश्चारुवर्णः सकलसरलतालंकृतः शास्त्रवृत्तः ।
पल्लीवालाख्यवंशो जगति सुविदितस्तत्र मुक्तेव साधुः
साधुव्रातप्रणंता वरहुडिरिति सत्ख्यातिमान्नेमडोऽभूत् ॥ १

तस्योच्चैस्तनया विशुद्धविनयास्तत्रादिमो राहडो
जज्ञेऽतः सहदेव इत्यभिधिया लब्धप्रसिद्धिर्जने ।
उत्पन्नो जयदेव इत्यवहितस्वांतः सुधर्मे तत-
स्तत्राद्यस्य सदा प्रिया प्रियतमा लक्ष्मी तथा नाइकिः ॥२

आद्याया जिनचंद्र इत्यनुदिनं सद्धर्मकर्मोद्यतः
पुत्रश्चाहिणिसंज्ञिता सहचरी तस्य त्वमी सूनवः ।
ज्येष्ठोऽभूत्किल देवचंद्र इति यो द्रव्यं व्ययित्वा निजं
सत्तीर्थेषु शिवाय संघपतिरित्याख्यां सुधीर्लब्धवान् ॥ ३

नामंधराख्योऽथ महाधराख्यो-
ऽतो [1]वीरधवलाभिधभीमदेवौ ।

पुत्री तथा धाहिणिनामिकाभू-
त्सर्वेपि जैनांघ्रिसरोजभृंगाः ॥ ४

श्रीदेवभद्रगणिपादसरोरुहाले-
र्भक्त्या नमद्विजयचंद्रमुनीश्वरस्य ।
देवेंद्रसूरिसुगुरोः पदपद्ममूले
तत्रांतिमौ जगृहतुर्यतितां शिवोक्तो[1] ॥ ५

नाइकेस्तु सुता जातास्तत्र जेष्ठो धनेश्वरः ।
खेत्तनाम्नी प्रिया तस्य अरसिंहादयः सुताः ॥ ६

द्वैतीयीकः सुसाधुश्रुतवचनसुधास्वादनातृप्तचित्तः
श्रीमज्जैनेंद्रबिंबप्रवरजिनगृहे प्रोल्लसत्पुस्तकादौ ।
सप्तक्षेत्र्यां प्रभूतव्ययितनिजधनो लाहडो नामतोभूत्
लक्ष्मश्रीरित्यभिख्या सुचरितसहिता तस्य भार्या सदाय

अभयकुमाराभिख्यस्तृतीयोऽजनि नंदनः ।
यो दध्रे मानसं धर्मश्रद्धासंबंधबंधुरं ॥ ८

धर्मे सहाया सहदेवसाधोः
सौभाग्यदेवीति बभूव जाया ।
पुत्रौ च षेढाभिधगोसलाख्यौ
प्रभावकौ श्रीजिनशासनस्य ॥ ९

किं च ।

यौ कृत्वा गुणसंघकेलिभवनं श्रीसंघमुच्चैस्तरां
श्रीशत्रुंजयरैवतप्रभृतिषु प्रख्याततीर्थेषु च ।
न्यायोपार्जितमर्थसार्थनिवहं स्वीयं व्ययित्वा भृशं
लेभाते सुचिराय संघपतिरित्याख्यां स्फुटां भूतले ॥ १०

[1] शिवोक्तौ ?

आद्यस्य जज्ञे किलषी च देवी
नाम्ना कलत्रं सुविवेकपात्रं ।
तथा सुता जेहडहेमचंद्र-
कुमारपालाभिधपासदेवाः ॥ ११

अभवद्गोसलसाधोर्गुणदेवीति वल्लभा ।
नंदनो हरिचंद्राख्यो देमतीति च पुत्रिका ॥ १२

जयदेवस्य तु गृहिणी जाल्हणदेवीति संज्ञिता जज्ञे ।
पुत्रस्तु वीरदेवो देवकुमारश्च हाभूश्च ॥ १३

शुभशीलशीलनपरा अभवंस्तेषामिमाः सधर्मिण्यः ।
विजयसिरी देवसिरी हरसिणिसंज्ञा यथासंख्यं ॥ १४

एवं कुटुंबसमुदय उज्ज्वलवृषविहितवासनाप्रचयः ।
सुगुरोर्गुणगणसुगुरोः शुश्राव सुदेशनामेवं ॥ १५

दानशीलतपोभावभेदाद्धर्मश्चतुर्विधः ।
अग्रणी यः सदा भव्यैर्भाव्यो मोक्षपदप्रदः ॥ १६

विषयजसुखमिच्छोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदशरंभिणो[1] भावनाः किं
तदिह नियतमेकं दानमेवास्य धर्मः ॥ १७

ज्ञानाभयोपग्रहदानभेदा-
त्तच्च त्रिधा सर्वविदो वदंति ।
तत्रापि निर्वाणपथैकदीपं
संज्ञानदानं ------

237. Commentary on the **Uttaradhyayana**, by ŚÂNTYÂCHÂRYA [उत्तराध्ययनस्य टीका । शान्त्याचार्यः].

Folios 1 to 395: 28½ inches long, 2¼ inches broad. 12 to 14 lines in a folio. 133 to 140 aksharas in a line.

Begins:

ए० ॥ नमो वीतरागाय ॥

शिवदाः संतु तीर्थेशा विघ्नसंघातघातिनः ।
भवकूपोद्धृतौ येषां वाग्वरत्रायते नृणां ॥ १

238. Commentary on the **Vyavaharasutra** by MALAYAGIRI [व्यवहारसूत्रस्य टीका । मलयगिरिः].

Folios 1 to 314: 31½ inches long, 2 inches broad. Numbered as 183. Folio 314. R. सू / ल्ल / एक L. ३१४. Contains the ṭîka on the first khaṇḍa of the work. The "granthâgra" is given as 10,878.

Begins:

नमः सर्वविदे ॥

प्रणमत नेमिजिनेश्वरमखिलप्रत्यूहतिमिररविबिंबं ।
दर्शनपथमवतीर्णं शशिवद्दृष्टेः प्रसत्तिकरं ॥ १

Ends:

तत्रापि निर्वाणपथैकदीपं
सज्ज्ञानदानं प्रवरं वदंति ॥ १८
कालानुभावान्मतिमांद्यतश्च
तच्चाधुना पुस्तकमंतरेण ।
न स्यादतः पुस्तकलेखनं हि
श्राद्धस्य युक्तं नितरां विधातुं ॥ १९
इत्याकर्ण्य सकर्णस्तत्श्च निजभुजसमर्जितधनेन ।
व्यवहाराद्यसुखंडस्य पुस्तकं लेखयामास ॥ २०
यावद्व्योमसरोवरे० ॥ २१ ॥ मंगलमस्तु ॥ ग्रं० १०८७८

239. Parsvanathacharitra by DEVABHADRAGANI [पार्श्वनाथचरित्रम् । देवभद्रगणिः].

Folios 1 to 313 : 31½ inches long, 2½ inches broad. 10 to 12 lines in a folio. 135 to 141 aksharas in a line. Numbered as 183. Folio 313. R. स्ता र्त्ता ३ L. ३१३.

Begins :

॥ ॐ नमो वीतरागाय ॥

वम्ममहामहिमुद्धरिउ मिच्छुणो जस्स विहियसत्तसिरो ।
दोउं साहेज्जं पिवउ वद्धिउ सहइ भुयगवइ ॥ १

ɜ :

तित्थंमि वहंत तस्स भयवउं तियसवंदणिज्जंमि ।
चंदकुलंमि प्रसिद्धो विउलाए वइरसाहाए ॥
सिरिवद्धमाणसूरी अहेसितव[र]नाणचरणरयणनिही ।
जस्सवि सुमरंतो लोगो रोमंचमुव्वहइ ॥
तस्सासि दोन्नि सीसा जयविरुयाया दिवायरससिव्व ।
आयरियजिणेसरबुद्धिसागरायरियनामाणो ॥
तेसिं च पुणो जाया सीसा दो महियलंमि सुपसिद्धा ।
जिणचंदसूरिनामो बीउं ऽभयदेवसूरित्ति ॥
सिद्धंतवित्तिविरयणपगरणउवयरियभव्वलोयाण ।
को ताण गुणलवंपि हु होज्ज समत्थो पवित्थरिउं ॥
तेसिं विणेयस्स पसन्नचंदसूरिस्स सव्वगुणनिहिणो ।
पयपउमसेवगेहिं सुमइउवज्झायसिस्सेहिं ॥
संवेगरंगमालाराहणसत्थं जगंमि वित्थरियं ।
रइयं च वीरचरियं जेहिं कहारयणकोसा य ॥
सोवन्निंडियमंडियमुणिसुव्वयवीरभवणरमणीए ।
भरुयत्थे तेहिं ठिए मंदिरे आमदत्तस्स ॥

सिरिदेवभद्दसूरीहिं विरइयं पासनाहचरियमिमं ।
लिहियं पढमिल्लुय पोत्थयंमि गणिअमलचंदेण ॥
इह इं जे उ वयरिया मुणिगिहिणो ते सवि नंदंतु ।
काराविय च एयं जेहिं ते पुण निसामेह ॥
जयपयडवियडवायडकुलमंदिरजयपडायपडितुल्लो ।
कप्पडवाणिज्जपुरे सेठी गोवद्धणो आसि ॥
वावन्नसिहरमणहरसुवन्नवरकलससोहमाणसिरं ।
जिणवासपहुभवणं जेणं काराविय तुंगं ॥
तस्स सुउ सोट्ठाकुच्छिसंभवो सेट्ठि जज्जणागोत्ति ।
छत्तावल्लिनिवासी अहेसि सावयगुणाणुगउ ॥
तस्स सुया सुंदरिकुच्छिसंभवा सिद्धसेट्ठिवीरो य ।
अन्नो य भाइणेज्जो सुउ जसणागसेट्ठित्ति ॥
जिणभवणबिंबपोत्थयसंघत्थसुतित्थजत्तकरणेण ।
नियजम्मजीवियाणं फलमुवलद्धं जए जेहिं ॥
अह हेममयं व विभूसणेहिं णेगेहिं सेट्ठीवीरेण ।
सिरिपासनाहबिंबं सुट्ठु पइट्ठावियं लट्ठं ॥
पित्तियसुयगग्गयसेट्ठिआमसहिएण परमरिद्धीए ।
काऊण तित्थजत्तं निव्विग्घं संघजुत्तेणं ॥
वीरसुएण य जसदेवसेट्ठिणा नन्नइकुरेणं च ।
काराविय सुहबोहं परमेसरपासचरियमिमं ॥
काले वसुरसरुद्दे विक्कमाउ सिद्धमिमं ।
अणुचियमिह सूरीहिं खमियव्वं सोहियव्वं च ॥
इय विमलकेवलालोयलोइयालोयलोयभावस्स ।
बहुसत्थसमुद्धरिए पासजिणिंदस्स व वरचरिए ॥

नेव्वाणलंभनामो विहुणियसव्वंगिवग्गसंतावो ।
पंचमउ पंचमउ समत्थिउ एस पत्थावो ॥

निप्पत्तिमुवगयमिमं मुणिसुव्वयसामिणो पसाएण ।
अंबासुदरिसणावंभसंतिसुयदेवयाणं च ॥

एयं तिलोयपहुपासजिणेसरस्स
जे सुंदरं चरियमेक्कमणा कहिंति ।
जे वा पढंति निसुणंति धरंति चित्ते
[1]भत्तिभरेक्कहियया सह संथुणंति ॥

ते रोगसोगधणनासपवासवेरि-
भूयाइसंभवमहादुहविप्पमुक्का ।
भोत्तूण वंछियसुहाइ जणाण हज्जा
सज्जो लहंति सुरलोयसिरिं सिवं च ॥

मंगलमस्तु ॥ इति श्रीप्रसन्नचंद्रसूरिपादसेवकश्रीदेवभद्राचार्यविरचितं पार्श्वचरितं समाप्तम् ॥ ६२ ६२

240. Tilayasundarirayanachudakaha by DEVENDRAGAṆI [तिलयसुंदरिरयणचूडकहा । देवेंद्रगणिः].

Folios 1 to 109: 27 inches long, 2¼ inches broad. 8 to 10 lines in a folio. 136 to 140 aksharas in a line. Numbered as 183. Folio 109. R. $\frac{\text{सु}}{\text{उ}}$ L. १०९.

Begins:

जयइ मुहकंतिनिज्जियसारयरयणीयरा सुयदेवी ॥
दुत्तरसुयरयणायरतरणतरंडोवमपसाया ॥ २
इय नमिउं वीरजिणं थोऊण सरस्सइं च भावेण ।
भवियजणबोहत्थं उवएसं किंचि वोच्छामि ॥ ३

Ends :

देहे संपत्तमहंतचक्कवट्टिभोगो महाकुलुप्पन्नाइंहिं पुव्वभवभारियाहिं संगउं । घेत्तूण सामंनं अहिज्जिऊण सुत्तं काऊण समणगुणपरिवालणं । उप्पाडिऊण सयललोयालोयप्पयासयं केवलनाणं जंमजरामरणरोयसोयपरंमुहं[1] विगयनिस्सेसदुहं निरुपमसासयसोखं पाविही मोखंति । ता भो महाराय समासएउ एयं साहियं रयणचूडचरियं जं तए मुट्ठंति[2] भणिऊण उवसंहरिया धम्मकहा भगवया गोयमसामिणा । सेणिउवि राया परितुट्ठचित्तो मुहो जिणपूयणाईणं थेवाणवि महंतो सुहाण बंधोत्ति सकोउगो विंदिऊण गोयमसामीसपरियणो गउं सनयरंति ।

सोऊण चरियमेयं तु रयणचूडाइयाण सत्ताणं ।
जिणपूयाइसु जुत्तो कायव्वो भव्वसत्तेहिं ॥
मिच्छत्तमोहमहणं भवसायरतरणपवहणं परमं ।
[3]कुसुमयविणेसणं सिरिजिणिंदवरसासणं जयउं ॥
सयलजयजंतुपत्थियसुहफलया कप्पपायवलयत्त[4] ।
सग्गोवसग्गसंगमनिबंधणं जयइ जिणपूया ॥
सयलसुहसिद्धिकरणो दुहहरणो पयडपावविसहरणो ।
जिणसासणस्स सारो जयइ सया पंचनवकारो ॥

---

[1] °परंमुहं ? [2] पुट्ठंति ? [3] कुसमय° ? [4] °ल्लयव्व ?

धणउ धणकामीणं कामत्थीणं च सव्वकामकरो ।
दाणाइउंवि धम्मो जिणिंदभणिउ जए जयइ ॥
भइं सरस्सईदेवीएं समणुभावउ जीमे[1] ।
मंदमइविउसाणं तहा सुविउसायए पुरिसो ॥
सिरिदेवसूरी दुव्वहसीलंगगुणगणाधरणो ।
उज्जयविहारनिरउ तग्गच्छे तयणु संजाउ ॥
सिरि नेमिचंदसूरी कोमुइचंदोव्व जणमणानंदो ।
तयणु महिवलयपसरियनिम्मलकित्ती विमलचित्तो ॥
समणगुणदुव्वहधुराधारणधोरेयभावमणुपत्तो ।
सिरिउज्जोयणसूरी सोमतणू सोमदिट्ठी य ॥
धम्मोव्व मुत्तिमंतो पयपंकयरेणुनासियतमोहो ।
जसदेवसूरिनामो रविव्व नवतेयसा जुत्तो ॥
दूरविणिज्जियमयणो रूवेण मणेण सयलगुणनिलउ ।
आणंदियसयलजणो पवरो पज्जुन्नसूरिवरो ॥
निविडमइमुणियदुग्गमकव्व जीवोव्व नायसत्थत्थो ।
मुद्धसूरियमेयमयणो सरिवरो माणदेवोत्ति ॥
उद्दामकित्तिसद्दो मणहरदेहो महामई कुसलो ।
दंसणमेत्ताणंदियजिणवयणपउट्ठलोगोवि ॥
पयडियवरसत्थत्थो वयणट्ठियसरसइ व्व पटुवयणो ।
सिरिदेवसूरिनामो समत्थलोगम्मि विक्काउ ॥
तह चेव तम्मि गच्छे उज्जोयणसूरिणो पवरसीसो ।
जाउ गुणरयणनिही उवज्झाउ अंबदेवोत्ति ॥

कोमुइमयंकमंडलसोमसरीरस्स संतचित्तस्स ।
वरमइणो धम्मसहोदरेण मुणिचंदसूरिस्स ॥
गणिणा देविंदेणं [1]सासावयवेण तस्स तणुमइणा ।
एसा कहिया २ अक्करबंधेण संखित्ता[2] ॥
आणंदियविउसासु अच्चासु कहासु विज्जमाणासु ।
एसा हासढाणं जाणंतेणेवि विउमाणं[3] ॥
कलहंसगमविलासेणं संवरं[4] नोहु घइवलिपुट्ठो ।
हासट्ठाणं जायइ जणंमि निस्संसयं जेण ॥
किं तु इह सुयणुरयणा हासो च्चियमवि हसंति न कयावि ।
अविय कुणंति महग्घं गुणाणसारोवणेणेत्थ[5] ॥
इइ भवति - - - - - - - - - - - - ।
एसा कहिया रइया तेण प्पणो णुसरणत्थं । ६१
तोणुग्गहं कुणंतो सुणंतु गिण्हंतु निग्गुणंपि इमं ।
सोहंतु दोसजालं दक्खिन्नमहोयही सुवणा ।
पज्जुन्नसूरिणो धम्मनच्चुएणं व्व सुवणुसारेण ।
गणिणा जसदेवेणं उद्धरिया पढमपई ॥ - - - -

ण्णनफलं समाप्तं रत्नचूडकहा ॥ ६१

वत् १२२१ ज्येष्ठसुदि ९ शुक्रदिने अद्येह श्रीमदणहिल-पाटके महाराजाधिराजजिनशासनप्रभावकपरमश्रावकश्रीकुमरपाल-देवराज्ये श्रीवड्डापल्यां च श्रीकुमरपालदेवप्रसादास्पदश्रीधारावर्ष-नरेंद्रराज्ये श्रीचक्रेश्वरसूरिश्रीपरमानंदसूरिप्रभूपदेशेन बड्डापल्लिपुरी-वास्तव्य श्रे० पूमाश्रावकेण आशाचंद्रआशाधरपोइणिछाहिणिराजूप्र-

[1] सीसा°? [2] संखित्ता? [3] विउसाणं? [4] संचरं? [5] गुणाणमारोवणेणेत्थ?

मुखमानुषमानुषसमेतेन[1] इदं ज्ञाताधर्मकथांगरत्नचूडकथापुस्तकं लेखितमिति ॥ शिवमस्तु०

श्रीचक्रेश्वरसूरिश्रीपरमानंदसूरिश्रीयशःप्रभसूरीणां - - - -

241. **Prasnavyakaranadisutratikah** [प्रश्नव्याकरणादिसूत्रटीकाः].

Injured. The folios are 32½ inches long, 2¼ inches broad.

242. **Sukritangasutra** with its **Niryukti** and a **Commentary** by SILÂCHÂRYA. [सुकृतांगसूत्रं निर्युक्तिटीका च । टी० शीलाचार्यः].

Folios 1 to 463 : 32½ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 122 to 132 aksharas in a line. Numbered as 183. Folio 463. R. स्तो ६ L. ४६३. The "granthâgra" is given as 13,000.

Ends :

समाप्ता चेयं सुकृतांगसूत्रस्य टीका कृता चेयं शीलाचार्येण वाहरिगणिसहायेन ॥

243. **Karmagrantha** by DEVENDRASURI with the **Commentary** of ŚRÎ MALAYAGIRI [कर्मग्रंथः सटीकः । देवेंद्रसूरिः].

Folios 1 to 271 : 32½ inches long, 2 inches broad. 6 to 10 lines in a folio. 112 to 163 aksharas in a line. Numbered as 183. Folio 119. R. स्तु ६ उ L. ११९. Folio 271. R. स्तु ६ उ L. २७१. The "granthâgra is given as 3880. Dated Samvat 1447 = A. D. 1391.

Begins :

आग्रयणीयपूर्वादुद्धृत्य परोपकारसारधिया ।
येनाभ्यधायि शतकः स जयतु शिवशर्मसूरिवरः ॥ २

अनुयोगधरान्सर्वान्धर्माचार्यान्मुनींस्तथा नत्वा ।
स्वोपज्ञशतकसूत्रं विवृणोमि यथाश्रुतं किंचित् ॥ ३

Ends:

इति श्रीमलयगिरिविरचिता सप्ततिटीका समाप्ता संवत् १४४७ वर्षे भट्टारकरदेवसुंदरसूर्युपदेशेन कर्मग्रंथवृत्तिपुस्तकं लेखयामास ॥

244. Upadesamala, with Commentary [उपदेशमाला सटीका].

Folios 1 to 53: 35½ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 140 to 151 aksharas in a line. Incomplete.

Text begins:

सिद्धमकम्मविग्गह

Commentary begins:

येन प्रबोधपरिनिर्मितवाग्गरत्राः...

245. Upadesamala with Commentary, by HEMACHANDRA [उपदेशमाला सटीका। हेमचन्द्रः].

Injured. About 150 folios: agreeing in all respects with No. 244.

246. Uttaradhyayana Sutra with the Commentary called Subodha of NEMICHANDRA [उत्तराध्ययनसूत्रं सटीकम्। नेमिचन्द्रः].

Folios 1 to 341: 34½ inches long, 2½ inches broad. 10 to 12 lines in a folio. 120 to 130 aksharas in a line.

Begins:

प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ।

Ends:

तस्य च मिथ्या दुःकृतमस्तु कृतमसंस्कृतं यदिह ॥

मंगलं महाश्रीः ॥

प्राग्वाटवंशोजनि मोहणाख्यः
श्रेष्ठी प्रिया तस्य सुहागदेवी ।
तयोः सुतो नागडनामकोभू-
त्तस्यापि भार्या सलषू प्रसिद्धा ॥ १
तयोस्तु नारायणनामधेयः
पुत्रोभवत्स्फूर्जितभागधेयः ।

चित्रं गुरुत्यागकृतादरोपि
यः सर्वदा धार्मिकलोकधुर्यः ॥ २
तस्याभूत्कंडुयाभिख्योनुजो धरणिगस्तथा ।
तयोः प्रियतमा लाषू जासलेति यथाक्रमं ॥ ३
नारायणस्य संजज्ञे हंसलेति सधर्मिणी ।
रत्नपालोभिधानेन पुत्रोभूत् हृदयप्रियः ॥ ४
जैनधर्मधुराधुर्यः श्रेष्ठी नारायणोन्यदा ।
श्रीमद्देवेंद्रसूरीणामिति वाक्यामृतं पपौ ॥ ५ ।
तथाहि ।
विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदभ्रारंभिणो भावनाः किं
तर्हि नियतमेकं दानमेवास्य धर्मः ॥ ६
तच्च द्विधा सर्वविदो वदंति
ज्ञानाभयोपग्रहदानभेदात् ।
तत्रापि विश्वैकविकासनेन
सद्ज्ञानदानं प्रवरं वदंति ॥ ७
कालादिदोषान्मतिमांद्यतश्च
तच्चाधुना पुस्तकमंतरेण ।
न शक्यते कर्तुमतोत्र युक्तं
भव्यस्यसत्पुस्तकलेखनं हि ॥ ८
एवं निशम्य सम्यक् श्रेष्ठी नारायणो विमलबुद्धिः ।
हृदममलमुत्तराध्ययनपुस्तकं लेखयामास ॥ ९
यावद्व्योमसरोवरे &c., ॥ ६२ ६२

247. Upasakadivipakantasutrapanchaka, with Commentary [उपासकादिविपाकान्तं सूत्रपञ्चकं सटीकम्].

Folios 1 to 308 (of which folios 1 to 112 contain the text of the five sûtras): 34½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 140 to 150 aksharas in a line. The "granthâgra" of the text is given as 1226. Numbered as 183. Folio 112. R. सू ल्ल २ L. ११२. Folio 308. R. सु ० ल्ली L. ३०८. Dated Samvat 1301 = A.D. 1245.

Ends:

कृतिरियं संविग्नमुनिजनप्रधानश्रीजिनेश्वराचार्यचरणकमलचंचरीककल्पस्य श्रीमदभयदेवाचार्यस्येति ग्रंथाग्रं ९८० संवत् १३०१ वर्षे फाल्गुणवदि १ शनौ अद्येह वीजापुरे पंचांगी सूत्रवृत्तिपुस्तकं ठ० अरसीहेण लिखितं ॥ उभय ११२८० ॥ संवत् १३०१ वर्षे फाल्गुणवदि १३ शनौ इहैव प्रल्हादनपुरे श्रीनागपुरीयश्रावकेण पोषधशालायां सिद्धांतशास्त्रं पूज्यश्रीदेवेंद्रसूरिश्रीविजयचंद्रसूरिउपाध्यायश्रीदेवभद्रगणेर्व्याख्यानतः संसारासारतां विचिंत्य सर्वज्ञोक्तशास्त्रं प्रमाणमिति मनसा विचिंत्य श्रीनागपूरीयवहुडियासंताने सा० आसदेवसुतसाहु नेमडसुतराहडजयदेव सा० सहदेवतत्पुत्र संघ० सा० षेढा संघ० सा. गोसल० राहडसुत सा० जिणचंद्रधरणसरलाहडदेवचंद्रप्रभृतीनां चतुर्विधसंघपठनार्थं वाचनार्थं आत्मश्रेयोर्थं पंचागीसूत्रवृत्तिपुस्तकं लिखापितमिति ॥ छ छ

248. Vritti on the **Jnatadharmakathanga**, by ABHAYADEVA [ज्ञाताधर्मकथांगस्य वृत्तिः। अभयदेवः.]

Folios 108 to 208: agreeing in all respects with No. 247. The "granthâgra" is given as 3800.

249. **Yogasastra** with **Commentary** by HEMACHANDRA [योगशास्त्रं सटीकम्-हेमचन्द्रः].

Folios 1 to 393 : 31½ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 110 to 120 aksharas in a line. Ordinary numerical characters on both sides.

Begins:

॥ अर्हं ॥

प्रणम्य सिद्धाद्भुतयोगगम्यं...

Ends:

तेन जिनबोधिलाभप्रणयी भव्यो जनो भवेत् ॥

इति परमार्हतश्रीकुमारपालभूपालशुभूषित आचार्यहेमचंद्रविरचिते अध्यात्मोपनिषन्नाम्नि संजातपट्टबंधे श्रीयोगशास्त्रे स्वोपज्ञं द्वादशप्रकाशविवरणं ॥ ग्रंथश्लोक १२००० संपूर्णं योगशास्त्रविवरणमिति ॥ मंगलं महाश्रीः ॥ छ

भृंगीणामिव पक्षपातललितैर्लीलागृहं सुश्रियां
सुच्छायो विततोतिविस्मयकरः श्रीमालवंशोस्त्यसौ ।
उद्यत्पर्वमनोहरक्षितिधरप्राप्तप्रतिष्ठोदये
यत्र च्छत्रपरंपरा ननु परा दृश्यन्त एवानिशं ॥ १

आसीद्वंशे वरगुणगणे तत्र मुक्तानुकारी
कांत्युल्लासैर्निरुपमतमः साधुवृत्तानुसारी ।
शुद्धध्यानोपचितसुतो देवपूजादिनिष्ठः
श्रेष्ठी श्रेष्ठः सुनयविनयैः सातदेवो गरिष्ठः ॥ २

पासिलाख्यः सुतस्तस्मादत्यद्भुतसुवैभवात् ।
सुमनोवर्गमुख्योभूज्जायंत इव वासवात् ॥ ३

अगण्यपुण्यलावण्या तस्य पूनाविनामिका ।
शीतेव रामचंद्रस्य जाता पत्नी पतिव्रता ॥ ४

तौ सर्वदेवसाभाख्यौ तत्कुलव्योममंडनं ।
जज्ञाते ज्ञातमाहात्म्यौ चंद्रार्काविव विश्रुतौ ॥ ५
एतयोः सोहिणिर्भभ्री भग्नकंदर्पशासना ।
जिनशासनधरा जज्ञे सद्ज्ञानांभोजदीर्घिका ॥ ६
श्रेष्ठिनः सर्वदेवस्य पार्श्वनागः सुतोजनि ।
लक्ष्मीकुक्षिभवा शांता तस्य स्वामिणिरात्मजा ॥ ७
जाते सधर्मचारिण्यौ धर्मकर्मातिकर्मठे ।
साभाकस्य सदा भक्ते वीरीवयजसंज्ञिते ॥ ८
वीरीकायाः सुते जाते जातिश्लाघ्योपमान्विते ।
शीताजस्यौ[1] जिनाधीशधर्माराधनतत्परे ॥ ९
सत्पुत्रस्तत्र शीताया आसदेवाभिधोऽभवत् ।
ततो भूतौ सुतावाभूशोभनदेवनामकौ ॥ १०
अभूतां नंदनौ जास्यास्तुबूटडियशोधरौ ।
जिंदायर्शकुमाराख्यौ बभूवतुस्तयोः सुतौ ॥ ११
वयजाख्यातु तत्पत्नी पंचास्तत्सुतोत्तमात्[2] ।
कुंतीव पांडवान् पांडुयशःशुभ्रितभूतलान् ॥ १२
तेषामाम्रप्रसादाख्य आद्यो देवधरस्ततः ।
रामदेवस्ततश्चांडूयशोधवलसंज्ञितौ ॥ १३
पंचाप्यद्भुतधर्मकर्मनिरताः पंचापि पुण्यांचिताः
पंचाप्युग्रभवप्रपंचविमुखाः पंचापि सत्यप्रियाः ।
एते पंचमहाव्रतैकरुचयः पंचापि शुद्धाशयाः
प्रापुः पंचजनौघमौलितिलका पंचापि कीर्त्तिं परां ॥ १४

---

[1] शीताजास्यो ? [2] पंचासूत सुतोत्तमान् ?

अभूदाम्रप्रसादस्य सज्जनी वरगेहिनी ।
ज्ञानविज्ञानयोः पात्रं तनूजः सोहडस्तयोः ॥ १५
जाया देवधरस्यासीच्छ्रेष्ठिनः श्रेष्ठतानिधेः ।
सांतूकायाः सुता माहूः शम्मकैरवकौमुदी ॥ १६
आभडो नरसिंहश्च जज्ञिरे सूनवस्तयोः ।
जगद्देवाख्यलाखाकचाहडाः श्रुतशालिनः ॥ १७
आद्या प्रियमतिनामा संजाता तदनु कुमरदेवीति ।
लघ्वी त्वविहवदेवी वधूटिका तस्य विनययुता ॥ १८
भार्याभूद्रामदेवस्य पदमी नंदनास्त्वमी ।
शंबो वयरसिंहश्च पुण्यश्च जयतूः सुता ॥ १९

अन्यच्च ।

येन जिग्ये जगद्देवगुरुभक्त्याऽखिलं भृशं ।
जगद्देवस्य तस्यासीद्दैवाग्लानिकारणं[1] ॥ २०

इतश्चतुर्भिःसंबंधः ।

ज्ञात्वा येन लघीयसापि सहसा स्वस्यांतकालं क्षणा-
दानाय्य व्रतिनः स्वयं तदखिलं कृत्वांत्यकृत्यं स्फुटं ।
त्यक्त्वा स्नेहमशेषमात्मवदनेनोच्चार्य धर्मव्ययं
जिग्ये मोहमहामहीपतिरतिप्राज्यप्रभावोप्यसौ ॥ २१
आबाल्यादपि येन पूर्वविधिना भक्त्यार्चितः श्रीजिन-
स्तात्पर्यादतिसेवितः[2] सुगुरवोभ्यस्तं च शास्त्रं परं ।
आत्मीयैर्विनयादिभिर्वरगुणैराचंद्रकालं कलौ
चंद्रांशुज्ज्वलकांतकीर्त्तिरतला स्वल्पैर्दिनैरर्जिता ॥ २२

श्रीयोगशास्त्रवृत्तेर्हेवधरेणात्मपुत्रसहितेन ।
निस्संगचित्तमुनिवत्सावद्यारंभरहितेन ॥ २३

साधुजनजनिततोषं निर्दोषं पुस्तकप्रवरमेतत् ।
तस्यात्मसुतस्य जगद्देवस्य श्रेयसेऽलेखि ॥ २४

यद्दोषैरकलंकितं गुणगणैर्युक्तं मनोहारिभि-
र्नित्याभ्यासवसेन निर्वृतिकरं दिव्योक्तसाधुक्रियं ।
श्रीभूपालकुमारपालसहितं श्रीहेमचंद्रप्रभोः
कर्मव्याधिविबाधकं विजयतां तद्योगशास्त्रं सदा ॥ २५

सूर्याचंद्रमसोर्यावद्द्योतयंति भुवं रुचः ।
अभ्रांतं पुस्तकं तावत्कोविदैर्वाच्यतामिदं ॥ २६

स्वस्ति श्रीविक्रमनृपतेः संवत् १२९१ वर्षे कार्तिकसुदि १२ शुक्रे रेवतीनक्षत्रे सिद्धयोगे महाराजश्रीभीमदेवविजयराज्ये अवनिवनिता-प्रशस्तकस्तूरिकातिलकायमानलाटदेशालंकारिणि सकलजनमनोहा-रिणि विविधधार्मिकविराजमानदर्भवतीस्थाने श्रीमालवंशीयश्रे० सभानंदनेन जगदानंदनेन निर्मलतमसम्यक्त्वधरेण श्रे० देवधरेण सक-लधर्मकर्मावहितेन ठ० आभडनरसिंहादिसुतसहितेन निजपुत्रजगदेव-श्रेयोनिमित्तं श्रीवटपद्रकपुरप्रसिद्धप्रबुद्ध पं० केशवसुत पं० वोस-रिहस्तेनाशेषविशेषज्ञानवतश्चमत्कारीदमप्रतिमप्रतापश्रीजिनशासनप्र-भावकश्रीकुमारपालभूपालविधायितस्य श्रीहेमचंद्रसूरिरचितस्य श्री-योगशास्त्रस्य वृत्तिपुस्तकं लिखितमिति ॥ मंगलं महाश्रीः । शुभं भवतु लेखकपाठकवाचकानामिति ॥ छ

250. **Uttaradhyayanasutra** with the **Commentary** of NEMICHANDRASŪRI [उत्तराध्ययनसूत्रं सटीकम् । टी० नेमिचन्द्रसूरिः].

Folios 1 to 477: 34½ inches long, 2 inches broad. 6 to 10 lines in

a folio. 110 to 115 aksharas in a line. Numbered as 183. Folio 476. R. स्तो ७ ६ L. ४७६. Dated Samvat 1296 = A.D. 1240.

251. Akhyanamanikosa by AMRADEVASÛRI, with the **Commentary** of NEMICHANDRASÛRI [आख्यानमणिकोशः सटीकः। मू० नेमिचन्द्रसूरिः। टी० आम्रदेवसूरिः].

Folios 1 to 482 : 34 inches long, 2¼ inches broad. 8 to 12 lines in a folio. 105 to 116 aksharas in a line. Numbered as 183. Folio 482. R. स्तो ७ २ L. ४८२.

Commentary begins :

९० ॥ नमः सर्वज्ञाय ॥

स्वर्त्रार्थभीतघनभूवरसेव्यमूर्त्ति-
र्लावण्यधाम बहुवीवरलब्धमध्यः ।
आख्यानकाख्यमणिकोशमहार्थरूपो
जीयाद्युगादिजिननायकनीरनाथः ॥ १

t begins :

नमिऊण जिणं वीरं सुरमहियं केवलपवरवाणिं ।
अक्खाणयमणिकोसं भव्वजणविबोहयं वोच्छं ॥ १

Book ends :

इति श्रीमदाम्रदेवसूरिविरचितवृत्तावाख्यानकमणिकोशे विवेकिजनस्वकृतकर्मोदयोपनतदुःखादिसहनो नाम एकचत्वारिंशोधिकारः समाप्त इति ॥ इदानीं शास्त्रकारः शास्त्रवक्तव्यतामुपसंहरन् शास्त्रगतपठनादिफलं च दिदर्शयिषुरिदमाह ॥

अक्खाणयमणिकोशं एयं जो पढइ कुणइ जहजोगं ।
देविंदसाधुमहियं अइरा सो लहइ अपवग्गं ।
व्याख्या आख्यानकमणिकोशं...

देवेंद्रिरिति[1] साध्ववस्थायां निजनामविशेषणं मध्ये विरचितमिति कृतिरियं सैद्धांतिकशिरोमणिश्रीमन्नेमिचंद्रसूरेरिति आख्यानमणि कोशवृत्तिः समाप्ता ॥

वृत्तिं विधाय यदिमां महतीं मयाप्तं
पुण्यं पवित्रितजगत्त्रयचित्तवृत्ति ।
तेनाशु भव्यनिवहो लभतां भवाब्धौ
सद्यानपात्रमिव बंधुरबोधिबीजं ॥

ज्ञानादिरत्नवसतिर्जनमान्यलक्ष्मी-
र्जन्माभ्यभूमिरभितो बहुसत्त्वसेव्यः ।
निर्द्धौतकर्ममलनिर्मलधर्मनीरः
क्षोणीभृदाश्रितगरित्वगभीरमध्यः ॥ १

अच्युतप्रवणो वासो मर्यादानतिवर्त्तकः ।
अस्ति स्वच्छो वृहद्गच्छः श्रीमान्नाथ इवांभसां ॥ २

इति नीरधितुल्यगुणे दयासुधापास्तजन्मरुद्भरुणो[2] ।
क्वचिदतिशायिनि समये शिस्ता[3] निशमयत यज्ज्ञातं ॥ ३

मुनिविबुधवृतजिनमतमंदरमथिमथ्यमानतन्मध्यात् ।
स्फूर्जन्महाप्रभावः प्रादुरभूद्रम्यरत्नचयः ॥ ४ ॥

तथाहि ।

श्रीदेवसूरिः सुमनःसमृद्धः
समुल्लसत्सत्फलपत्रशाखः ।
कुतोप्यथो आविरभूदमुष्मा-
त्सुरावगीतोपथि परिजातः ॥ ५

---

[1] देवेंद्र इति ? [2] °जन्मरुग्मरणे ? [3] शिष्टा ?

अनेकविकृतिक्रियाकुटिलकर्मभूपामया-
पहारकरणक्षमः श्रुतिविचारदक्षः शुचिः ।
प्रवृद्धकरुणामृतस्समुदपादि धन्वंतरिः
श्रियां पदमनागसामजितसूरिरर्यः सतां ॥ ६

रुचिरचरणयोगाद्वर्यरैरावतोभू-
दनुपममदवारिप्रोल्लसत्कीर्त्तिघंटः ।
प्रकटितसकलागो मोहसैन्याप्रवृद्ध्यै
विबुधपतिनिषेव्यः श्रीमदानंदसूरिः ॥ ७

समुच्चत्याधारः स्वरगलसल्लक्षणधरः[1]
[2]श्रुतिश्रेयानंशिर्ह्रवदपरचिह्नानि नितरां ।
विनिर्यत्सद्धेतौ [3]सुविषमनद्धावादिसमरे
स्फुरत्तेजोदृप्यत्तरलभवनोइश्व[4] निरगात् ॥ ८

नेमिचंद्रसूरिर्यः कर्त्ता प्रस्तुतप्रकरणस्य ।
सर्वज्ञागमपरमार्थवेदिनामग्रणीः कृतिनां ॥ ९

अन्यां च सुखावगमां यः कृतवानुत्तराध्ययनवृत्तिं ।
लघुवीरचरितमथ रत्नचूडचरितं चतुरमतिः ॥ १०

[5]स्वपांडित्यमंडलीकुमुदिनीकांताप्रमोदावहः
सर्वज्ञागमदेशनामृतकरैर्निर्वापयन्मेदिनीं ।
भास्वत्सन्मुनितारकेषु नियतं यन्नायकत्वं दध-
त्स श्रीमानुदियाज[6] यो निजकुलव्योमांगणालंकृतिः ॥ ११

सूरिः श्रीजिनचंद्रश्चंद्रो निःशेषजनमनोदयितः ।
सौम्यत्वकलाविद्यत्वप्रभृतिगुणानां स्वकुलभवनं ॥ १२
तच्छिष्यः प्रथमपदे [1]श्रीपटवानाम्रदेवसूरिरभूत् ।
अपरोपि तत्कनिष्ठः श्रीमान् श्रीचंद्रसूरिरभूत् ॥ १३

इतश्च ।

यो मेदपाटाध्युषितोपि धीमान्
दयाघनो धार्मिकमध्यवर्त्ती ।
तत्साधुताधर्मकृताभिलाषः
सुश्रावकत्वं परिपाति सम्यक् ॥ १४

The page containing the next nine verses is much damaged and in parts wholly illegible. The verses refer to a visit to Abu.

श्रीपदसंगतनाम्ना श्रीमज्जिनचंद्रसूरिशिष्येण ।
रचिताम्रदेवमुनिपेन वृत्तिरेषा स्वबोधेन ॥ २४

व्याख्याप्रज्ञप्ताविव लब्धवरायामिहापि सद्वृत्तौ ।
श्रुतिसुखदवर्णरुचिरा विचित्रगमभंगरमणीयाः ॥ २५

सुव्यक्तमेकचत्वारिंशदनूना भवेयुरधिकाराः ।
तत्र [2]सतानीचविचारश्रुता अग्र्यवृत्ताश्च ॥ २६

सत्स्वपि नानारूपेषु पूर्वकविभिर्विशिष्टमतिविभवैः ।
रचितेषु शास्त्रविवरणकथाप्रबंधेषु सरसेषु ॥ २७

कीदृगिदं मत्काव्यं तदपि ग्राह्यं कृतप्रचुरकरणैः[3] ।
मयि वल्लभमाध्यस्थ्ये माध्यस्थ्यगुणान्वितैः सद्भिः ॥ २८

---

[1] श्रीपद°? [2] सतामनीच° ? [3] कृतप्रचुरकरुणैः ?

छंदोलक्षणविकलं समयोत्तीर्णं च यत्किमपि लिखितं ।
तच्छोध्यं विद्वद्भिः कृतांजलिः प्रार्थये भवतः ॥ २९

अन्यच्च ।

नेमिचंद्रो गुणाकरः[1] पार्श्वदेवनामानः ।
एते त्रयोपि गणयो विपश्चितो मुख्यजिनशिष्याः ॥ ३०
साहाय्यं कृतवंतो मम लेखने शोधनादिकृत्येषु ।
आधानोद्धरणे च प्रमादविकलाः कलाकुशलाः ॥ ३१

नवत्या युक्तेषु प्रथितयशसो विक्रमनृपा-
च्छतेषु क्रांतेषु त्रिनयनसमानेषु शरदां ।
अजय्ये सौराज्ये जयति जयसिंहस्य नृपते-
रियं स्थानीयेगाद्धवलकपुरे सिद्धिपदवीं ॥ ३२

श्रेष्ठियशोनागस्यारब्धा वसतावेव स्थितैः सद्भिः ।
वसतां सम्यगवसिता वसतावच्छुभ्रसत्कायां ॥ ३३
भुवनानीव चतुर्दश धातुर्मम[2]रस्य वर्णपदभाजि ।
अक्षरगणनाद्गाथाजातानुष्टुप्सहस्राणि ॥ ३४
मानसगर्भे स्थितो लक्षणयुगयं सपादनवमासैः ।
आख्यानकमणिकोशः श्रुतमव[3] समपादि सद्वृत्ति[4] ॥ ३५
यावच्चं ॥ ३७ ॥

इति श्रीमदाम्रदेवसूरिविरचितवृत्तावाख्यानकमणिकोशवृत्तिः समाप्तेति ॥

प्राग्वाटवंशतिलको... १४ ॥ मगलं महाश्रीः ॥

252. Tattvarthatika by SIDDHASENAGAṆI [तत्त्वार्थटीका । सिद्धसेनगणिः].

Folios 1 to 380 : 26½ inches long, 2 inches broad. 12 to 16 lines in a folio. 140 to 150 aksharas in a line. Numbered as 183. Folio 61. R. ई L. ६१. Folio 107. R. सु ० मा L. १०७. Folio 339. R. स्ता ला ई L. ३३९. Folio 343. R. स्ता सू ३ L. ३४३. Folio 349. R. स्ता सू ई L. ३४९.

Begins :

॥ ॐ नमः सिद्धेभ्यः ॥

वीरं प्रणम्य सर्वज्ञं तत्त्वार्थस्य विधीयते ।
टीका संक्षेपतः स्पष्टा मंदबुद्धिविबोधिनी ॥ १

सम्यगर्हत्प्रवचनमधिगम्य कालसंहननश्रद्धामुरादेः[1] परिहाणिमवलोक्य सत्त्वानुकंपया समासतो मोक्षमार्गमुपदेष्टुकाम आचार्य इदमाह ॥

सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेव चाप्नोति ।

अत्र सम्यग्दर्शनशुद्धमिति कतरो विग्रह आस्थीयते यदि तावत्सम्यग्दर्शनेन शुद्धमिति करोति करणे तृतीया परश्वादीनामिव प्राङ्निवृत्तिर्वक्तव्या उत कर्त्तरि तदा दर्शनज्ञानयोरभेदात्मनो य आप्नोतीत्ययुक्तं . . .

Folio 61 :

इति भाष्यानुसारिण्यां तत्त्वार्थटीकायां प्रथमोध्यायः समाप्तः ॥

Folio 107 :

भाष्यानुसारिण्यां तत्त्वार्थटीकायां द्वितीयोध्यायः ॥

---

[1] °श्रद्धासुरादेः ?

Folio 339:

संप्रति वाचको निजाचार्यान्वयं द्विप्रकारमप्यावेदयते । तत्रायं प्रव्राजकान्वयः । शिवश्रीर्नाम वाचकः पितामहः संग्रहकारस्य । तस्य शिष्योप्येष नंदिक्षमणस्तस्यायं संग्रहकारकः शिष्यः । संप्रति वाचनाचार्यान्वयो मुंडपादो नाम महावाचकक्षमणः सोस्य पितामहः संग्रहकारस्य । तस्य शिष्यो मूलनामा वाचकस्तस्यायं संग्रहकारकः शिष्यः । संप्रत्यात्मीयजन्मान्वयस्थानमाचष्टे । न्यग्रोधिका नाम ग्रामस्तत्र जातेन पाटलिपुत्रे कुसुमपुरनाम्नि विरहता कौभीषणिनेति गोत्राव्हानं स्वातितनयेनेति पितुराख्यानं चाप्सीसुतेनेति गोत्रेण नाम्ना उमेति मातुराख्यानं संप्रदायाविच्छेदेनायातमर्हद्वचनं सम्यगवधार्य शारीरैर्मानसैश्च दुःखैरार्त्तं दुरागमैरैहिकसुखोपदेशप्रायैस्वयैः प्रभूतिभिः प्रमाणविघट्टनायामक्षमैर्विहतमुपहतविज्ञानमवलोक्य लोकमुच्चैर्नागरवाचकेनेति स्वशाखासूचकं तत्त्वार्थाधिगमाख्यं शास्त्रं भव्यसत्त्वानुकंपया विरचितं स्फुटार्थमुमास्वातिनेति । तदेतच्छास्त्रं जीवादितत्त्वाधिगमार्थं यो बभोत्स्यते सूत्रतोर्थतश्चानुष्ठास्यति तत्रोक्तं सोव्याबाधसुखलक्षणमनंतमनुपमं परमार्थं मोक्षमचिरेण प्राप्स्यतीति ॥

आसीद्दिनगणी क्षमाश्रमणतां प्रापत्क्रमेणैव यो
विद्वत्सु प्रतिभागुणेन जयिना प्रख्यातकीर्त्तिर्भृशं ।
वोढा शीलभरस्य सच्छ्रुतनिधिर्मोक्षार्थिनामग्रणी-
र्जज्वालामलमुच्चकैर्निजतपस्तेजोभिरव्याहतं ॥ १

यत्र स्थितं प्रवचनं पुस्तकनिरपेक्षमक्षतं विमलं ।
शिष्यगणसंप्रदेयं जिनेंद्रवक्त्राद्विनिष्क्रांतं ॥ २

तस्याभूत्परवादिनिर्जयपटुः सैंहीं दधच्छूरतां
नाम्ना व्यज्यत सिंहसूर इति च ज्ञाताखिलार्थागमः ।

शिष्यः शिष्टजनप्रियः प्रियहितव्याहारचेष्टाश्रया-
द्भव्यानां शरणं भवौघपतनक्लेशार्दितानां भुवि ॥ ३

निर्द्धूततमःसंहतिरखंडमंडलशशांकसच्छाया ।
अद्यापि यस्य कीर्त्तिर्भ्रमति दिगंतानविश्रांता ॥ ४

शिष्यस्तस्य बभूव राजतशिरोरत्नप्रभाजालक-
व्यासंगच्छुरितस्फुरन्नखमणिप्रोद्भासिपादद्वयः ।
भास्वामीति विजित्य मामजगृहे यस्तेजसां संपदा
भास्वंतं भवनिर्जयोद्यतमतिर्विद्वज्जनाग्रेसरः ॥ ५

क्षमया युक्तोतुलया समस्तशास्त्रार्थविन्महाश्रमणः ।
गच्छाधिपगुणयोगाद्गणाधिपत्यं चकारार्थं ॥ ६

तत्पादरजोऽवयवः स्वल्पागमशेमुषीकबहुजाद्यः ।
तत्त्वार्थशास्त्रटीकामिमां व्यधात्सिद्धसेनगणिः ॥ ७

अष्टादशसहस्राणि द्वे शते च तथापरे ।
अशीतिरधिका द्वाभ्यां टीकायाः - - संग्रहः ॥ ८

ग्रंथाग्रं १८२८२ तत्त्वार्थटीका समाप्ता ॥

Then begins the Mûlasûtra :

ॐ० सिद्धिः ॥ ॐ नमो वीतरागाय ॥

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृतां ।
ज्ञातारं विश्वतत्त्वानां वंदे तद्गुणलब्धये ॥ १

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १

तत्त्वार्थश्रद्धानं सम्यग्दर्शनं ॥ २

तन्निसर्गादधिगमाद्वा ॥ ३

जीवाजीवाश्रवबंधसंवरनिर्जरामोक्षास्तत्त्वं ॥ ४

नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ ५ ...

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे प्रथमोध्यायः ॥

Mûlasûtra ends folio 343:

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे दशमोध्यः ॥

Then begins the Mûlasûtrabhâshya:

॥ ६० ॥ ॐ नमः सिद्धेभ्यः ॥

सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेव चाप्नोति ।

दुःखनिमित्तमपीदं तेन सुलब्धं भवति जन्म ॥ १ ॥...

Folio 349:

तत्त्वार्थाधिगमे भाष्यतः प्रथमोध्यायः समाप्तः ॥

Ends:

तत्त्वार्थाधिगमे जिनप्रवचनसंग्रहे भाष्यतः दशमोध्यायः समाप्तः॥ संवत् १४४९ वर्षे आश्विनशुदि ४ गुरौ अद्येह स्तंभतीर्थे - - - - - - - - - -

253. **Commentary,** called **Subodha** on the **Uttaradhyayana** by NEMICHANDRA [उत्तराध्ययनस्य टीका].

Folios 1 to 413; 33 inches long, 2¼ inches broad. 8 to 12 lines in a folio. 120 to 135 aksharas in a line. Numbered as 183. Folio 413. R. स्तो ल्हे ३ L. ४१३. Dated Samvat 1380 = A.D. 1324.

Begins:

॥ ॐ नमो जिनशासनाय ॥

प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ॥...

Ends:

इत्येवमादिसकलं साढाकस्य कुटुंबकम् ॥ २७ ।

इतश्च ।

श्रीमान्सत्त्वगृहं गभीरिमनिधिर्निःशेषभूभूषणै-
र्व्याकीर्णः शुचिसाधुरत्ननिकरैः पाठीनपीठान्वितः ।
संसेव्यः सुमनोभिरक्षयगुणज्ञानामृतोत्कंठितै-
र्नैद्याद्दूरमपारसंवरवरः श्रीचंद्रगच्छार्णवः ॥ १ ॥

आद्यः श्रीनन्नसूरिः समजनि जनिताशेषदोषप्रमोषः
सद्वादींद्रैरजय्यो गुरुरमितयशोवादिसूरिस्ततश्च ।
सूरिः श्रीसर्वदेवस्तदनु समभवद्वादिवृंदैकवंद्यः
श्रीमान्प्रद्युम्नसूरिः सकलकलिमलक्षालने वारिपूरः ॥ २

इत्येवमादिप्रमुखेषु सूरि-
वर्येषु गच्छत्सु कथावशेषं ।
भद्रेश्वरः सूरिरजायतास्मि-
न्मुनीश्वरस्तारितभव्यलोकः ॥ ३

तच्छिष्योप्यथ चंद्रगच्छतिलकः श्रीदेवभद्राभिधः
सूरिर्भूरिगुणालयः सुविहितश्रेणीधुरीणोभवत् ।
अक्लेशेन बभार मारविजयी श्रामण्यभारं पृथग्
भागीकृत्य सुदुर्वहं स्ववपुषा सैकादशांगेन यः ॥ ४

श्रीसिद्धसेनसूरिस्तत्पट्टविशेषको जयति यस्य ।
कलिकोपमानसहिता दशनावलिरेव न तपःश्रीः ॥ ५

जिग्ये देवगुरुर्येन विद्यया निरवद्यया ।
आचार्यवर्यः समभूद्यशोदेवगुरुस्ततः ॥ ६

अदृष्टदोषस्तमसां निहंता
भरविंदप्रबोधहेतुः[1] ।

ततो विवस्वानिव मानदेवः
सूरिर्यशःपूरितदिग्वितानः ॥ ७ ॥
ततोभूच्चारुचारित्रचर्यामर्यादयांबुधिः ।
श्रीमद्रत्नप्रभाचार्यो धुर्यो माधुर्यशालिनां ॥ ८
तत्पादांभोजभृंगः प्रवरगुणयुतः सर्वसिद्धांतवेत्ता
ज्ञानादिश्रीनिवासः स्मरकरिदमने सिंहपोतः सतेजाः ।
मायाद्यैर्दोषजालैः प्रवरहितवपुः शर्करामिष्टवाक्य-
न्यासः श्रेयः शिवश्रीं दिशतु भुवि सदा सूरिदेवप्रभोथ ॥९
व्याख्यास्यतस्तस्य गुरोर्मुखाब्जा-
द्येनागमं संसदि साधुवृत्तः ।
कुटुंबयुक्तः कटुको महात्मा
शुश्राव सिद्धांतरहस्यमेतत् ॥ १०
चक्रे मुक्तिवधूः स्वहस्तकलिता त्रैलोक्यलक्ष्मीरपि
स्वायत्ता विदधे च दुर्गतिगतिस्तेनैव रुद्धात्मनः ।
येन स्वं भुजपंजरार्जितमिदं वित्तं गुरोराज्ञया
सिद्धांताद्भुतपुस्तकस्य लिखने साफल्यमारोपितं ॥ ११
इत्याकर्ण्य वचःसुधाकवलितं वक्त्रांबुजात्सद्गुरोः
साधुः साधितमुक्तिमार्गमतिकः सद्भावनाभावितः ।
वर्षे सिद्धिवियत्कृशानुविधुभिः संख्याकृते श्रेयसे
पित्रोः सुंदरमुत्तराध्ययनकं ग्रंथं मुदालीलिखत् ॥ १२
न केवलं पुस्तकमेकमेव
विलेखयामास गुरोर्भणित्या ।
निवेशयामास गुरोः पदे च
रत्नाकरं सूरिवरं गुरुं यः ॥ १३

नक्षत्राक्षतपूरितं . . .

मंगलमस्तु ॥ प्रशस्तिरियं कृता लिखिता च श्रीरत्नाकरसूरिभिः ।

मंगलमस्तु श्रीश्रमणसंघस्य ॥

254. Upadesamala with **Commentary**, by HEMACHANDRA [उपदेशमाला सटीका । हेमचंद्रः].

Folios 1 to 413 : 32½ inches long, 2 inches broad. 6 to 10 lines in a folio. 120 to 130 aksharas in a line.

Commentary begins :

ॐ नमो जिनाय ॥

येन प्रबोधवरनिर्मितवाग्वरत्रा . . .

Text begins :

सिद्धमकम्ममविग्गह . . .

255. Acharangasutra with its **Niryukti** [आचारांगसूत्रस्य निर्युक्तिश्च].

Folios 1 to 92 : 33½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 130 aksharas in a line. The "granthâgra" is given as 2644. Numbered as 183. Folio 80. R. ४९ L. ८०. Folio 92 R. ९३ L. ९२.

Niryukti begins :

वंदित्तु सव्वसिद्धे जिणे य अणुउरादायएसव्वे ।

आयारस्स भगवउ निजुत्तिं कित्तइस्सामि ॥ १

आयारस्स भगवउ चउत्थमूला एस निजुत्ती ।

Niryukti ends :

पंचमचूलनिसीहं तस्स य उवरिं भणीहामि ॥३६३॥ गाथा ॥

आयारंगनिज्जुत्ती समत्ता ॥ शुभं भवतु ॥

256. Commentary on the **Acharangasutra** by ŚILÂNGASÛRI [आचारांगसूत्रस्य टीका । शीलांगसूरि.].

Folios 1 to 369 : agreeing in all respects with 255. Folio 369. R. स्ता ९ मं L. ३६९.

Ends:

१२००० शकनृपकालातीतसंवत्सरशतेषु सप्तसु चतुरशीत्यधिकेषु वैशाखपंचम्यां आचारटीका दृब्धेति ॥

शीलाचार्येण कृतांगनूतायां[1] स्थितेन टीकैषा ।
सम्यगुपयुज्य शोध्या मात्सर्यविनाकृतैरार्यैः ॥२॥ इति भद्रं ॥

संवत् १३२७ वर्षे पौषशुदि १० भौमे आचारांगपुस्तकं ठ०विक्रमसिंहेन लिखितमिदमिति ॥ ॥ मंगलमस्तु ॥

257. Amamasvamicharitra by MUNIRATNASÛRI [अममस्वामिचरित्रम् । मुनिरत्नसूरिः].

Folios 1 to 282: $30\frac{1}{4}$ inches long, $2\frac{1}{4}$ inches broad. 10 to 12 lines in a folio. 115 to 128 aksharas in a line. Numbered as 183. Folio 282. R. $\frac{\text{सू}}{\text{७}\ \text{२}}$ L. २८२.

Begins:

॥ ८० ॥ अर्हं ॥

भव्यांबुजन्मनां गोभिर्बोधलक्ष्मीप्रदाः सदा ।
सर्वक्षेत्रेषु युगपज्जिनादित्याः पुनंतु वः ॥ १...

स्तौमि श्रीगौतमादींस्तानेकादशमहाकवीन् ।
यैरपूरि द्वादशांगैः समस्या त्रिपदी गुरोः ॥ १३

शय्यंभवोस्तु वो भूत्यै चक्रे सर्वांगमूर्त्तिभृत् ।
येनादुःप्रसभाचार्यकालिकं दशकालिकं ॥ १४

श्रीभद्रबाहुर्वः प्रीत्यै सूरिः शौरिरिवास्तु सः ।
यस्माद्दशानां जन्मासीच्चिर्युक्तीनामृचामिव ॥ १५

वाक्यैर्विशेषातिशयैर्विश्वसंदेहहारिभिः ।
जिनमुद्रं जिनभद्रं किं क्षमाश्रमणं स्तुवे ॥ १६

उमास्वातेर्वाचकस्य वाचः कस्य न चेतसि ।
ध्वनंत्यद्यापि घंटावत्तारटंकारसुंदराः ॥ १७

उदितोर्हन्मतव्योम्नि सिद्धसेनदिवाकरः ।
चित्रं गोभिः क्षितौ जह्रे कविराजबुधप्रभाः ॥ १८

स्तौमि श्रीहरिभद्रं तं येनार्हद्गीर्महत्तरा ।
चतुर्दशप्रकरणशत्यागोप्यत मातृवत् ॥ १९

व्योम्नश्च भद्रकीर्त्तेश्च प्रेंखत्तारागणस्य कः ।
बहुधामराजमित्रराद्धस्यावैतु वैभवं ॥ २०

अद्याप्युपमितिग्रंथच्छलाद्यज्जयडिंडिमः ।
विश्वे धुनत्यसौ जीयात्सिद्धर्षिः कविकुंजरः ॥ २१

पालित्तसूरिः स श्रीमानपूर्वः श्रुतसागरः ।
यस्मात्तरंगवत्याख्यं कथाश्रोतो विनिर्ययौ ॥ २२

मानतुंगदेवभद्रसूरी स्तुत्यौ मरालवत् ।
ऊषतुर्मानसे यौ श्रीशातवाहनभोजयोः ॥ २३

गुरुर्गुर्जरराजस्य चातुर्विद्यैकसृष्टिकृत् ।
त्रिषष्टिनरसद्वृत्तकविर्वाचां न गोचरः ॥ २४

गोभिर्दर्शनशुद्धिं यः कषायस्वादुभिर्व्यधात् ।
सोपूर्वाभ्युदयः श्रीमान्नंद्याचंद्रप्रभः प्रभुः ॥ २५

चैत्रवद्धनपालो न कस्य राजप्रियः प्रियः ।
सकर्णाभरणं यस्माज्ज्ञे तिलकमंजरी ॥ २६

जयंतु सूरयोन्येपि येषां वाग्ब्रह्मवैभवं ।
ग्रंथसृष्टौ महाकाव्यसर्गेषु च नवं नवं ॥ २७
वंद्यास्ते रामवत्संतो यैर्व्यस्तखरदूषणैः ।
क्रियते विबुधैः सेव्यो निष्कलंकाकृतिः कविः ॥ २८
नरोत्तमः स वैकुंठः पुरारातिश्च शंकरः ।
धाता पद्मासनस्तत्स्यात्समानः केन सज्जनः ॥ २९
वृत्तरम्येण पीयूषवर्षिणा सत्कलावता ।
नेंदुनापि समः साधुः कालकूलसजन्मना ॥ ३०
अनेकपस्य भद्रस्य गर्जतश्च स्थिरैः पदैः ।
साधोः कुर्यात्सुवंशस्य किं श्वेव पिशुनो भषन् ॥ ३१
कवेर्यशःशरीरे यः काव्ये दोषं कुदृष्टिजं ।
हंति स्यादहितः क्षुद्रः स मषीबिंदुवत्कथं ॥ ३२
परस्यासाधुशब्दं यो द्विधादाय निजं पुनः ।
साधुशब्दं द्विधादत्ते स दुर्वाच्यः कथं जनः ॥ ३३
विदुषां सत्कविग्राममार्गे प्रस्थितिकारिणां ।
कुर्वन्त्यामः स्वरैरर्थलाभं शस्यः खरः खलः ॥ ३४
रसोचितपदन्यासे प्रबंधे खलखेलितं ।
व्यर्थं वश्यात्मनीव स्यात्कामिनीकिलिकिंचितं ॥ ३५
सुकुमारपदा स्फारवृत्ता विजयतां परं ।
रीतिः कवीनी[1] वैदर्भी न लसद्विग्रहाश्रया[2] ॥ ३६
शुक्लपक्ष इवारोहत्सुधाकरकलः शुभैः ।
सत्कविः स्यात्तदन्यस्तु कृष्णपक्ष इवाशुभैः ॥ ३७

शुद्धा कर्पूरवत्सद्भिरंतर्भावेन गृह्यते ।
मृगनाभिरिवाशुद्धालीकेन तु कवेः कृतिः ॥ ३८
प्रतिमेव नवा कृष्णिः प्रतिष्ठामेति सूरिभिः ।
विज्ञैस्तेजःपुनर्भावव्यंजितां रंगनायकैः ॥ ३९
शुद्धा प्रबुद्धा सामोदा नंदतात्सुमनस्तुतिः ।
या सभाभूषणं मालावृत्तिश्चित्रं तु संमुखी ॥ ४०
रसं विपच्य रुच्यं ये वाक्ये भूते च तन्वते ।
प्रवर्द्धतां चिरं श्रोतृजना ग्रीष्मदिनाश्च ते ॥ ४१
सभामलंकरोत्येकश्चिद्रूपो लक्षितः[1] परैः ।
अंतरात्मेव मध्यस्थः कलापात्रं तनूमिव ॥ ४२
परिश्रमविदो वाक्यै रज्यंतेनर्थकैरपि ।
[2]विज्ञेत्साः किं न तुष्यंति शकलैर्जीर्णवाससः ॥ ४३
येषां प्रसत्तिर्व्युत्पत्तिरोजःकांतिसमाधयः ।
श्रोतारः कवितारश्च युज्येरन्सुकृतैरिमे ॥ ४४
रसोत्कर्षप्रवर्द्धिष्णुसुपर्वोल्लासिवैभवा ।
नंद्यादपास्तसंभेदाः[3] स्वर्द्धुनीव सभा चिरं ॥ ४५
रत्नकंकणवद्देव्या ब्राह्म्या ग्रंथकृतः क्षितौ ।
नंदंतु यत्कृतौ लोकोत्तरं शब्दार्थगौरवं ॥ ४६
तेषां प्रबन्धैर्माणिक्यैरिव बह्वर्थबंधुरैः ।
सुहृदां कर्णपूरेषु निर्मितेषु पुरा भृशं ॥ ४७
अल्पार्थापि स्फुटामोदा जातिस्रगिव निर्मला ।
कंठालंकृतिमातन्वत्येषा मान्यास्तु मत्कृतिः ॥ ४८

सेविताः प्रागवस्थासु फलंति स्वामिनोधिकं ।
पदारूढाः प्रणयिनां द्विजातेर्ब्रह्मदत्तवत् ॥ ४९
ध्यात्वेति भाविनोप्येतदममस्वामिनः प्रभोः ।
चरित्रोत्कीर्त्तनव्याजान्मयोपास्या विधीयते ॥ ५०
भ्रातरौ प्रथमे जन्मन्यभूतां कुलपुत्रकौ ।
द्वितीये राजललितांगदत्तौ वणिक्सुतौ ॥ ५१
तार्त्तीयीके सुरौ तुर्ये रामकृष्णौ यदूद्वहौ ।
पंचमे वालुकाजन्मा कनीयानभवत्तयोः ॥ ५२
संपूर्णसप्तवाद्धर्यायुस्तदुद्भूत्तो नृपान्वये ।
षष्ठे भविष्यति श्रीमानममो द्वादशो जिनः ॥ ५३
ब्रह्मलोके सुरो भूत्वा रामस्तीर्थेस्य सेत्स्यति ।
संक्षेपोयं चरित्रस्य विस्तरस्त्वेष वर्ण्यते ॥ ५४
चतुर्भिः कलापकं ॥

Ends:

४० ॥ इत्याचार्यश्रीमुनिरत्नविरचिते महाकाव्ये श्रीअममस्वामिचरिते भाविश्रीअममस्वामिसंघादिसंख्यानिर्वाणमहोत्सवतद्भ्रातृबलदेवजीवनिर्वाणतत्समयभाविविष्णुबलदेवस्वरूपवर्णनो विंशः सर्गः ॥ ७५

संपूर्णं चेदं श्रीअममस्वामिचरित्रं नव्यं महाकाव्यं ॥ ग्रंथाग्रं १९१

अपूर्वा यस्य पूर्वेयं चतुर्वर्णमनोहरा ।
चकास्ति क्ष्मा शिलापट्टे श्रीवीरः सोस्तु वः श्रिये ॥ १
जयतात्तत्पंचमगणनायकसंताननंदनप्रभवात् ।
कोटिकगणकल्पद्रोः प्रसृता श्रीवज्रमुनिशाखा ॥ २
अतुच्छः पुष्पगच्छश्रीश्चंद्रगच्छस्तदुद्भवः ।
नंद्यात्सौरभ्यसंलुभ्यत्साधुरोलंबचुंबितः ॥ ३

श्रीमांश्चंद्रप्रभः सूरिस्तस्माद्वार्द्धेरिवोदगात् ।
चक्रे कलाभिर्यः पूर्णः पूर्णिमां प्रकटां जने ॥ ४
सूरिः श्रीधर्मघोषोभूत्तत्पट्टे देवताकृतिः ।
सिद्धराजस्तुतः कर्त्ता स्वमूर्त्तेः सूरिविंशतेः ॥ ५

निष्ठामतीतविषयामपि वर्तमाने
व्युत्पादयन्विरचयन्गुणवत्सुवृद्धिं ।
सूत्रार्थयुक्तिकलनासु विशुद्धबुद्धि-
र्यः शब्दसिद्धिमकरोदपरप्रकारां ॥ ६

तेन स्वगच्छे प्राधान्यं दत्वाचार्यपदे स्वयं ।
प्रतिष्ठितः श्रीसमुद्रघोषसूरिरजायत ॥ ७

यो मालवोपात्तविशिष्टतर्क-
विद्यानवद्योपशमप्रधानः ।
विद्वज्जनालिश्रितपादपद्मः
केषां न विद्यागुरुतामधत्त ॥ ८

धारायां [1]नरवर्मदेवनृपतिं श्रीगोह्रदक्ष्मापतिं
श्रीमत्सिद्धपतिं च गुर्जरपुरे विद्वज्जने साक्षिणि ।
स्वैर्यो रंजयति स्म सद्गुणगणैर्विद्यामविद्याशयो
लब्धीः प्राक्तनगौतमादिगणभृत्संवादिनीर्द्धारयन् ॥ ९
मुख्यस्तदीयशिष्येषु कवींद्रेषु बुधेषु च ।
सूरिः सूरप्रभः श्रीमानवंतीख्यातसद्गुणः ॥ १०

दुर्वादिकैरवकुले ददतास्यमुद्रा-
मन्वर्थतां गमयता निजमत्र नाम ।

गोभिर्न भव्यकमलाकर एव बोधं
सचक्रपर्षदपि हर्षमलंभि येन ॥ ११
अथापरः श्रीमुनिरत्नसूरि-
नामा निकामाद्भुतमूर्त्तिकीर्त्तिः ।
कैः पौनरुक्त्येन न यद्गुणौघः
श्रांघाचलन्मौलिभिरभ्यवर्णि ॥ १२
सिद्धांतसाहित्यपदप्रमाण-
स्कंधत्रयज्योतिषशास्त्ररूपान् ।
सप्रापि वार्द्धीन्भजतो यदीये
स्पर्द्धानुबंधादिव बुद्धिकीर्त्ती ॥ १३
तार्त्तीयीकः श्रीतिलकचंद्रसूरिरजायत ।
सूरिस्तिलकयामास नभो यद्बुद्धिनिर्जितः ॥ १४
पट्टे स्वे जिनसिंहसूरिसुगुरुं सूरप्रभस्य प्रभोः
पट्टे किं च जिनेश्वराभिधगुरुं संस्थाप्य मध्ये तयोः ।
आसीनो मुनिरत्नसूरिगणभृद्राजे जगन्नंदिनो-

इतश्च ।

वाराहीं नगरीं तनूमिव शुचिर्मुक्तोपमो भूषयन्
श्रीश्रीमालकुले यशोधवल इत्यासीत्स कोशाधिपः ।
निश्छद्मोपि गुणान्वितस्ततलसत्तेजाः सुवृत्ताग्रणी-
र्यश्चौलुक्यपुरश्रियो विहितवान्सीमंतशृंगारणं ॥ १६
तत्सूनुर्धिषणानिरस्तधिषणारंभोस्ति दंभोज्झित-
स्त्रैविद्यो विदुषां स्थितो धुरि जगद्देवो नृदेवार्चितः ।

बालत्वे स्वकवित्वरंजितहृदः श्रीहेमसूरेर्मुखा-
द्वैतीयीकमवाप बालकविरित्युद्दामसन्नाम यः ॥ १७
प्राक् चक्रे किल धर्मघोषगणभृद्यान् षोडश श्रावकान्
गच्छे स्वे व्रतिनां जिनागमविधिं व्यालुंपतां शासकान् ।
धर्मस्थीयविशारदो नयपटुर्विद्याब्धिपारंगम-
स्तेष्वप्येष यथावशेषविबुधानुल्लंघ्य वाग्मुख्यतां ॥ १८
यत्प्रभाशंकया शंके सरस्वत्यपि पुस्तकं ।
हस्ते यत्सर्वदा धत्ते तत्सूरीणां कथैव का ॥ १९
आचार्याः कति माम[1] नामरगुरुस्पर्द्धिष्णवः प्रज्ञया
विद्यंते प्रभुधर्मघोषगणभृद्गच्छे गुणैरुल्वणैः ।
किं तु [2]श्रीमुनिरत्नसुगुरोर्वृत्तैरुदात्तैर्द्विधा
चेतः केतकसौरभैर्भ्रमरवद्यस्याध्यवास्यद्भुतं ॥ २०
श्रीरुद्रस्य कुमारभूपतिमहामौहूर्त्तिकस्यात्मजो
मंत्री निर्नय इत्युदात्तचरितो विप्रोपि सुश्राद्धवत् ।
भट्टः सूदनसंज्ञितश्च सुगुरोस्तस्यैव बोधाद्यधा-
त्सार्द्धं येन जिनेंद्रशासनधनोन्नत्यं धनस्य व्ययात् ॥ २१
मंत्रिणा बालकविना विद्वज्जनसभे स्थितः ।
प्रार्थ्यत श्रीमुनिरत्नसूरिस्तेनान्यदा मुदा ॥ २२
चतुर्भिः कलापकं ।
विद्यावल्लिफलं कवित्वमथ यद्वच्छूत्वमाहुर्बुधाः
पार्षद्यैर्नरवर्मदेवनृपतेः श्रीउज्जयिन्यां पुरि ।
तद्विद्याशिववादिनः किल महाकालाग्रतो निर्जये
यौष्माकं गुरुसाक्षिकं परिमलाद्युष्टैर्मुहुस्तुष्टुवे ॥ २३

[1] नाम ? [2] श्रीमुनिरत्नसूरिसु° ?

श्रीनेमिना यदुकुलाधिपतिर्मुकुंदो
भावी जिनोस्ति कथितोममसंज्ञया यः ।
कृत्वा नवं चरितमस्य सदस्यसाक्ष्यं
व्याख्याय तत्फलयुगं मम दत्त पूज्याः ॥ २४
युग्मं ।

इत्यार्थितो मंत्रिवरेण भक्त्या
तेनाममस्वामिजिनेश्वरस्य ।
भविष्यतश्चारुरसैः पवित्रं
संपल्लताचैत्रसमं चरित्रं ॥ २५

समुद्रसूरेश्चरणैकरेणुः
समग्रविद्यासरसीकरेणुः ।
स्वान्योपकृत्य[1] श्रुतरत्नभूरि-
र्विनिर्ममे श्रीमुनिरत्नसूरिः ॥ २६
युग्मं ।

स्वयं भगवता तेन जैनान्विद्वज्जनान्प्रति ।
अभ्यर्थनेयं विदधते विबुधेश्वरचित्रकृत् ॥ २७

विद्वांसः सकलश्रुतार्णवनवावागस्त्याः स्वमध्यस्थिताः
प्रख्याताः सुहृदः परिश्रमविदो युष्मासु बद्धांजलिः ।
यद्विद्यासु [2]विभद्धमागमगमासिद्धं निबद्धं मया
ग्रंथेस्मिंस्तदिदं विशोध्यमधिकं कृत्वा प्रसन्नं मनः ॥ २८

गूर्जरवंशोद्योतनपुत्रोदयराजमंत्रितनुजन्मना[3] ।
विद्वान्सागरचंद्रः प्रथमादर्शे लिलेखास्य ॥ २९

एतद्विक्रमतो द्विपंचदिनकृद्वर्षे कृतं पत्तने
सम्यक्शोधितवान्नृपाक्षपटलाध्यक्षः कुमारः कविः ।
सद्वैयाकरणाग्रणीर्विधिरुचिः श्रीपूर्णपालो यशः-
पालो बालकविस्तथा मणमहानंदौ च सभ्याग्रिमौ ॥ ३०

[1]श्रीशांतेर्मुनिरत्नसूरिगुरून्व्याख्यापयन्मंदिरे
तस्मिन्नेव पुरे महर्द्धिकसभे संलेख्य तत्पुस्तके ।
मंत्री बालकविर्विधाप्य च धनैरर्थव्ययैरुत्सवा-
न्प्रीतः कौतुकमार्जयज्जयमयं कल्याणकोटिश्रियः ॥ ३१

यावत्तीर्थेशकीर्त्तेस्त्रिभुवनभवनोत्संगरंगे नटंत्याः
सर्वाशादेवतास्ताः सलिलनिधिमहामर्दलान्वादयंति ।
व्योमश्रीश्चार्कचंद्रौ कलयति सततं तालवत्तावदेष
ग्रंथः प्राबोधिकश्रीर्जनयतु कृतिनां मंगलान्युज्ज्वलानि ॥ ३२

मंत्री बालकविः सदा नवद्युतानंदी चिरं नंदता-
द्दोषानुच्चपदस्थितो हरति यो लग्नेषु दत्ते श्रियं ।
चित्रं साभ्युदयो जयोत्सवकरो यत्संमुखो यत्पुन-
स्त्रेधा श्रीमुनिरत्नसूरिसुगुरौ लीनस्तदत्यद्भुतं ॥ ३३

विद्यासु यः श्रीमुनिरत्नसूरि-
गुरुप्रसादेन मनागधीती ।
स निर्ममे सूरिषु लब्धरेखः
प्रशस्तिमेतां जिनसिंहसूरिः ॥ ३४

इति प्रशस्तिः ॥ ॥ मंगलं महाश्रीः ॥ ॥

---

[1] मुनिरत्नसूरिसुगुरून्?

258. Commentary on the **Sthananga** by ABHAYADEVA [स्थानांगटीका । अभयदेवः].

Folios 1 to 320: 32½ inches long, 2 inches broad. 8 to 10 lines in a folio. 146 to 158 aksharas in a line. The "granthâgra" is given as 14,250.

259. Commentary on the **Prajnapanasutra** by MALAYAGIRI [प्रज्ञापनासूत्रटीका । मलयगिरिः].

Folios 1 to 357: 35⅓ inches long, 2½ inches broad. 10 to 12 lines in a folio. 138 to 150 aksharas in a line. Numbered as 183. Folio 357. R. सू ७ श्लो ३ L. ३९७. Dated Samvat 1387 = A.D. 1331.

Ends:

इति मलयगिरिविरचितायां प्रज्ञापनाटीकायां षट्त्रिंशत्तमं पदं समर्थितं । समर्थिता प्रज्ञापनाटीका ॥ शुभं भवतु समस्तसंघस्य ॥ मंगलं महाश्रीः ॥ संवत् १३८७ वर्षे वैशाखवदि १ गुरौ श्रीस्तंभतीर्थे प्रज्ञापनापुस्तकं लिखितं ॥

260. Vivekamanjari by ÂSAḌA, with the **Commentary** of BÂLACHANDRA [विवेकमञ्जरी सटीका । मू० आसडः । टी० बालचन्द्रः].

Folios 1 to 242: 32¾ inches long, 2½ inches broad. 10 to 12 lines in a folio. 102 to 115 aksharas in a line. Numbered as 183. Folio 240. R. सू ५७५ L. २४०. Dated Samvat 1322 = A.D. 1266. The text in 144 gâthâs.

Begins:

अर्हं ॥

श्रीनाभिनंदनविभोर्वदनं मुदेस्तु
श्रीसारदासदनमक्षिगवाक्षरम्यं ।
स्कंधाचलोपरि कलश्रुतिदोलयोर्य-
त्पर्यंतयोरुपवनीयति कुंतलाली ॥ १...

॥ ७ ॥ इह हि महितगुणमहिमकुमुदहिमकरस्य मकरकेतुबाणविस्तस्तजनपरित्राणवज्रपंजरस्य गूर्जरवसुंधरावदनमंडलीनगरमंडनश्रीमहावीरचैत्यप्रतिष्ठाकृतः सुकृतचरितचमत्कृतदेवेंद्रस्य श्रीदेवेंद्रगुरुस्वहस्तस्वपदविनिवेशितस्य भुवनभद्रंकरस्य श्रीभद्रेश्वरसूरिगुरोः पट्टनभस्तलालंकरणकिरणमालिना प्रवादिदैत्यदमनशौरिणा श्रीमदभयदेवसूरिणा समुपदिष्टसकलसिद्धांतसारः संसारवैराग्यरसप्रसरपुष्टचेताः शिष्टसमयसरसिजवनीविकाशनैकरविः श्रीमदासडकविः कविसभाशृंगार इत्यपरनामधेयः श्रेयःप्रवृत्तिसुभगं भावुकभविकसमस्तजनचक्रप्रमोदसंपादनच्छेकरुचिर्विवेकमंजरीप्रकरणकरणमभीष्टदेवतानमस्कारपुरःसरं प्रतिजानीते यथा ॥ सिद्धिपुरसत्थवाहं ...

Ends:

श्रीभिल्लमालाभिधया प्रसिद्धो
वंशावतंसो जगतीतलस्य ।
समस्ति पाथोधिरिवाच्युतश्री-
सरस्वतीवासनिवास एकः ॥ १

तस्मिन्नवो रजनिजानि[1] इवाजनिष्ट
भासा पटुः कटुकराज इति प्रतीतः ।
यो जैनदर्शनमयो भवमूर्द्धि चक्रे
लीलास्पदं पदमखंडितवृत्त एव ॥ २

सुधांशो रोहिणीवास्य बुधपुत्रप्रसूप्रिया ।
बभूवानलदेवीति सतीजनमतल्लिका ॥ ३

---

[1] रजनिजानिरिव ?

तयोरजनिषातां द्वौ सुतावासडजासडौ ।
सत्पथं न व्यलंघेतां धुर्यौ धर्मरथस्य यौ ॥ ४

आसडः कालिदासस्य यशोदीपमदीपयत् ।
मेघदूतमहाकाव्ये टीकास्नेहनिषेचनात् ॥ ५

श्रुत्वा नवरसोद्गारकिरोऽस्य कवितागिरः ।
राजसभ्याः कविसभाशृंगार इति यं जगुः ॥ ६

जिनस्तोत्रस्तुतीः पद्यगद्यबंधैरनेकशः ।
चक्रे यः क्रूरकर्माहिजांगुलीमंत्रसंनिभाः ॥ ७

येनोपदेशकंदल्याद्वानप्रकरणच्छलात् ।
कृतं मोक्षाध्वनीनेभ्यः पाथेयातिथ्यमक्षयं ॥ ८

आसडस्य मृडस्येव गौरीगंगे बभूवतुः ।
पृथिवीदेविजैतल्लदेव्यौ द्वे तस्य वल्लभे ॥ ९

जैतल्लदेव्यां तनयावभूतां
द्वावेतयो राजडनामधेयः ।
ज्येष्ठः कनिष्ठः कलिकालकुंभि-
द्विड्वित्रसिंहः किल जैत्रसिंहः ॥ १०

अरिसिंह इति पृथिवीदेव्यां करपुष्करभवद्वानः ।
गुरुगिरिपरिणयकर्मा गज इव कलभोंगजः समभूत् ॥ ११

पुत्रे राजडनाम्नि बालकदलीकांडोपमे स्वःपुरीं
याते बालसरस्वतीति विदिते तच्छोकमूढाशयः ।
संबुद्धोभयदेवसूरिसुगुरोर्यैरेव वाक्यैरसौ
तैरेवेदमसूत्रयत्प्रकरणं श्रीआसडः सत्कविः ॥ १२

एतामासडिजैत्रसिंहसचिवेनात्यर्थमभ्यर्थितो
वृत्तिं श्रीहरिभद्रसूरिसुगुरोः शिष्यप्रशिष्यावधिः ।
वाग्देवीप्रतिपन्नसूनुरकृत श्रीबालचंद्राख्यया
विख्यातोधिपतिर्गणस्य गणिनीरत्नश्रियो धर्मजः ॥ १३

नागेंद्रगच्छार्णवपार्वणेंदु-
रेतां वृहद्गच्छनभोरविश्च ।
श्रीमान्विपूर्वो जयसेनसूरिः
श्रीपद्मसूरिः समशोधयेतां ॥ १४

देवानंदमुनींदुगच्छगगनालंकारशीतद्युतेः
शिष्यः श्रीकनकप्रभाभिधगुरोस्त्रैविद्यचूडामणेः ।
वाग्देवीसुतबालचंद्रसुकवेराप्तप्रतिष्ठः सुधी-
रेतस्यां सहकारिकारणमभूत्प्रद्युम्नसूरिः पुनः ॥ १५

उत्सूत्रं यदसूत्रि सूत्रविकलेनालक्षणं लक्षण-
न्यूनेन श्रथरीति रीतिरिपुणा व्यर्थं हतार्थेन च ।
किंचित्क्वापि मया वचः प्रलपितं स्वच्छंदमच्छंदसा
तच्छोध्यं विबुधैः परैरपि परं कृत्वा प्रसादं मयि ॥ १६

श्रीधातुर्लेखशाली त्रिदशपथमहालेखिनीदंडशाली
सायं सायं किलायं शितकरखटिनीपात्रमादाय कालः ।
यावद्द्यौपट्टिकायामुडुलिपिविपुलं हस्तलेखं विधत्ते
तावद्भावच्यमाना कृतिभिरतितरां वर्त्ततां वृत्तिरेषा ॥ १७

इत्याचार्यबालचंद्रविरचितायां विवेकमंजरीवृत्तौ भावनाविवरणं नाम चतुर्थः परिमलः ॥

उद्दंडशैलमयदंडधृतस्य धात्री-
छत्रस्य वारिधिदुकूलवृतस्य मौलौ ।
स्वर्णाचलः कलशतामयमेति याव-
त्तावज्जयं कलयतादिह जैत्रसिंहः ॥ १

समाप्ता चेयं विवेकमंजरीप्रकरणवृत्तिः ॥ मंगलं महाश्रीः ॥

Praśasti of the donor of the book:

ॐ नमः श्रीवीतरागाय ॥
यन्नाममात्रवशतोपि शरीरभाजां
नश्यंति सामजघटा इव दुष्कृतौघाः ।
पादाग्रलांछनमृगेंद्रभुवा भियेव
देवः स वः शिवसुखानि तनोतु वीरः ॥ १

विस्तीर्णोयं क्षितिरुह इव श्लाघ्यमूलप्रतिष्ठः
प्राग्वाटाख्यो गरिमगुणवानन्वयोस्ति प्रधानः ।
लक्ष्मीर्यस्मिन्नवकिसलयश्रेणिशोभां बिभर्त्ति
ज्योत्स्नाकारा विकचकुसुमस्तोमसाम्यं च कीर्त्तिः ॥ २

आद्यस्तत्रानवद्यश्रीः सीदः श्रीद इवाभवत् ।
विभ्राणनेन यश्चित्रं तत्याज न कुलीनताम् ॥ ३

वीरदेव्यभिधया शुभलीला
तस्य शीलपरिपालनशीला ।
गेहिनीव कमला विमलाभू-
द्गेहिनी सुकृतनिर्मलबुद्धेः ॥ ४

चंद्र इव पूर्णदेवः सुतस्तयोः सुगुणकिरणसंपूर्णः ।
दोषाश्रितो न चित्रं कलंकितां न भजते यस्तु ॥ ५

लोकोपकारकरणाद्विजयाद्यसिंह-
सूरेरुपास्तिजननाज्जिनबिंबकल्पेः ।
पुत्रद्वयव्रतविधापनतश्च चक्रे
यः सार्थकं द्रविणमायुरपि स्वकीयम् ॥ ६

तस्य च प्रियतमाजनि रम्या
वाल्हिविः शशिसमुज्ज्वलशीला ।
वीतरागचरणार्चनचित्ता
क्षेत्रसप्तकवितीर्णसुवित्ता ॥ ७

कृत्तोपतापनिधनं विधिनोपधाना-
भिख्यं तपः शिवसुखाय विधाय धैर्यात् ।
मालाधिरोपणमकारयदात्मनो या
द्वेषद्विषो विजयसिंहगुरोः करेण ॥ ८

त्रपामणिक्षोणिरसावसूत
सूतान्दिगीशान्स्फुटमष्टसंख्यान् ।
ये पुण्यकाष्ठाश्रितचेतसोपि
चित्रं न संक्रन्दनयोगमापुः ॥ ९

भोगिभोगायितभुजस्तंभः कुलगृहं श्रियः ।
आद्यस्तत्राभिरामश्रीर्ब्रह्मदेवोऽभवत्सुतः ॥ १०

अभिरामगुणग्रामद्रुमारामवसुंधरा ।
दयिता पोहणिस्तस्य बभूव प्रियसंभवा ॥ ११

वासनावासितस्वांतश्चंद्रावत्यां महत्तमे ।
यश्चैत्ये कारयामास बिंबं वीरजिनेशितुः ॥ १२

या पद्मदेवसूरेर्गुरोः कृते शुभमतिः स्वविन्तेन ।
चरितं त्रिषष्टिमध्यादलेखयत्प्रथमतीर्थकृतः ॥ १३

द्वैतीयीको बोहडिरभवत्तनुजो गुणव्रजनिकेतम् ।
एतस्यांबीति[1] कुटुंबिनी च चंचद्गुणकदंबा ॥ १४

स्वकीयवंशे भुवनावतंसे
ध्वजानुकारं दधदंगजन्मा ।
सद्धर्मनिर्मापणदत्तवित्त-
[2]चित्तस्वयोर्विल्हणसंज्ञ आद्यः ॥ १५

सती सतीसंहतिशीर्षरत्नं
तस्य प्रिया जैनपदाब्जभृंगी ।
बभूव दानादिगुणप्रधाना
सन्मानसा रूपिणिनामधेया ॥ १६

द्वितीय आल्हणश्चाभूद्भाग्यसौभाग्यजन्मभूः ।
अनन्यजनसामान्यसौजन्यमणिरोहणः ॥ १७

जल्हणस्तृतीयसूनुश्चतुर्थो मल्हणाभिधः ।
समभून्मोहिनी चापि सुता स्वजनमोहिनी ॥ १८

जल्हणस्य तृतीयस्य नाऊजा या शुभाशया ।
वीरपालो वरदेवो वैरिसिंहः सुतास्तयोः ॥ १९

वहुदेवस्तु तृतीयो यश्चारित्रं च सूरिपदवीं च ।
संप्राप्य नाम लेभे सूरिः श्रीपद्मदेव इति ॥ २०

चतुर्थ आमणश्चारुगुणमाणिक्यमंडितः ।
पंचमो वरदेवाख्यः सत्सख्यविहितोद्यमः ॥ २१

---

[1] एतस्यांबेति? [2] चित्तस्तयो?

षष्ठः पंडितसंहतिचतुरः स्फूर्ज्जद्यशा यशोवीरः ।
आचार्यपदे लेभे श्रीपरमानंद इत्यभिधाम् ॥ २२

सप्तमो वीरचंद्राख्यो जज्ञेनूनगुणावलिः ।
समभूज्जिनचंद्राद्वः प्रकृष्टवपुरष्टमः ॥ २३

वोहडिजविल्हणस्य च पुत्रचतुष्टयमनूनगुणरूपम् ।
रूपिणिकुक्षिसरोवरकलहंसनिभं विवेकयुतम् ॥ २४ ।

आशापालः कीर्त्तिवल्लचालवालः
सीधूनामा भूरिधामा द्वितीयः ।
तार्त्तीयीकोभूज्जगत्सिंघसंज्ञ-
स्तुर्यः सूनुः पद्मसिंहाभिधानः ॥ २५

वीरीति पुत्री सुगुणैः पवित्रा
मनोहरा सा हरिणीसुनेत्रा ।
अभूच्छुभाचारपवित्रपात्रा
सद्रूपलावण्यविशुद्धगात्रा ॥ २६

जग्राह यः पुत्र इह तृतीयः
कामप्रदां संयमराज्यलक्ष्मीं ।
क्षिप्रं तथा सूरिपदं च लेभे
सुदुर्लभं पुण्यवतापि पुंसा ॥ २७

प्रथमस्यासपालस्य खेतुकाकुक्षिसंभवाः ।
सज्जनोभयसिंहाख्यस्तेजाकः सहजः सुताः ॥ २८

सीधुकाख्यद्वितीयस्य सोहरेत्यभवद्वधूः ।
अगण्यपुण्यदाक्षिण्यलावण्यादिगुणान्विता ॥ २९

या पद्मदेवसूरेर्गुरोः कृते शुभमतिः स्वचित्तेन ।
चरितं त्रिषष्टिमध्यादलेखयत्प्रथमतीर्थकृतः ॥ १३

द्वैतीयीको बोहडिरभवत्तनुजो गुणव्रजनिकेतम् ।
एतस्यांबीति[1] कुटुंबिनी च चंचद्गुणकदंबा ॥ १४

स्वकीयवंशे भुवनावतंसे
ध्वजानुकारं दधदंगजन्मा ।
सद्धर्मनिर्मापणदत्तचित्त-
[2]चित्तस्वयोर्विल्हणसंज्ञ आद्यः ॥ १५

सती सतीसंहतिशीर्षरत्नं
तस्य प्रिया जैनपदाब्जभृंगी ।
बभूव दानादिगुणप्रधाना
सन्मानसा रूपिणिनामधेया ॥ १६

द्वितीय आल्हणश्चाभूद्भाग्यसौभाग्यजन्मभूः ।
अनन्यजनसामान्यसौजन्यमणिरोहणः ॥ १७

जल्हणस्तृतीयसूनुश्चतुर्थो मल्हणाभिधः ।
समभून्मोहिनी चापि सुता स्वजनमोहिनी ॥ १८

जल्हणस्य तृतीयस्य नाऊजा या शुभाशया ।
वीरपालो वरदेवो वैरिसिंहः सुतास्तयोः ॥ १९

वहुदेवस्तु तृतीयो यश्चरित्रं च सूरिपदवीं च ।
संप्राप्य नाम लेभे सूरिः श्रीपद्मदेव इति ॥ २०

चतुर्थ आमणश्चारुगुणमाणिक्यमंडितः ।
पंचमो वरदेवाख्यः सत्सख्यविहितोद्यमः ॥ २१

---

[1] एतस्यांबेति? [2] चित्तस्तयो?

षष्ठः पंडितसंहतिचतुरः स्फूर्ज्जद्यशा यशोवीरः ।
आचार्यपदे लेभे श्रीपरमानंद इत्यभिधाम् ॥ २२

सप्तमो वीरचंद्राख्यो जज्ञेनूनगुणावलिः ।
समभूज्जिनचंद्राद्यः प्रकृष्टवपुरष्टमः ॥ २३

वोहडिजविल्हणस्य च पुत्रचतुष्टयमनूनगुणरूपम् ।
रूपिणिकुक्षिसरोवरकलहंसनिभं विवेकयुतम् ॥ २४ ।

आशापालः कीर्त्तिवल्लचालवालः
सीधूनामा भूरिधामा द्वितीयः ।
तार्त्तीयीकोभूज्जगत्सिंघसंज्ञ-
स्तुर्यः सूनुः पद्मसिंहाभिधानः ॥ २५

वीरीति पुत्री सुगुणैः पवित्रा
मनोहरा सा हरिणीसुनेत्रा ।
अभूच्छुभाचारपवित्रपात्रा
सद्रूपलावण्यविशुद्धगात्रा ॥ २६

जग्राह यः पुत्र इह तृतीयः
कामप्रदां संयमराज्यलक्ष्मीं ।
क्षिप्रं तथा सूरिपदं च लेभे
सुदुर्लभं पुण्यवतापि पुंसा ॥ २७

प्रथमस्यासपालस्य खेतुकाकुक्षिसंभवाः ।
सज्जनोभयसिंहाख्यस्तेजाकः सहजः सुताः ॥ २८

सीधुकाख्यद्वितीयस्य सोहरेत्यभवद्वधूः ।
अगण्यपुण्यदाक्षिण्यलावण्यादिगुणान्विता ॥ २९

तुर्यस्य पद्मसिंहस्य वालूनाम्नी प्रियाभवत् ।
सुतस्तयोः समुत्पन्नो नागपालाभिधः सुधीः ॥ ३०

किं च ।

रूपं बलं च विभवो विषयाभिषंगो
नीरोगता लवणिमा प्रियसंप्रयोगः ।
वातावधूतपटचंचलमेव सर्वं
विज्ञाय धर्मनिपुणैर्भविभिर्विभाव्यं ॥ ३१

अंगुष्ठमात्रं यो बिंबं कारयत्यर्हतां बुधः ।
सिद्धिनारीपरीरंभभवं स लभते सुखं ॥ ३२
न मनःपर्ययमवधि न केवलज्ञानमत्र नैवास्ति ।
पुस्तकलिखनमेतत्तद्यष्टिर्दृष्टिहीनानां ॥ ३३
श्रीरत्नप्रभसूरेर्गुरोः सकाशान्निजस्य सद्बंधोः ।
संसारांभोधितरीं श्रुत्वेत्यथ देशनां विशदां ॥ ३४
डाहापद्रपुरे चैत्ये कारयामास भावभाक् ।
श्रीमतः सुमतेर्बिंबमर्हतान्निजगत्पतेः ॥ ३५

आलेखयत्सैष किलासपालः
श्रेयःश्रिये स्वस्य पितुः प्रधानं ।
विवेकमंजर्यभिधां दधानं
सत्पुस्तकं निर्वृतिदीपकल्पं ॥ ३६

यावत्पूर्वाद्रिशृंगोदित इह जगति स्वप्रतापेन हंति
प्रोद्यन्नीलीविनीलं तिमिरभरमरं तापनस्तत्समंतात् ।
यावच्छेषाहिराजः क्षितिवलयमसौ स्फूर्त्तिमान्संबिभर्त्ति
श्रेयोधिष्ठानयानप्रवररभः[1] पुस्तकस्तावदास्तां ॥ ३७

[1] °प्रवररसनिभः ?

चक्षुर्लोचनविष्टपात्रिनयनप्रोद्भूतसंवत्सरे
मासे कार्तिकनाम्नि चंद्रसहिते कृष्णाष्टमीवासरे ।
वृत्तिर्निर्वृतिमार्गदीपकलिकातुल्या विनीतात्मना
रामेण स्वयमादरेण लिखिता नंद्यादनिंद्याक्षरा ॥ ३८

प्रशस्तिः समाप्ता ॥ शुभमस्तु ॥ पूज्यश्रीप्रद्युम्नसूरिभिः प्रशस्तिः शोधितेति ॥ छ

261. Nirayavalisutra [निरयावलिसूत्रम्].

Injured. 37 folios.

262. Abidhanachintamani with **Commentary**, by HEMACHANDRA [अभिधानचिन्तामणिः सटीकः । हेमचन्द्र·].

Folios 1 to 250 : 37½ inches long, 2½ inches broad. 10 to 12 lines in a folio. 140 to 145 aksharas in a line. The "granthâgra" is given as 10,000. Dated Samvat 1376 = A.D. 1220.

263. Pratyekabuddhacharitra by TILAKÂCHÂRYA [प्रत्येकबुद्धचरित्रम् । तिलकाचार्यः].

Folios 1 to 110: 2½ inches long, 1½ inches broad. 6 lines in a folio. 40 to 43 aksharas in a line. In 671 gâthâs.

264. Nyayavataravivriti [न्यायावतारविवृतिः].

Folios 1 to 151 : 14½ inches long, 1½ inches broad. 6 to 8 lines in a folio. 40 to 43 aksharas in a line. Numbered as 183. Folio 151.

R. $\frac{\text{सू}}{१}$ L. १९१. Incomplete. Compare No. 216.

Begins :

॥ नमो वाग्देवतायै ॥

अवियुतसामान्यविशेषदेशिनं वर्द्धमानमानम्य ।
न्यायावतारविवृतिः स्मृतिबीजविवृद्धये क्रियते ॥ १

तस्येदमादिवाक्यं ॥ प्रमाणेत्यादि ॥

265. Haimavyakarana with **Commentary** by HEMACHANDRA [हैमव्याकरणं सटीकं बृ० । हेमचन्द्रः].

Injured. 295 folios.

266. Sutrapatha, Unadi and **Linganusasana** by VÂMANÂCHÂRYA [सूत्रपाठः । उणादि. । लिंगानुशासनम् । वामनाचार्यः].

Folios 1 to 66: $15\frac{3}{4}$ inches long, $1\frac{1}{2}$ inches broad. 6 lines in a folio 62 to 70 aksharas in a line. Numbered as 183. Folio 62 R. बु २ L. ६२, Dated Samvat 1287 = A.D. 1231.

Begins:

I. Sûtrapâṭha.

८० ॥ उपकारीदमत्यंतं पंजिकायामतो बुधैः ।
शास्त्रांतरात्समादत्तं परसूत्रकदंबकम् ॥ १
ह्रस्वं लघु । संयोगे गुरु । दीर्घं च । . . .

Folio 46:

इति अष्टमः पादः समाप्तः ॥ परसूत्राणि समाप्तानि ॥ नवौ भ्रमेः । न धात्वैकदेशलोपे गुणवृद्धी । वृद्धिरादैच् । गुण्यनः स्यात् । लोकस्य प्रीणेः । . . .

Folio 52:

कृत्परसूत्राणि समाप्तानि ॥

II. Unâdi.

आद्यरयोखनिस्वभ्यां दुः । मद्यंकिवासिमथिवतिभ्य उरः ।

Folio 54:

इत्युणादौ प्रथमः पादः समाप्तः ॥

Folio 62:

प्रथेरमचमंगेरलच् ॥ इत्युणादौ षष्ठः पादः समाप्तः ॥
उणादिः समाप्ता इति ॥

III. Lingânuśâsana. *

॥ इ० ॥
सिद्धं विबुधजनेष्टं विदिताखिलवाङ्मयं प्रणम्यात्मं ।
लिंगानुशासनमहं वक्ष्यार्याभिः समासेन ॥ १

* Corrected *yathâśakti*. See remarks in body of Report.

नाम नपुंसकलिंगं तत्रनलस्तुत्वशब्दपर्यंतं ।
मन्नंतो हितदितमपि सांतं हल्पूर्व-रुजातं ॥ २

भवनस्य रजतहांतं चार्थरणापत्यहृदयतालुपुराः ।
रांतं च तमोर्वारुकतमसामव्यक्तलिंगोक्तौ ॥ ३

दलपलबिलहिमखामृतभयसुखदुःखपुण्यपापविशां ।
प्रसवाभरणविलेपव्यंजनफललवणजातीनां ॥ ४

दार्व्वस्त्रौषधजलधनुरुदराजिरशिखरवस्त्रपिच्छानां ।
द्विगुरपि पात्राद्यंतः क्रियाव्ययविशेषणं चैक्ये ॥ ५

छायासभाबहूनां संघे राजार्थराक्षसादीनां ।
भवने च तत्समासे द्वंद्वैकत्वाव्ययीभावौ ॥ ६

कृतषष्ठ्यंतसमासे तदादिकथने ह्युपक्रमोपज्ञे ।
कंथोशीनरदेशे नाम्न्यव्ययपूर्वकश्च पथः ॥ ७

भावेऽचिन्नणकांतो ऽदंतो हि समूहभावकर्मार्थाः ।
धर्मार्द्धसारमित्रा ह्स्वांगदलन्यायसुहृदर्थे ॥ ८

कुहकं चिबुकं लिंगं क्रकचं बीजं ललाटशृंगाटं।
चटपिटलोष्टकरोटं पीठं पृष्ठं च कुष्ठं च ॥ ९

कुंडांडभांडकारणशरणमृणक्षूणमुष्णतीर्थोक्थं ।
गुदवृंदकुसीदानि श्राद्धान्ने रत्नचिह्ने च ॥ १०

रूपं तल्पं शिल्पं समीपकूर्पोडुपांतरीपाणि ।
बिंबकुटुंबे कुंकुमसिध्मेध्मयुग्मगुल्मं च ॥ ११

किशलयशिशिरकुकुंदुरचामरकांतारतीरदूराणि ।
वैराक्षरांतरोखरकिण्वशरावाणि दैवं च ॥ १२

कणिशं वडिशं पलिशं शीर्षं वर्षं च साहसं सबुसं ।
पुण्याहं सुदिनाहं जक्षत्पुरीतं जगद्भवनं ॥ १३
नीडं गृहशशयूविस्थूणोर्ण्णं गंधमादनास्थक्षि ।
शक्तयररिकशिपु जानु च कशेरुतोरणविशाद्वटच्चाहः ॥ १४

इति नपुंसकलिंगाधिकारः समाप्तः ॥ ७

पुल्लिंगमृदुदंतो वुभ्यक्यंतः स्यदनदाध्वकूपानां ।
सर्वज्ञपरिसरधर्मखघनघृणिरदपुष्यवलयानां ॥ १
ध्वनितरुविषमासासुरवर्णमरुत्प्राणिनो विशेषाणां ।
धान्यानां रात्राह्नचसमाहारे दुंदुभिरनक्षे ॥ २
ग्रंथिकलिकेलिवलिगिरिवृतिराशि च मौलिकुक्षिपाण्यंघ्रिः ।
अंजलिहाहाहूहूसंकेतव्रातपोतयुताः ॥ ३
सूनवातायनहायनजनौदनाभिजनफेनवेमाश्म ।
श्लेष्मोष्मपाप्मयक्ष्मोत्सवद्वंद्वं मद्राश्च मंत्रयुताः ॥ ४
गर्त्तो वटो निकाय्योस्ताच्छादपटस्तथोत्तरासंगः ।
नूपुरहारकलापा रैकोशस्वार्थविभवाश्च ॥ ५
बहवः सक्तुबल्वजदारालाजासुगृहा दशावासाः ।
नाट्यनयादिजनाः प्रपराणि व्रणयुगपदांगानि ॥ ६
मलखलकपोलकंवलचखालकल्लोलकालकीलगलाः ।
तरलप्रवालतंदुलकल्लोपलतूलफालगोलनलाः ॥ ७

इति पुल्लिंगाधिकारः समाप्तः ॥

स्त्रीलिंगं योनिमंतं प्रागुदीर्धांत उदितोप्यनुक्त इह ।
ह्रदलिल्लिदंतदीधतिजात्यादिदरद्यविटछार्दिः ॥ १

भा द्वाः पूरुडकाकुप्रियंगुकुत्सनायुरज्जुचंचुतनुः ।
बहवश्च समासिक्तावर्षाप्सुमनोजलौकसोप्सरसः ॥

इति स्त्रीलिंगाधिकारः समाप्तः ॥

विषकुलिशकलत्राणि त्रिपिष्टपात्रे नपुंसके पर्व्व ।
प्रसवाश्ववडववाक्च्छेदगरुदुच्चारवेधसः पुंसि ॥ १
विंशत्याद्येकार्थाः स्त्रियां तु नित्यं नपुंसकेदंता ।
संख्या शतादिरिष्टा द्वित्वाद्यर्थे च संख्यायां ॥ २
स्त्रीलिंगनपुंसकयोराबंतोत्तरपदोद्विगुश्चार्चिः ।
षष्ट्यादिपदाच्छाया शाला सेना सुरा सनिशा ॥ ३
पुल्लिंगस्त्रीलिंगा मरीचिमणियष्टिमुष्टितोष्याणि ।
तुटिमखिपाटलिशाल्मलितरणिश्रोण्यूर्मयो वसतिः ॥ ४
अरणीषुधीषुतिथयः समृत्यु कर्कंधुबाहुकंटु तथा ।
संज्ञाबहुलं वाच्यं दशरत्रित्वं ह्यनेकलिंगार्थाः ॥ ५
स्वत आमलकविभीतकवटभल्लातकहरीतकास्त्रिषु ।
हिंस्रंताः स्त्रियामथांताः शृंगलसविषाणनखरवल्लराः ॥ ६
परवल्लिंगं द्वंद्वे तत्पुरुषे च द्विगौ हि वाच्यमिव ।
अर्थांतरे च प्राज्यलमापन्नप्राप्तपूर्वे च ॥ ७
दृश्यंते अर्द्धर्चाद्या अपि पुंसि च शंखपद्ममंभोजे ।
भूतो ग्रहेथ लवणासैंधवमित्यनुदितं जनाज्ज्ञेयम् ॥ ९

व्याडिप्रणीतमथ वाररुचं सचांद्रं
जैनेंद्रलक्षणगतं विविधं तथान्यत् ।
लिंगस्य लक्ष्म हि समस्य विशेषयुक्त-
मुक्तं मया परिमितं नृदृशा इहार्याः ॥ ९

हेमचंद्रानुस्मृते सिद्धहेमचंद्रनाम्नि शब्दानुशासने अ-
चतुर्थः पादः समाप्तः ॥ अष्टमोध्यायः समाप्तः । समाप्तं
वंद्राभिधशब्दानुशासनमिति ॥

ं कटण...

ासनानि लिंगानां ॥ छ ॥ लिंगानि समाप्तानि ॥
ैं ॥ भू सत्तायां । पा पाने...

चार्यहेमचंद्रानुस्मृताश्चुरादयो णितो धातवः समाप्ताः ॥
ावापाजिस्वदिसाध्य...

ोवहेः क्विप् सश्च डः । छ ॥
चंद्रानुस्मृता उणादयः समाप्ताः ॥ ग्रंथाग्रं २०९० ॥
२९३ वर्षे आश्विनशुदि १५ सोमे स्तंभतीर्थे श्रीनरेश्वरि-
ाव्याकरणसूत्रपुस्तिका लिखापिता ॥

bdanusasana by HEMACHANDRA [शब्दानुशासनम्।

, 90: 15½ inches long, 2 inches broad. 4 to 8 lines in a
sharas in a line. Incomplete.

य परमात्मानं श्रेयः शब्दानुशासनम् ।
ार्यहेमचंद्रेण श्रुत्वा किंचित्प्रकाश्यते ॥ १

he same, with Commentary [तस्यैव सवृत्ति]

ं316. Numbered as 183. Folio 316. R. सुं ३ कु L. ३२६. In-

अद्यापि संशयगतार्थमनिष्टसंग-
लिंगानुशासनमिहाज्ञतया मया तत् ।
प्रोक्तं हि किंचिदविचार्य तदार्यवर्यैः
संस्कार्यमस्ति यदि कार्यमुतावधीर्यं ॥ १०

Ends:

लिंगानुशासनमिदं कृतमुन्नतेन
शुभ्रैर्गुणैः कविहितं भुवि वामनेन ।
बुद्ध्वाऽखिलं विमलशब्दगतप्रमेयं
नातःपरं स्फुटतरं शुभमस्ति लोकाः ॥ ११

इति श्रीवामनार्यकृतं लिंगानुशासनं समाप्तमिति ॥ छ

संवत् १२८७ वर्षे वैशाख सुदिं गुरावद्येह वीजापुरीयभावकपोषधशालायां पूज्यश्रीदेवेंद्रसूरिविजयचंद्रसूरिउपाध्यायश्रीदेवभद्रगणे सद्गुरूणां धर्मोपदेशतः सा० रत्नपाल सा० लाहड भे० वील्हण हु० आसपाल परसूत्रपुस्तिका लिखापिता ॥

267. Hemavyakaranasutradi [हेमव्याकरणसूत्रादिः].

Folios 1 to 161: $14\frac{1}{2}$ inches long, $1\frac{3}{5}$ inches broad. 6 to 8 lines in a folio. 55 to 60 aksharas in a line. Numbered as No. 183. Folio 97. R. ६३ मा L. १७. Folio 113. R. सू ल्ल ३ L. ११३. Folio 138. R. सू ला ऋा L. १३८. Folio 161. R. सू घु १ L. १६१. Dated Samvat 1293 = A.D. 1237.

Begins:

॥ अर्हं ॥

सिद्धिः स्याद्वादात् । लोकात् ऊदात्ताः स्वराः...

Folio 97:

शेषं संस्कृतवत्सिद्धम् ॥

इत्याचार्यहेमचंद्रानुस्मृते सिद्धहेमचंद्रनाम्नि शब्दानुशासने अष्टमाध्यायस्य चतुर्थः पादः समाप्तः ॥ अष्टमोध्यायः समाप्तः । समाप्तं चेदं सिद्धहेमचंद्राभिधशब्दानुशासनमिति ॥

पुल्लिंगं कटण...

Folio 113:

अनुशासनानि लिंगानां ॥ छ ॥ लिंगानि समाप्तानि ॥

॥ अर्हं ॥ भू सत्तायां । पा पाने...

Folio 138:

इत्याचार्यहेमचंद्रानुस्मृताश्वुरादयो णितो धातवः समाप्ताः ॥

॥ कृवापाजिस्वदिसाध्य...

Ends:

अनेसोवहेः क्विप् सश्च डः । छ ॥

इत्याचार्यहेमचंद्रानुस्मृता उणादयः समाप्ताः ॥ ग्रंथाग्रं २०९० ॥

संवत् १२९३ वर्षे आश्विनशुदि १५ सोमे स्तंभतीर्थे श्रीनरेश्वरियोग्या श्रीहेमव्याकरणसूत्रपुस्तिका लिखापिता ॥

268. Sabdanusasana by HEMACHANDRA [शब्दानुशासनम् । हेमचन्द्रः].

Folios 1 to 90: 15½ inches long, 2 inches broad. 4 to 8 lines in a folio. 52 aksharas in a line. Incomplete.

Begins:

पणम्य परमात्मानं श्रेयः शब्दानुशासनम् ।

आचार्यहेमचंद्रेण श्रुत्वा किंचित्प्रकाश्यते ॥ १

269. The same, with **Commentary** [तदेव सवृत्ति]

Folios 1 to 316. Numbered as 183. Folio 316. R. $\frac{\text{सुं}}{\text{कु}}$ L. ३२६. Incomplete.

अद्यापि संशयगतार्थमनिष्टसंग-
लिंगानुशासनमिहाज्ञतया मया तत् ।
प्रोक्तं हि किंचिदविचार्य तदार्यवर्यैः
संस्कार्यमस्ति यदि कार्यमुतावधीर्यं ॥ १०

Ends:

लिंगानुशासनमिदं कृतमुज्ज्वतेन
भुभ्रैर्गुणैः कविहितं भुवि वामनेन ।
बुद्ध्वाऽखिलं विमलशब्दगतप्रमेयं
नातःपरं स्फुटतरं शुभमस्ति लोकाः ॥ ११

इति श्रीवामनार्यकृतं लिंगानुशासनं समाप्तमिति ॥ छ

संवत् १२८७ वर्षे वैशाख सुदि गुरावद्येह वीजापुरीयश्रावकपोषधशालायां पूज्यश्रीदेवेंद्रसूरिविजयचंद्रसूरिउपाध्यायश्रीदेवभद्रगणे सद्गुरूणां धर्मोपदेशतः सा० रत्नपाल सा० लाहड श्रे० वील्हण ठ० आसपाल परसूत्रपुस्तिका लिखापिता ॥

267. Hemavyakaranasutradi [हेमव्याकरणसूत्रादिः].

Folios 1 to 161: 14½ inches long, 1⅔ inches broad. 6 to 8 lines in a folio. 55 to 60 aksharas in a line. Numbered as No. 183. Folio 97. R. ६३ मा L. ९७. Folio 113. R. सू ल ३ L. १११. Folio 138. R. सू ला फा L. १३८. Folio 161. R. सू घु १ L. १६१. Dated Samvat 1293 = A.D. 1237.

Begins:

॥ अर्हं ॥

सिद्धिः स्याद्वादात् । लोकात् ऊदात्ताः स्वराः...

Folio 97:

शेषं संस्कृतवत्सिद्धम् ॥

इत्याचार्यहेमचंद्रानुस्मृते सिद्धहेमचंद्रनाम्नि शब्दानुशासने अष्टमाध्यायस्य चतुर्थः पादः समाप्तः ॥ अष्टमोध्यायः समाप्तः । समाप्तं चेदं सिद्धहेमचंद्राभिधशब्दानुशासनमिति ॥

पुल्लिंगं कटण...

Folio 113:

अनुशासनानि लिंगानां ॥ छ ॥ लिंगानि समाप्तानि ॥

॥ अर्हं ॥ भू सत्तायां । पा पाने...

Folio 138:

इत्याचार्यहेमचंद्रानुस्मृताश्वुरादयो णितो धातवः समाप्ताः ॥

॥ कृवापाजिस्वदिसाध्य...

Ends:

अनेसोवहेः क्विप् सश्च डः । छ ॥

इत्याचार्यहेमचंद्रानुस्मृता उणादयः समाप्ताः ॥ ग्रंथाग्रं २९९० ॥

संवत् १२९३ वर्षे आश्विनशुदि १५ सोमे स्तंभतीर्थे श्रीनरेश्वरियोग्या श्रीहेमव्याकरणसूत्रपुस्तिका लिखापिता ॥

268. Sabdanusasana by HEMACHANDRA [शब्दानुशासनम् । हेमचन्द्रः].

Folios 1 to 90: 15½ inches long, 2 inches broad. 4 to 8 lines in a folio. 52 aksharas in a line. Incomplete.

Begins:

पणम्य परमात्मानं श्रेयः शब्दानुशासनम् ।

आचार्यहेमचंद्रेण श्रुत्वा किंचित्प्रकाश्यते ॥ १

269. The same, with **Commentary** [तदेव सवृत्ति].

Folios 1 to 316. Numbered as 183. Folio 316. R. सुं कु L. ३२६. Incomplete.

270. The same, with Great Commentary [तदेव सबृह-द्वृत्ति].

Folios 1 to 188 : 8 to 10 lines in a folio. 45 to 50 asksharas in a line. Numbered as 183. Folio 198. R. ६३ सु ऋ L. १९८.

Begins :

अर्हं ॥

अनुमोत्यादिः कृत् ॥ धातोर्विधीयमानस्त्यादिवर्जितो वक्ष्यमाणः प्रत्ययस्तुममभिव्याप्य कृत्संज्ञो भवति ॥

Ends:

पंचमोध्यायः समाप्तः ॥

क्षुण्णाः क्षोणिभृतामनेन कटका भग्नाथ धारा ततः
कुंठः सिद्धपतेः कृपाण इति रे मामंसत क्षत्रियाः ।
आरूढप्रबलप्रतापदहनः संप्राप्तधारश्चिरा-
त्पीत्वा मालवयोषिदश्रुसलिलं हंतायमेधिष्यति ॥

संव १३०० वर्षे वीजापुरपोषधशालायां समस्तश्रावकैः कृद्बृह-द्वृत्तिपुस्तिका लिखापिता । सा०रत्नपाल भ्रे० वील्हण० ठ० आसपाल-सा० लाहडेन लिखापितं ॥

271. The same with Commentary [तदेव सवृत्ति। हेमचन्द्रः].

Folios 1 to 253 : 15 inches long, 2 inches broad. 10 to 15 lines in a folio. 68 to 75 aksharas in a line.

Begins :

अर्हं ॥

वृद्धिरारैदौत् ॥...

Ends:

इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञश-ब्दानुशासनवृत्तौ पंचमाध्यायस्य चतुर्थः पादः ॥ पंचमोध्यायः । सं. ४६३ मंगलं महाश्रीः ॥

272. The same [तदेव].

Folios 1 to 330; agreeing in all respects with No. 271. Numbered as 183. Folio 330. R. स्ता / ला / ० L. ३३०. Contains the sixth and seventh adhyâyas of the work.

Begins:

॥ अर्हं ॥

तद्धितोणादिः । अणादिप्रत्ययो य इत ऊर्ध्वं वक्ष्यते ।...

Ends:

शास्त्रप्रवृत्तिरिति ॥

इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः ॥ सप्तमोध्यायः समाप्तः ॥ ग्रं० १९२ ॥ मंगलं महाश्रीः ।

क्षितिधव भवदीयं क्षीरधारावलक्षै
रिपुविजययशोभिः श्वेत एवासिदंडः ।
किमुत कवलितैस्तैः कज्जलैर्मालवीनां
परिणतमहिमानं कालिमानं तनोति ॥ २८ ॥ छ

273. The same, with **Commentary** [तदेव सवृत्ति].

Folios 1 to 192: 14½ inches long, 1⅔ inches broad. 8 to 10 lines in a folio. 45 to 50 aksharas in a line. Numbered as 183. Folio 192. R. ह / ६३ / र्मा L. १९२. Contains the sixth adhyâya of the work.

Ends:

इत्या० षष्ठाध्यायस्य चतुर्थपादः समाप्तः ॥

भूमिं कामगवि [1]श्वगोमयरसैरासिंच रत्नाकर
मुक्तास्वस्तिकमातनु त्वमुडुप त्वं पूर्णकुंभी भव ।

---

[1] स्वगोमय?

धृत्वा कल्पतरोर्दलानि सरलैर्दिग्वारणास्तोरणा-
न्याधत्त स्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिपः ॥ ४ ॥

संवत् १२९८ वर्षे द्वितीयभाद्रपदवदि ७ गुरौ लिखितेयं ॥ शुभं भवतु ॥ वीजापुरे पोषधशालायां तद्धितप्रथमखंडं समस्तभाव-कैर्लिखापितं ॥

274. The same (तदेव).

Folios 98 to 121: 14½ inches long, 1¾ inches broad. 6 to 8 lines in a folio. 50 to 54 aksharas in a line. Contains the eighth adhyâya of the work.

275. A Commentary on the **Avasyaka** [आवश्यकस्य विवृतिः टीका]

Folios 1 to 366: 29½ inches long, 2¾ inches broad. 12 to 14 lines in a folio. The "granthâgra" is given as 14,940. Numbered as 183.

Folio 364. R. सू थू ऐ L. ३६४. Dated Samvat 1294 = A.D. 1238.

Begins:

ॐ नमः सिद्धेभ्यः ॥

प्रणिपत्य जिनवरेंद्रं वीरं श्रुतदेवतां गुरून्साधून् ।
आवश्यकस्य विवृतिं गुरूपदेशादहं वक्ष्ये ॥
यद्यपि मया तथान्यैः कृतास्य विवृतिस्तथापि संक्षेपात् ।
तद्रुचिसत्वानुग्रहहेतोः क्रियते प्रयासोयं ॥

276. Samaradityacharitra by HARIBHADRASÛRI [समरादित्यचरित्रम् । हरिभद्रसूरिः].

Folios 1 to 317: 34 inches long, 2½ inches broad. 6 to 7 lines in a folio. 120 to 130 aksharas in a line. Numbered as 183. Folio 316.

R. स्ता ल्ल ग्रं L. ३१६. Dated Samvat 1299 = A.D. 1243.

Begins:

ॐ नमो वीतरागाय ॥

पणमह विजियसुदुज्जयाणिज्जियसुरमणुयविसमसरपसरं ।
तिहुयणमंगलनिलयं वसहगइगयं जिणं उसभम् ॥
परमसिरिवद्धमाणं पणट्ठमाणं विसुद्धवरनाणं ।
गयजोयं जोईसं सयंभुवं वद्धमाणं च ॥
सेसे चिय वावीसे जाइजरामरणबंधणविमुक्के ।
तेलोक्कमत्थयत्थे तित्थयरे भावउं नमह ॥
उवणेउ मंगलं वो जिणाण मुहलालिजालसंवलिया ।
तित्थपवत्तणसमए तियसविमुक्का कुसुमवुट्ठी ॥
देउ सुहं वो सुरसिद्धमणुयचंदेहिं सायरं नमिया ।
तित्थयरवयणपंकयविणिग्गया मणहरा वाणी ॥
अलं पवित्थरेण सुणह...

Ends:

एयं जिणदत्तायरियस्स उ अवयवभूएण चरियमिणं ।
जं विरइऊण पुन्नं महाणुभावचरियं मए पत्तं ॥
तेणं गुणाणुरागेउ होइ इहं सव्वलोयस्स ॥
गंथग्गमिमीए इमं छंदेणाणुट्ठएण भणिऊण ।
पाएणदससहस्सा हंदिसिलोयाण संठविया ॥ १०००० ॥

Praśasti:

वंशः श्रीपल्लिपालोस्ति सशाखः सत्यर्ववान्[1] ।
भूभृतोप्यधरीचक्रे येनैकच्छत्रितात्मना ॥
अजनि विनयपात्रं तत्र पुंरत्नचूडा-
मणिरमलिनकीर्तिः साढदेवाभिधानः ।

[1] सत्यपर्ववान्.

निरुपमजिनराजस्मेरपादारविंदा-
विचलविहितसेवावाप्तविश्वप्रतिष्ठः ॥ २

शीलव्रतदृढा साढूसंज्ञिता तस्य वल्लभा ।
जिनक्रमयुगांभोजे यन्मनो हंसकायते ॥ ३

भ्राताऽभूत् साढदेवस्य दोसलः सत्यशालितः ।
पदमीनामधेयाथ प्रिया तस्य विवेकिनी ॥ ४

आसीत् श्रेष्ठिकसाढदेवतनुभूर्जोजाकनामा जिन-
श्रेणिध्याननिशाणशोणितमतिप्राकाश्यनश्यत्तमाः ।
शश्वद्यस्य यशःप्रसूनमसमं राकानिशानायक-
ज्योतिःक्षालितनिर्मलांबरतलामोदाय यज्जातवान् ॥ ५

जाया तस्य जयत्नुका समभवद्दीनानुकंपारसा
सारासिक्तविवेककंदलवनप्रस्तारबद्धादरा ।
नित्यध्यातजिनेश्वरांघ्रिनखरुग्ध्वस्तांधकारांकुरो
यस्याश्चित्तगृहोदरे प्रतिपदं धर्मः सुखं खेलति ॥ ६

पुत्रो लाषणसंज्ञितोऽजनि तयोः पुण्यैकपात्रं कृती
नीतिज्ञो विनयी नयी सुकुलजो दक्षः क्षमादक्षिणः ।
येनोत्तुंगनिजान्वयाह्वयमहाप्रासादमूर्द्ध्नि स्फुटं
दिग्विस्तारियशःसुकेतनपटः प्रस्तारयामासिवान् ॥ ७

जाजाकस्याभवद्भ्राता जसपालाभिधः सुधीः ।
संतुकासंज्ञिता तस्य दयिता दानशालिनी ॥ ८

जातौ तयोः सुतौ रत्नधणसिंहाभिधावुभौ ।
अग्रिनी नाउका नाम्नी बभूवाम्नायभूषणं ॥ ९

अथ ।

जायाऽजायत लाषणस्य कुलजा दानोद्यता रुक्मिणी
नाम्ना दीनसुवच्छलाऽवयविनी पुण्यैंदिरा मंदिरे ।
यस्या मानसपंकजं त्यजति नो पक्षद्वयीनिर्मलो
धर्मो हंसयुवा युतो वरलया तीर्थेशभक्त्याख्यया ॥ १०

नरपतिरितिनामा लाषणस्यांगजन्मा
तदनु भुवनपालाख्यो यशोदेवसंज्ञः ।
क्रमश इह तनूजा जज्ञिरे तस्य तीर्था-
ऽधिपतिसुगुरुपूजालब्धलक्ष्मीविकाशाः ॥ ११

जाल्हणदेवीति सुता जासीनामा तथापरा पुत्री ।
सद्धर्मकर्मनिपुणा क्रमादिमा दुहितरोभूवन् ॥ १२
आसीत्कुलीनचरिता नायिकदेवीति नरपतेर्दयिता ।
अपरा च गौरदेवी तनुभूः सामंतसिंमाख्यः[1] ॥ १३

प्रिया भुवनपालस्य पउदेवीति संज्ञिता ।
बभूव भाग्यभूः शीलरत्नरत्नाकरावनिः ॥ १४
यशोर्णवस्य पत्नी सोहरासंज्ञा पतिव्रता जज्ञे ।
तस्याः समभवत्पुत्रः सांगणनामा स्फुरद्धामा ॥ १५

मातुस्तातो राजपालाभिधानो
मातुर्माता यस्य राणीति नाम्नी ।
मातुर्भ्राता राणिगो वूढडिश्च
मातुः पक्षो लाषणस्येत्थमुक्तः ॥ १६

श्रीमज्जिनेशप्रभुहस्तपद्मा-
धिवासतो लाषणनामधेयः ।
तीर्थेशयात्रादिककर्मनिर्मलः
कुलप्रदीपः सुजनोपकारी ॥ १७
अथान्यदा लाषण एष हृष्टः
सुदृष्टशास्त्रार्थविनीतचेष्टः ।
भवस्वरूपं क्षणदृष्टनष्टं
विभावयामास निशावसाने ॥ १८
प्रातः प्रयातः सुगुरोः समीपे
तदेव तत्रैव तथा निशम्य ।
ततः [1]प्रयोधार्कसुदृष्टवस्तुना
समाधिना ध्यायति सर्वमप्यदः ॥ १९

तथाहि ॥

देहं दुःखैकगेहं जलनिधिलहरीचंचलं जीवितव्यं
संपत्तिः प्राणभाजां प्रसृमरपवनोद्भूतकेतूपमेया ॥
सौंदर्यं सुभ्रुनेत्रांचललुलितसमं बंधुसंगोप्यनित्यो
जैनं धर्मं विनान्यन्नहि मनुजभवे शाश्वतं किंचिदास्ति॥१९ (sic)
दानशीलतपोभावभेदैर्धर्मश्चतुर्विधः ।
मुख्यतो यतयो दानमेवैकं संप्रचक्ष्यते ॥ २०
यद्यपि त्रिविधं शास्त्रं तद्दानं न तु विश्रुतम् ।
तथापि ज्ञानदानान्नो दानमन्यत्प्रशस्यते ॥ २१
ज्ञानं श्रुताश्रितं प्रोक्तं श्रुतं शास्त्रमिति स्मृतम् ।
तच्च द्विधा समाख्यातं कल्पिताचरितक्रमात् ॥ २२

[1] प्रबोधार्क°?

तद्वयोद्योतितं किंचिच्चरितं सुनिरूपये ।
इति चिंतयतस्तस्य स्मृतिगोचरतां गतम् ॥ २३

चरित्रं समरादित्यभूभुजः प्रशमास्पदम् ।
[1]संसारिजीववैरायरसनिस्यंदभाजनं ॥ २४

द्वेषव्याघ्रहुताशनं शमधुनीपूरार्णवं दुर्णय-
ध्वांतध्वंसनभास्करं कलिमलप्रक्षालनैकामृतम् ।
एतत्सच्चरितं सुचारु समरादित्येशितुः शस्रतो
बद्धं श्रीहरिभद्रसूरिगुरुणा संवेगसंगाय नः ॥ २५

यदिष्टं वसु[2] संसारे तदिष्टेषु नियोज्यते ।
अन्यदिष्टं हि नो दृष्टं मातरं पितरं विना ॥ २६

इति मातृजयतुकाया निजपितृजाजाह्वयस्य पुण्याय ।
समरादित्यचरित्रं विलेखितं लाषणेनैतत् ॥ २७

येन द्रव्यमुपार्जितं शुभवशादेकांतवीरेण तत्
क्षेत्रे सप्तमिते निवेश्य विहिता सद्वृत्तिरूपा वृतिः ।
तत्सीम्नि प्रकटो जिनेशसुगुरोरादेशतः शाश्वतो
जैनः श्रीसमरार्कपुस्तकतया घाटः समारोपितः ॥ २८

नंदनवभानुवर्षे पित्रोः सुकृताय लाषणः कुलजः ।
समरादित्यचरित्रव्याख्यानं कारयामास ॥ २९

यावन्नालति नागराट् नलिनति क्षोणीतलं दिग्ततिर्-
यत्र स्तोमति केसरत्यहिमरुक् किंचांबरं भृंगति ।
तावत्तत्समरार्कभूपचरितं चैतन्यविस्तारकं
श्रोतृणां समसंपदं वितनुतां व्याख्यायमानं बुधैः ॥ ३०

---

[1] संसारिजीववैराग्य° ? [2] वस्तु ?

नंदनवभानुवर्षे श्रीरत्नप्रभसूरिणा शुभध्यानात् ।
श्रीस्तंभतीर्थनगरे व्याख्यातं कार्तिके मासि ॥ ३१

277. Trishashtisalakapurushacharitra by HEMACHANDRA [त्रिषष्टिसलाकापुरुषचरित्रम् । हेमचन्द्रः].

Folios 2 to 223 : 15½ inches long, 2 inches broad. 5 to 6 lines in a folio. 65 to 70 aksharas in a line. Numbered as 183. Folio 223.

सू
३. व L. २२३. Contains the third parva of the work.
३

Ends :

श्रीशीतलस्वामिचरितवर्णनो नामाष्टमः सर्गः । समाप्तं तृतीयं पर्व ।

श्रीसंभवप्रभृतितीर्थकृतां तृतीये
ऽष्टानां चरित्रमिह पर्ववरेषु सर्गः ।
ध्येयं पदस्थमिव वारिरुहेषु पत्रे-
ऽनुध्यायतो भवति सिद्धिरवश्यमेव ॥ छ ॥

मंगलं महाश्रीः ॥ ढ ॥ ढ १२९९ वर्षे आश्विनवदि २ रवौ ऽद्येह श्रीवीजापुरपत्तने समस्तराजावलीपूर्वकं तपाकीयश्रीपोषधशालायां चरित्रगुणनिधानसमस्तसिद्धांतकलोन्मानेन पारगेन तपादेवभद्रगणिमलयकीर्त्तिपंडितकुलचंद्रपंडि० देवकुमारमुनिनेमिकुमारमुनिप्रभृतिसमस्तसाधून् तच्चरणकमलान् भक्तपरमश्रावकसाधु० रतनपालसमस्तसिद्धांतपुस्तकानां पौषधशालाभारनिर्वाहकपरमश्रावकश्रेष्ठिवील्हणद्वितीयभारनिर्वाहकसाधर्मिकानां वात्सल्यतत्परे परमश्रावक ठ० आसपालतृतीयभारनिर्वाहकनिरंतरं पुस्तकसिद्धांतनिर्विकल्पभक्त्या सारतत्परपरमश्रावकसाधु० लाहडप्रभृतीन् समस्तश्रावकैः त्रिषष्टिपुस्तकं समस्तसाधून् श्रावकाणां पठनवाचनपुण्यश्रेयोर्थं लिखापितं ॥ ढ ॥ ढ ॥ लेखकपाठकानां शुभं भवतु ॥ ढ मंगलं महाश्रीः ॥ शिवमस्तु ॥ आचंद्रार्कं अयं पुस्तकं नंदतु ॥ ॥ - - - - मगलं महाश्रीः ॥ ढ ॥ ढ

278. Nagakumaracharitra by RATNAYOGÎNDRA [नागकुमारचरित्रम् । रत्नयोगीन्द्रः].

Folios 1 to 14: 15¼ inches long, 1¾ inches broad. 8 lines in a folio. 70 to 75 aksharas in a line. Numbered as 183. Folio 14. R एक L. १४.

Begins:

ॐ नमः सिद्धेभ्यः ॥

श्रीमान्व्यवहितारोपी वृत्तिं धर्मरथस्य यः ।
चक्रे भ्रांतेर्विनाक्रांतस्तं नमीनं नमीम्यहं ॥

अथ दिग्वदनांभोजमंडनेन मनोमुदं ।
प्रतन्वता प्रसादेन सहसा लब्धजन्मना ॥

द्युसद्दुंदुभिनादेन नभस्तलविसर्पिणा ।
दिव्यगंधभरेणेव मंदप्रस्थानवायुना ॥

वृंदारकनिकायस्य वंदनायै जिनेशिनः ।
सप्रुताव्हाननादेन देवान् दूरस्थितानपि ॥

पूर्वमेव [1]परिक्किंनसंनिधेर्मगधाधिपः ।
व्यबोधि विपुलाद्रिस्थं वीरं [2]यतिनिवेदकान् ॥

प्रमादनिद्रानिर्विण्णान् पौरान् प्रतिविबोधयन् ।
नादः प्रादुरभूदद्रेस्तदाव्याप्तदिगंतरः ॥

पर्युपासितमर्हंतं परिवारपरिष्कृतिः ।
चचाल चेलिनीनाथस्तदा शक्रसमद्युतिः ॥

Ends:

ततोसौ श्रेणिकः श्रीमान्नत्वा त्रैलोक्यपूजितं ।
देवं श्रीवर्द्धमानाख्यमगमत्स्वास्पदं मुदा ॥

---

[1] परिच्छिन्न°? [2] यतिनिवेदकान्?

श्रीपंचम्युपवासस्य फलोदाहरणात्मकं ।
एवं नागकुमारस्य समाप्तिं चरितं ययौ ॥ ७९

इति श्रीरत्नयोगींद्रेणोपसंगृह्य कीर्त्तितं ।
सहस्रार्द्धमितग्रंथमेतच्चरितमुच्चकैः ॥ ७९

इति नागकुमारचरिते श्रीपंचमीमहोपवासफलोदाहरणे पंचमः सर्गः ॥ मंगलं महाश्रीः ॥

279. Pravachanasaroddharavishamapadavyakhya by UDAYAPRABHASÛRI [प्रवचनसारोद्धारस्य विषमपदव्याख्या। उदयप्रभसूरिः].

Folios 1 to 187 : 9½ inches long, 2 inches broad. 10 to 12 lines in a folio. 61 to 63 aksharas in a line. Numbered as 183. Folio 187. R. ७ L. १८७. The "granthâgra" is given as 3303.

Begins :

८० ॥ प्रवचनसारोद्धारे विषमपदार्थावबोधमाधत्ते ।
श्रीउदयप्रभसूरिः श्रीपार्श्वाधीशमानम्य ॥ १

Ends :

सर्वप्रकारसाहाय्यकारिणः क्षांतिशालिनः ।
जयप्रभस्य कृतिनः प्रयत्नादेष निर्मितः ॥ ८
अवधानवंध्यबुद्धिर्यदत्र न समंजसं ।
उक्तवानहमुत्सूत्रं तत्र मिथ्या कृतं मम ॥ ९
यद्वा यदत्र किंचित्तनुमतिभिर्दुष्टमुदितमस्माभिः ।
प्रीतास्तद्धीमंतः संतः कुर्वंतु निर्दोषम् ॥ १०

ग्रंथाग्रं ३३०३ ॥

मुनिचंद्रसूरिपंडितगुणचंद्राभ्यां भरादिहोपकृतं ।
प्रथमोत्साहनवाचनलेखनकर्मप्रकर्षेण ॥ ११

आकाशकमलं यावन्मेरुनालं हरिद्दलं ।
भास्वान् विकाशयत्येष तावन्नंद्यादसौ भुवि ॥ १२

280. Avasyakaniryukti [आवश्यकनिर्युक्तिः].

Folios 1 to 255: 13½ inches long, 1¾ inches broad. 4 to 10 lines in a folio. 45 to 50 aksharas in a line. Numbered as 183. Folio 255. R. सू ६ वृ. L. २५५.

281. Panchasutra [पञ्चसूत्रम्].

Folios 1 to 16: 18 inches long, 2 inches broad. Numbered as 183. Folio 16. R. ल्लं ङ्गा L. १६.

Begins:

नमो वीतरागाणं सव्वन्नूणं देविंदपूइयाणं जहट्ठियवत्थुवाईणं तेलोक्कगुरूणं अरुहंताणं भगवंताणं

Ends:

अविराहणाफला तिलोगनाहबहुमाणेणं निस्स्येयस्स साहिगित्ति ॥

पवज्जफलसुत्तं समत्तं ॥ ङ ॥ समत्तं पञ्चसूत्रम् ॥

282. Two books in one manuscript.

Folios 1 to 44; agreeing in all respects with No. 281. Folio 43. R. ग ३ L. ४३.

282, 1. Samgrahini [संग्रहिणी].

Begins:

निट्ठवियअट्ठकम्मं.....

Ends:

३८३ संग्रहणी प्रकरणं समाप्तेति ॥

282, 2. Pratikramana [प्रतिक्रमणम्].

Begins:

नमिऊण महावीरं दंसणमूलं गिहत्थधम्ममहं ।
गिह्णामि सव्वभवकयमिच्छत्ताविरइपडिकमणो ॥ १

Ends:

पडिवज्जए सम्मं ॥ ६०

Then follows the verse नमिऊण महावीरं repeated, and 42 gâthâs, ending: वारह सत्तसिए पडिवज्जइ लखमसिरी सम्मं ॥ ४२

283. Commentary on the **Pakshikasutra,** by YASODEVASÛRI [पाक्षिकसूत्रवृत्तिः । यशोदेवसूरिः].

Folios 1 to 199: 18 inches long, 2 inches broad. 8 to 12 lines in a folio. Numbered as 183. Folio 199. R. सू ६३ नं L. १९९.

Begins:

ॐ नमो वीतरागाय ।

शिवशर्मैकनिमित्तं विघ्नौघविघातिनं जिनं नत्वा ।
वक्ष्यामि सुखविबोधां पाक्षिकसूत्रस्य वृत्तिमहम् ॥ १
एतच्चूर्ण्यनुसाराद्ग्रंथांतरविवरणानुसाराच्च ।
प्रायो विवरणमेतद्विधीयते मंदमतिनापि ॥ २

Ends:

समाप्ता चेयं शास्त्रानुसारिणी पक्षप्रतिक्रमणवृत्तिरिति ॥
चंद्रकुलांबरशशिनो भव्यांबुजबोधनैकदिनपतयः ।
गुणगणरत्नसमुद्रा आसन् श्रीवीरगणिमिश्राः ॥ १

ये च ।

शुद्धध्यानजलापनीतकलिलाः [1]सक्तानदीपालया
निःसंगव्रतभारधारणरतास्तीव्रे तपस्युद्यताः ।

[1] सज्ज्ञान°?

ग्रीष्मेष्वातपवेदनां गुरुतरां जेतुं सदोपस्थिता
हेमंतेषु च शार्वरं हिमभरं सोढुं सदा निश्चलाः ॥ २
श्रीचंद्रसूरिनामा तेषां शिष्यो बभूव गुणराशिः ।
आनंदितभव्यजनः शंसितसंशुद्धसिद्धांतः ॥ ३
कलिकालदुर्लभानां गुणरत्नानां निधानमनवद्यं ।
समयावदातशुद्धिस्तथापरो देवचंद्रगणिः ॥ ४
श्रीचंद्रनाम्नः सूरेः[1] पादपंकजसेविना ।
दृब्धेयं प्रसृता वृत्तिः श्रीयशोदेवसूरिणा ॥ ५
गँभीरमेतदार्ष न चोहने शक्तिरस्ति मम दक्षा ।
नापीह संप्रदायः सम्यग्बहवश्च षाडगमाः ॥ ६
शास्त्रानुसारात्सुखबोधपावै-[2]
रात्मीयशक्त्या निवृतं तथापि ।
यच्चेह किंचिद्वितथं निबद्धं
तत्रास्तु मिथ्या मम दुःकृतं हि ॥ ७
अणहिलपाटकनगरे सौवर्णिकनेमिचंद्रसक्तायां ।
वरपौषधशालायां राज्ये जयसिंहभूपस्य ॥ ८
विशारदैः सूरिवरैर्विहारिभि-
र्विशोधितो यत्नपरायणैरियं ।
तथापि यन्न्यूनमुताधिकं पदं
तत् शोधनीयं कुशलैः कृपापरैः ॥ ९
शुभाशयवशाच्चेह यन्मया सुकृतं कृतं ।
तेन भूयान्ममाभ्यासः सर्वदैव जिनागमे ॥ १०

---

[1] सूरेश्च on सूरेः सु°? [2] पाठै–?

एकादशशतैरधिकैरशीत्या विक्रमाब्दतैः ।
द्वे सहस्रे शतैरधिके सप्तभिर्मथमानतः ॥ ११

मंगलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥ संवत् १३०९ वर्षे माघवदि १४ सोमे स्वस्ति श्रीमदाघाटे महाराजाधिराजभगवन्नारायणदक्षिणउत्तराधीशमानमर्दनश्रीजयतसिंहदेवतत्पट्टविभूषणराजाश्रिते जयसिंघविजयराज्ये तत्पादपद्मोपजीविनि महं० श्रीतल्हणप्रतिपत्तौ श्रीश्रीकरणादिसमस्तव्यापारान्परिपंथयतीत्येवं काले प्रवर्त्तमाने ठ० वयजलेन पाक्षिकवृत्तिर्लिखितेति ॥ शिवमस्तु ॥

284. Sraddhapratikramanasutravritti by KULAPRABHÂCHÂRYA [श्राद्धप्रतिक्रमणसूत्रवृत्तिः । कुलप्रभाचार्यः].

Folios 1 to 60: 13½ inches long, 1½ inches broad. 6 to 8 lines in a folio. Numbered as 183. Folio 60. R. थू ००० L. ६०.

285. Commentary on the **Upadesamala** of **Dharmadasagani** by SIDDHASÂDHU [उपदेशमालाया धर्मदासगणिकृताया विवरणम् । सिद्धसाधुः].

Folios 1 to 204: 19½ inches long, 2 inches broad. 8 to 10 lines in a folio. 65 to 68 aksharas in a line.

Commentary begins:

नमः सर्वज्ञाय ॥

हेयोपादेयार्थोपदेशभाभिः . .

Text begins:

जगच्चूडामणीभूर्ड . . .

Book ends:

विषं विनिर्द्धूय कुवासनामयं
व्यचीचरद्यः कृपया मदाशये ।
अचिंत्यवीर्येण सुवासनाह्रधां
नतोस्मि तस्मै जिनधर्मसूरये ॥ १

उत्सूत्रमत्र विवृतं मतिमांद्यदोषा-
द्वांभीर्यभाजि वचने यदनंतकीर्तेः ।
संसारसागरमनेन तरीतुकामै-
स्तत्साधुभिः कृतकृपैर्मयि शोधनीयम् ॥ २
तोषाद्विधाय विवृतिं गिरिदेवतायाः
पुण्यानुबंधिकुशलं यदिमां[1] मयाप्तं ।
सर्वोपि तेन भवतादुपदेशमाला-
प्रोक्तार्थसाधनपरः खलु जीवलोकः ॥ ३
॥ उपदेशमालाविवरणं समाप्तं ॥

भगवद्गीर्देवतायानिभमात्रदुर्गस्वामिगुरुशिष्यसहर्षिचरणरेणो सिद्धसाधोः ॥ ग्रंथाग्रं ३९०० ॥ संवत् १३८३ वर्षे कार्तिकशुदि १३ शनौ अद्येह श्रीदेवगिरौ साधुराजसीहसुतसाधुतिहुणसिंहेन श्रीमदुपदेशमालालघुवृत्तिपुस्तिका लिखापिता ॥ यादृशं पुस्तके दृष्टं० ॥ मंगलमस्तु ॥

286. Acharangachurni [आचारांगचूर्ण्णिः].

Folios 1 to 292: 15½ inches long, 2 inches broad. 8 to 12 lines in a folio. 79 to 82 aksharas in a line. Numbered as 183. Folio 191. R. सू ६३ १ L. १९१. The "granthâgra" is given as 8300. Dated Saṃvat 1303 = A.D. 1247. The donor of this copy is celebrated in a praśasti of 21 ślokas.

287. Pandavacharitra by DEVAPRABHASÛRI [पाण्डवचरित्रम् देवप्रभसूरिः].

Folios 1 to 263: 34½ inches long, 2½ inches broad. 10 to 14 lines in a folio. 130 to 135 aksharas in a line. Numbered as 183. Folio 263. R. सू ६३ २ L. २६३.

[1] यदिदं?

The first folio is defective, and the beginning is supplied on paper as follows:

ॐ नमः सर्वज्ञाय ।

श्रियं विश्वत्रयत्राणनिष्णः पुष्णातु वः प्रभुः ।
शंकरः पुंडरीकाक्षः श्रीमन्नाभिसमुद्भवः ॥ १

पुण्यप्रसूतिः श्रीनेमेः पातु वो देशनागवी ।
घासः स्मरादयो यस्याः क्षीरं मोक्षसुखं पुनः ॥ २

पार्श्वनाथः स वः पायाद्यदंगद्युतिसागरे ।
प्रवालकंदलायंते फणिरत्नप्रभांकुराः ॥ ३

जयंति वर्द्धमानस्य जितदंभोलिवैभवाः ।
मोहांधतमसध्वंसहेलयः सत्त्वकेलयः ॥ ४

चरित्रं पांडुपुत्राणां पवित्रमभिदध्महे ।
श्रुतं हितोपदेशाय यज्ज्ञाने पर्यवस्यति ॥ ५

Ends:

महाकाव्यमेतद्धिनोतु ॥ २८

इति मलधारिश्रीदेवप्रभसूरिविरचिते पांडवचरिते महाकाव्ये बलदेवस्वर्गगमनश्रीनेमिनाथपांडवनिर्वाणवर्णनो नाम अष्टादशः सर्गः ॥

श्रीकोटिकाख्यगणभूमिरुहस्य शाखा
या मेध्यमेत[1] विदिता विटपोपमेस्याः ।
श्रीप्रश्नवाहनकुले सुमनोभिरामः
ख्यातोस्ति स्वच्छ इव हर्षपुरीयगच्छः ॥ १

तत्राजनि श्रुतसुधांबुधिरिंदुरोचिः-
स्पर्द्धिष्णुकीर्त्तिविभवोऽभयदेवसूरिः ।

---

[1] मध्यमेति ?

शांतात्मनोप्यहह निस्पृहचेतसोपि
यस्य क्रियाखिलजगज्जयिनी बभूव ॥ २

बद्धक्रीड इवावतीर्य परमज्योतिर्विवर्त्तः क्षितौ
तत्पट्टे वरचंद्रमाः समजनि श्रीहेमसूरिप्रभुः ।

चित्रं यद्वचनामृतानि नृपतिः श्रीसिद्धराजः पपौ
विश्वेषामपि लेभिरे तनुभृतामायूंषि वृद्धिं पुनः ॥ ३

तस्यापदे[1] मदनादिद्विषि जयी विजयसिंहसूरिरभूत् ।
यद्वपुषि स्पर्द्धाभूल्लावण्यामृतशमामृतयोः ॥ ४

श्रीचंद्रसूरिरभवत्तदीयपदभूषणं गुणैकनिधिः ।
विद्यायाश्च मदस्य च येन वितेने चिरवियोगः ॥ ५

धर्मज्ञानविवेकसंयमतपःसंकेतकेलीगृहं
स श्रीमान्मुनिचंद्रसूरिरभवत्तत्पट्टभूषामणिः ।

ब्रूमस्तस्करपुष्करस्य महिमा किं नाम यत्सौरभै-
र्गण्यंते वत सादृश अपि[2] जनैः संख्यासु संख्यावतां ॥ ६

श्रीदेवप्रभसूरिर्बभूव तच्चरणकमलरोलंबः ।
येन कलैः कीर्तिरवैरभितो मुखरीकृतं भुवनं ॥ ७

मुनिचंद्रसूरिपट्टे श्रीदेवानंदसूरयोभूवन् ।
स्तोत्राय यद्गुणानां ध्रुवं न वेधा अपि सुमेधाः ॥ ८

तेषां[3] कल्पतरुत्रिपिष्टपगवीचिंताइमवैहासिका-
दादेशात्कविमार्गवल्गनकलानैपुण्यभून्यैरपि ।

---

[1] तस्य पदे ? [2] बत मादृशा अपि ? [3] कल्पतरुत्रिविष्टपगवी° ?

श्रीदेवप्रभसूरिभिः पोडोश्चरित्रं[1] किम-
प्येतद्विबुधादिशिष्यहृदयोल्लासार्थमभ्यर्थते[2] ॥ ९
श्रीयशोभद्रसूरीणां तथात्र व्यातृतादृशः[3] ।
यथैतदगमत्सर्वं विद्वल्लोकावलोक्यतां ॥ १०
ज्ञानैकमयमूर्त्तनामस्मिन्नवरसान्विते ।
श्रीनरचंद्रसूरीणां प्रज्ञया कृतधाधितं[4] ।
प्रीत्यावलोकनेनैव कर्णक्रोडनवातिथेः ।
कर्तुमातिथ्यमर्हति ग्रंथस्यास्य मनीषिणः ॥ १२

मंगलं महाश्रीः ॥

288. Katharatnakosa by DEVABHADRASÛRI [कथारत्नकोशः । देवभद्रसूरिः].

Folios 1 to 317 : 34¼ inches long, 2¾ inches broad. 8 to 10 lines in a folio. 120 to 135 aksharas in a line. Numbered as 183. Folio 308. R. स्ता ० L. ३०८. Dated Saṃvat 1286 = A.D. 1230. र्श्रो

Begins :

ॐ नमो जिनागमाय ॥

पडिबिंबियपणयजणनिलीणभवभीरुभव्वलोयच्च ।
उम्मुहमऊहनिवहसिवभवणारोहसेणिव्व ॥ १
भीमभवोयहिलंघणसज्जासज्जाणवत्तपतिव्व[5] ।
चरणनहमालिया सहइ जस्स सो जयइ पढमजिणो ॥ २
सुमणोभिरामरूवो चारुयडं सुरहिवयणसयवत्तो ।
जयइ सिवनयरिपत्थियमंगलकलसोव्व वीरजिणो ॥ ३

---

[1] पोडोश्चरित्रं is evidently for पांडोश्चरित्रं. But the pâda is also defective in four syllables. Some such word as सुकृतिभिः may have followed, and been by the scribe confounded with सूरिभिः.

[2] °ग्रंथ्यत? [3] व्यातृता दृशः? [4] कृतकायितं? [5] पंत्तिव्व?

स जयइ पुणोवि दुज्जयकसायसरहोलिविहलिउच्छाहो ।
लंठणछलेन भीउव्व केसरी जं समल्लीणो ॥ ४

भववारयबंधं बंधुणोव्व अवणिं तुवोवसेवावि ।
जिणवइणो मोहमहंधयारहरणंमि रविणो व्व ॥ ५

पासस्स फणामणिणो उंमुहपसरंतकंतिणो दूरम् ।
विहियावट्टियदीवूसवव्व तिमिरं हरंतु ममं ॥ ६

जयइ विलसंतनिंमलमऊहमंडलपसाहियसरीरा ।
पग्गहियपारिवेसव्व ससिकला भयवई वाणी ॥ ७

ससिरीया सच्चाहिट्ठिया य सच्चक्कनंदया सुगया ।
गुरुणो हरिणो व्व कुणंतु वंछियं निच्छियं मज्झ ॥ ८

इत्थं थोयव्वथुईईसामत्थेणं जडोवि जंपेमि ।
संमत्ताइपयत्थप्पडिबद्धकहारयणकोसं ॥ ९

एत्थय जिणिंदसमयंमि संमया मुत्तिपहपवित्तीए ।
सुमुणी सुसावगो चिय जहुत्तकिरियाकलावन्नू ॥ १०

सुमुणित्तणं च पायं सुसावगत्तं विणा न संभवइ ।
पत्तसिय देसचरित्तो हि सव्वविरइंपि काउमलं ॥

सामन्नविसेसगुणन्निउ य सुसावगत्तणं लहइ ।
सो पुण सामन्नगुणी नेउं संमाइदारेहिं ॥ १२

Folio 10. R. $\frac{\text{ल्ँ}}{\text{०}}$ L. १०. इति श्रीकथारत्नकोशे सम्यक्त्वाधिकारे नरवर्मनृपकथानकं समाप्तं ।...

Folio 13. R. $\frac{\text{ल्ँ}}{\text{३}}$ L. १३. इति० सम्यक्त्वातिचारचिंतायां शंकादोषे धनदेवकथानकं समाप्तं ।...

Folio 15. R. ल्लं L. १९. इति० सम्यक्त्वचिंतायां द्वितीयातिचारप्रक्रमे नागदत्तकथानकं समाप्तं ॥...

Folio 18. R. ल्लं श्रा L. १८. इति स० तृतीयातिचारप्रक्रमे गंगवसुमत्याः कथानकं समाप्तं ॥...

Folio 27. R. थ्थं L. २७. इति श्रीक० पंचमातिचारे रुद्राचार्यकथानकं समाप्तं ॥...

Folio 33. R. ला ३ L. ३३. इति श्रीक० षष्ठातिचारप्रक्रमे भवदेवराजर्षिकथानकं समाप्तं ॥...

Folio 39. R. ल्ला L. ३९. इति० सप्तमातिचारे धनकथानकं समाप्तं.

Folio 46. R. म्मं L. ४६. इति० अष्टमातिचारे अचलकथोक्त्या सम्यक्त्वपटलं समाप्तं ॥...

Folio 55. R. ६ र्नृ L. ५५. इति० पंचनमस्कारे श्रीदेवनृपकथानकं समाप्तं ॥...

Folio 64. R. र्थ्थं L. ६४. इति० चैत्याधिकारे विजयकथानकं समाप्तं ॥...

Folio 75. R. र्थ्थं L. ७५. इति० जिनबिंबप्रतिष्ठाप्रक्रमे महाराजपद्मकथानकं समाप्तं ॥...

Folio 85. R. ७ र्नृ L. ८५. इति० पूजाधिकारे प्रभंकरकथानकं समाप्तं ।.

Folio 90. R. ६७ ० L. ९०. इति० देवद्रव्यचिंताधिकारे भ्रातृद्वयकथानकं समाप्तं ॥...

Folio 98. R. ६७ श्रा L. ९८. इति० शास्त्रश्रवणाधिकारे श्रीगुप्तकथानकं समाप्तं ॥...

Folio 105. R. ॐ नमः L. १०५. इति० ज्ञानदानावसरे धनदत्तकथानकं समाप्तं ॥...

Folio 111. R. ॐ नमः सिद्धेभ्यः L. १११. इति० अभयप्रदानप्रस्तावे जयराजर्षि-कथानकं समाप्तं ॥...

Folio 118. R. ॐ नमः सिद्धेभ्यः L. ११८. इति० यत्यवष्टंभदाने सुजयराजर्षिक-थानकं समाप्तं ॥...

Folio 125. R. ॐ नमः सिद्धेभ्यः L. १२५. इति० कुग्रहत्यागे विमलोपाख्यानकं स-माप्तम् ॥...

Folio 131. R. ॐ नमः सिद्धेभ्यः L. १३१. इति० माध्यस्थगुणचिंतायां पुरोहितसुत-नारायणकथानकं समाप्तं ॥...

Folio 136. R. ॐ नमः सिद्धेभ्यः L. १३६. इति० सामर्थ्यगुणचिंतायाममरदत्तक-थानकं समाप्तं ।...

Folio 142. R. ॐ नमः सिद्धेभ्यः L. १४२. इति० धर्मार्थव्यतिरेकचिंतायां सुंदरक-थानकं समाप्तं ॥...

Folio 147. R. ॐ नमः सिद्धेभ्यः L. १४७. इति० आलोचकपुरुषव्यतिरेके धर्मदेव-कथानकं समाप्तं ॥...

Folio 155. R. ॐ नमः सिद्धेभ्यः L. १५५. इति० उपायचिंतायां विजयदेवकथानकं समाप्तं ॥

Folio 162. R. सु २ थु L. १६२. इति० उपशांतप्रक्रमे सुदत्तकथानकं स-
समाप्तं ॥ २५...

Folio 167. R. सु थु मो L. १६७. इति० दक्षत्वगुणचिंतायां सुरशेखरराज-
पुत्रकथानकं समाप्तं ॥ २६...

Folio 171. R. सु थु १ L. १७१. इति० दाक्षिण्यचिंतायां भवदेवकथानकं
समाप्तं ॥ २७...

Folio 176. R. सु थु कु L. १७६. इति० धैर्यगुणचिंतायां महेंद्रनृपकथानकं
समाप्तं ॥ २८...

Folio 180. R. सु ८ ० L. १८०. इति० गांभीर्यगुणचिंतायां विजयाचार्य-
कथानकं समाप्तं ॥ २९...

Folio 185. R. सु ८ नै L. १८५. इति० इंद्रियपंचकविजयव्यतिरेकवर्त्तना-
यां सुजसश्रेष्ठिसुतकथानकं समाप्तं ॥ ३०...

Folio 192. R. सु ६३ २ L. १९२. इति० पैशून्यगुणदोषचिंतायां धनपाल-
बालचंद्रकथानकं सामाप्तं ॥

Folio 199. R. सु ६३ मै L. १९९. इति० परोपकारद्वारचिंतायां भरतकथा-
नकं नमाप्तं ॥ ३२...

Folio 206. R. सू ० कु L. २०६. इति० विनयद्वारव्यावर्तनायां सुलसकथा-
नकं समाप्तं तत्समाप्तौ धर्माधिकारिसामान्यगुण-
कथनापि त्रयस्त्रिंशद्वारप्रमाणा समाप्तेति ॥...

Folio 212. R. सू० २ ले० L. २१२. इति० प्रथमाणुव्रतचिंतायां यज्ञदेवकथानकं समाप्तं ॥...

Folio 219. R. सू० ३ ले० L. २१९. इति० द्वितीयाणुव्रतचिंतायां सागरकथानकं समाप्तं ॥...

Folio 225. R. सू० ४ ले० L. २२५. इति० तृतीयाणुव्रतगुणचिंतायां फरुसरामकथानकं समाप्तं ॥ ३६...

Folio 232. R. सू० २ ला० L. २३२. इति० चतुर्थाणुव्रतचिंतायां सुरप्रियकथानकं समाप्तं ॥...

Folio 240 R. सू० ५ L. २४०. इति० पंचाणुव्रतविचारणायां धरणकथानकं समाप्तं ॥...

Folio 249. R. सू० १ पू० L. २४९. इति० प्रथमगुणव्रतचिंतायां शिवभूतिस्कंदयोराख्यानकं समाप्तं ॥ ..

Folio 256. R. सू० २ दि० L. २५६. इति० भोगोपभोगव्रतचिंतायां सकुटुंबमेहश्रेष्टिकथानकं समाप्तं ॥...

Folio 263. R. सू० ३ शु० L. २६३. इति० अनर्थदंडविरतिचिंतायां चित्रगुप्तकथोक्त्या गुणव्रतत्रयं समाप्तं ॥...

Folio 269. R. सू० ४ शु० L. २६९. इति० शिक्षाव्रतविचारणायां सामान्यप्रक्रमे [1]धरथकथानकं समाप्तं ॥...

[1] घनरथ°?

Folio 275. R. सू १ L. २७९. इति० शिक्षाव्रतविचारणायां देशावकाशिकविषये पवनंजयकथानकं समाप्तं ॥...

Folio 280. R. सू ७ L. २८०. इति० तृतीयाशिक्षाव्रतविचारणायां ब्रह्मदेवकथानकं समाप्तं ॥...

Folio 287 R. सू ७ L. २८७. इति० अतिथिसंविभागव्रतविषये नरदेवकथानकमुक्तं ॥...

Folio 292. R. सू ६३ L. २९२. इति० द्वादशावर्त्तवंदनकफलवर्त्तनायां शिवचंद्रचंद्रदेवकथानकं समाप्तं ॥...

Folio 296. R. सू ६३ L. २९६. इति० प्रतिक्रमणगुणचिंतायां सोमदेवकथानकं समाप्तं ॥...

Folio 303. R. स्ता ० L. ३०३. इति० कायोत्सर्गविधानचिंतायां सशिराजकथानकं समाप्तं ॥...

इति० प्रत्याख्यानव्यतिरेकचिंतायां भानुदत्तकथानकं समाप्तं ॥...

Ends:

सूरीपसन्नचंदो न नामउ अत्थउवि परं ।
तस्सेव गेहिं सिरिसुमइवायगाणं विणेयलेसेहिं ।
सिरिदेवभद्दसूरीहिं पसरइउ कहाकोसो ।
संघधुरंधरसिरिसिद्धवीरसेट्ठीण वयणउ ।
जेहिं चरियं चरिमजिणिंदस्स व रइयं वीरनाहस्स ॥

परिकम्मिऊण विहियं च जे हिंसइ भव्वलोगपाउग्गं ।
संवेगरंगसालाभिहाणमाराहणारयणं ॥

कंचलकलसविहूसियमुणिसुव्वयभुवणमंडियंमि पुरे ।
भरुयत्थे तेहिं इएहिं एस नीई परिसमत्ति ॥

वसुबाणरुद्दसंखे वच्चंते विक्कमाउ कालंमि ।
लिहिउं पढमंमि य पोत्थयंमि गणिअमलचंदेण ॥

अलं बहुभणिएण ॥

यदिह जगदे किंचिन्मोहान्मया समयाद्वहि-
र्यदपि सुकविक्षुण्णान्मार्गाद्वचोभिदधेऽन्यथा ।
तदुदितकृपैः सद्भिस्त्यक्त्वात्तथैष विशोध्यतां
भवति कथिकाकोशः पंथा यथा सिवसद्मनः ॥ १

यत्कृत्वेदं त्रिकरणजयात्पुन्यमस्माभिरार्जं
तेनैवैतच्छ्रवणपठनाख्यानचिंतैकचित्ताः ॥
संतः संतु प्रतिसभमितश्चाप्तमोहव्यपोहा
भूयो भूयो जिनपतिमते बोधिसिद्धिं लभंताम् ॥ २

जीयासुः शशिनीलकांचनजपामेघोपमांगत्विषः
श्रीमन्नाभितनूद्भवप्रभृतयः सर्वेपि तीर्थेश्वराः ।
गीरंबा च सुदर्शना च विदिता देव्योपि काल्यादयो
भूयासुर्जिनसासनस्य सततं प्रोत्सर्पणाद्धेतवे ॥ ३

इति बहुविधवाक्यानेकमाणिक्यपूर्णा-
गमजलनिधिलब्धैरर्थलेशैर्निबद्धः ।
तदपि निहतभूतिप्राणिदौर्गत्यदुःखो
जयतु सततमेष श्रीकथारत्नकोशः ॥ ४

इति प्रव्रज्यार्थचिंतायां श्रीप्रभप्रभाचंद्रचरितमुक्तं तदुक्तौ च सम्यक्त्वादिपंचाशदर्थाधिकारसंबद्धः कथारत्नकोशोपि समाप्तः ॥

मंगलं महाश्रीः ॥ शिवमस्तु सर्वजगतः ० ॥

संवत् १२८६ वर्षे श्रावणसुदि ३ बुधेऽद्येह प्रल्हादनपुरे कथारत्नकोशपुस्तकमलेखीति भद्रमिति ॥

289. Avasyakachurni [आवश्यकचूर्णि.].

Folios 1 to 268: 37 inches long, 2¾ inches broad. 10 to 12 lines in a folio. 115 to 120 inches in a line. Contains the first khaṇḍa of the work.

290. Dasasrutaskandhachurni [दशाश्रुतस्कन्धचूर्णिः].

Folios 1 to 164: 27 inches long, 2 inches broad. 8 to 10 lines in a folio. 91 to 95 aksharas in a line. Numbered as 183. Folio 164. R. सु र्चु फ्रै L. १६४. Dated Saṃvat 1328 = A.D. 1272.

Begins:

ॐ नमः सर्वज्ञाय ॥

नमो अरहंताणं । णमो सिद्धाणं णमो आयरियाणं । णमो उवज्झायाणं । नमो लोए सव्वसाहूणं । सुतं मे आउसंतेणं भगवता एवमक्खातं इह खलु थेरेहिं भगवंतेहिं असमाहिट्ठाणा पन्नत्ता ॥

Ends:

जात्यंधाः ससंकंठाः जावणयावि । जावकरणणयो ॥ सव्वेसिंपि-णयाणं गाधा ॥ दशानां चूर्णी परिसमाप्ता ॥

अनुष्टुप्छंदोहेशेन श्लोक २२२५

संवत् १३२८ वर्षे आषाढशुदि १२ गुरौऽद्येह षयरोदुग्रामवास्तव्य ठ० चंडसुत ठ० लक्ष्मणेन दशाश्रुतस्कंधस्य चूर्णिर्लिखिता ॥

291. Yogasastravivarana by HEMACHANDRA [योगशास्त्र-विवरणम् । हेमचन्द्र].

Folios 1 to 323 : 34½ inches long, 2⅔ inches broad. 10 to 16 lines in a folio. 110 to 115 aksharas in a line. The "granthâgra" is given as 12,000. Numbered as 183. Folio 323. R. स्ता ४ ३ L. ३२३.

292. Siddhaprabhrita with **Commentary** [सिद्धप्राभृतं सटीकम्].

Folios 1 to 20 : 34 inches long, 2½ inches broad. 10 to 12 lines in a folio. 145 to 162 aksharas in a line.

Text begins :

तिहुयणपणए तिहुयणगुणाहिपति

Text ends :

वीसुत्तरसयमंगं गाधाबंधेण पुव्वणिस्संदं ।
वित्थारेण महत्थं सुयाणुसारेण णेयव्वं ॥ ११८

वीसुत्तरसयगणणाम सिद्धपाहुडं सम्मत्तं ॥ अग्गेण पुव्वणिस्संदं ॥

Commentary begins :

ॐ नमः सर्वज्ञाय ।

सकलभुवनेशभूताञ्निखिलातिसयान् जिनान् गुरून् स्तुत्वा ।
सिद्धप्राभृतटीका तदर्थहितकाम्यया क्रियते ॥ १

Commentary ends :

णवरं पूर्वस्याग्रेणीयाख्यस्य निष्यंद इदं सिद्धप्राभृतमिति ।
गाथासंयोजनार्थोयं प्रयासः केवलो मम ।
अर्थः सूक्तः स्फुटो ह्येष टीकाकृद्भिश्चिरंतनैः ॥
सिद्धप्राभृतं समाप्तं ॥ मंगलं महाश्रीः ॥

293. Munisuvratacharitra by MUNIRATNA [मुनिसुव्रतचरित्रम् । मुनिरत्नः].

Folios 1 to 193: 34 inches long, 2½ inches broad. 8 to 10 lines in a folio. 140 to 150 aksharas in a line.

Begins:

॥ ॐ नमः सर्वज्ञाय ॥

पायात्पदनखश्रेणिर्मणिस्वच्छा जिनोस्य[1] वः ।
धर्मस्य दशरूपस्य या क्रीडा दर्पणायते ॥ १

Ends:

८३ इत्याचार्यश्रीमुनिरत्नविरचिते श्रीमुनिसुव्रतचरिते महाकाव्ये अश्वावबोधस्कंदकाचार्यकार्त्तिकयथाविस्तारिविहारस्वामिनिर्वाणस्वरूपवर्णनस्त्रयोविंशः सर्गः ॥ समाप्तं चेदं मुनिसुव्रतचरितं । मंगलं महाश्रीः ॥ ६८०६

294. Jambudvipaprajnaptichurni [जंबूद्वीपप्रज्ञप्तिचूर्णिः].

Folios 2 to 122: agreeing in all respects with No. 293.

Ends:

जंबूद्दीवपण्हकरणाणं चूर्ण्णी सम्मता ॥ ग्रंथसर्वसंख्याश्लोक ६३२३.

295. Trishashtisalakapurushacharitra by HEMACHANDRA [त्रिषष्टिशलाकापुरुषचरित्रांतर्गतमष्टमं पर्व । हेमचन्द्रः].

Folios 1 to 129: 35¾ inches long, 2¼ inches broad. 6 to 12 lines in a folio. 102 to 110 aksharas in a line. Numbered as 183. Folio 129. R. सु थ र्ज्ञा L. १२९. Dated Samvat 1391 = A.D. 1335. Contains the eighth parva of the work.

Ends:

समस्तनिर्ग्रंथचक्रचूडामणिश्रीकृष्णराजर्षिगच्छे सुविहितशिरोमणिश्रीपद्मचंद्रोपाध्यायान्वये भट्टारकश्रीपृथ्वीचंद्रसूरयस्तत्पट्टांबरदिनकरश्रीप्रभानंदसूरीणां सदुपदेशेन समस्तपृथ्वीतलाख्ये सुचिंतितगो-

[1] जिनस्य?

पवित्रिते सा० क्षेमंधरपुत्रः सा० धनचंद्रमुनिचंद्रदेपालाभिधाः धनचंद्रसुतौ षीमसींहकालाभिधौ मुनिचंद्रसुताः । छीहिल नोलू सोमसीह हालाभिधा षीमसीहपुत्रौ लाडणनरपालौ सोमसीहपुत्राः सा० धरणिग-आसपाल दूलह काल्ह पारश्वाभिधानाः तैः सद्गुरूणामुपदेशलेशं निशम्य संसारासारतां विचार्य संवत् १३९१ वर्षे स्वमातुः सोनश्री-श्रेयोर्थं गृहीतमिदं नंदताद्दाचंद्रार्कं वाचकग्राहकैः सह ॥

296. The same [तदेव सप्तमं पर्व].

Folios 1 to 223: agreeing in all respects with No. 295. Folio 223.

R. $\frac{\text{सू}}{\text{ई}}$ L. २२३. Contains the seventh parva of the work.

297. Sabdanusasana by HEMACHANDRA [शब्दानुशासनम् । हेमचन्द्रः].

Folios 1 to 212: $7\frac{3}{4}$ inches long, $1\frac{1}{2}$ inches broad. 8 to 10 lines in a folio. 32 to 34 aksharas in a line. Numbered as 183. Folio 212.

R. $\frac{\text{सू}}{\text{ई}}$ L. २१२. Goes down to the second pâda of the third adhyâya of the work.

298. Commentary on the above portion of the **Sabdanusasana** (तस्यैव टीका).

Folios 1 to 228: $10\frac{1}{2}$ inches long, 2 inches broad. 8 to 16 lines in a folio. 40 to 44 aksharas in a line.

299. Samyaktvaprakarana by CHANDRAPRABHASÛRI with the **Great Commentary** [सम्यक्त्वप्रकरणम् सवृहद्वृत्ति । चन्द्रप्रभसूरिः].

Folios 1 to 200: 34 inches long, $2\frac{1}{2}$ inches broad. 8 lines in a folio. 105 to 115 aksharas in a line. Incomplete and injured.

Commentary begins:

नमः श्रीपंचपरमेष्ठिभ्यः ॥

यद्वक्त्रांभोजवाप्याः स्फुटवचनघटीयंत्रचारेण निर्य-
त्सूरिश्रेणिप्रणालीप्रणयिगुणगणप्रोच्छलच्छीकरौघं ।

तत्त्वांभोऽद्यापि सिंचत्सफलयतितमां शासनोद्यानमेत-
त्तं भक्त्या नौमि नम्रस्त्रिजगदधिपतिं श्रीजिनं वर्द्धमानं ॥

Text begins:

पत्तभवन्नवतीरं दुहदवनीरं सिवंबतरुकीरं ।
कंचणगोरसरीरं नमिऊण जिणेसरं वीरं ॥ १

वुच्छं तुच्छमईणं अणुग्गहत्थं समत्थभव्वाणं ।
संमत्तस्स सरूवं संखेव — — — — महं ॥ २

300. Jnatasutrapramukhashadangavritti by ABHAYADEVASÛRI [ज्ञातासूत्रप्रमुखषडंगवृत्तिः । अभयदेवसूरिः].

Folios 1 to 472: 36 inches long, 2½ inches broad. 8 lines in a folio. 138 to 145 aksharas in a line. Numbered as 183. Folio 472. R. स्तै ६ ७ २ L. ४७२. Dated Samvat 1292 = A. D. 1236.

301. Upamitibhavaprapancha Katha by SIDDHARSHI [उपमितिभवप्रपञ्चा कथा । सिद्धर्षिः].

Folios 1 to 393: 32½ inches long, 2½ inches broad. 10 to 12 lines in a folio. 115 to 123 aksharas in a line. Numbered as 183. Folio 393. R. स्ता ६ ३ ३ L. ३९३.

Begins:

ॐ नमः सिद्धेभ्यः ॥

नमो निर्नाशिताशेषमहामोहाहिमार्त्तये ।
लोकालोकामलालोकभास्वते परमात्मने ॥ १

Ends:

तत्साधुभिः कृतकृपैर्मयि शोधनीयं ॥
पार्श्विलसाधोरपि लिखितं तथा ॥

इत्युपमितभवप्रपंचायां कथायां पूर्वसूचितमीलकवर्णनो नामाष्टमः प्रस्तावः समाप्तः ॥ समाप्ता चेयमुपमितभवप्रपंचा कथेति ॥

द्योतिताखिलभावार्थः सद्भव्याब्जप्रबोधकः ।
सूराचार्योऽभवद्दीप्रः साक्षादिव दिवाकरः ॥

आचारपंचकोद्युक्तः प्रसिद्धो जगतीतले ।
अभूद्भूतहिते धीरस्ततो देल्लमहत्तरः ॥

ज्योतिर्निमित्तशास्त्रज्ञः प्रसिद्धो देत्सविस्तरः[1] ।
ततोभूदुल्लसत्कीर्तिर्ब्रह्मगोत्रविभूषणः ॥

दुर्गस्वामिमहाभागः प्रख्यातः पृथिवीतले ।
प्रव्रज्यां गृह्णता येन गृहं सद्धनपूरितं ॥

हित्वा सद्धर्ममाहात्म्यं क्रिययैव प्रकाशितं ।
यस्य तच्चरितं वीक्ष्य शशांककरनिर्मलं ॥

बुद्धास्तत्प्रत्ययादेव भूयांसो जंतवस्तदा ।
सद्दीक्षादायकं तस्य स्वस्य चाहं गुरूत्तमं ॥

नमस्यामि महाभगं गर्गर्षिमुनिपुंगवं ।
क्लिष्टेपि दुःखमाकाले यः पूर्वमुनिचर्चया ॥

विजहारेह निःसंगो दुर्गस्वामी धरातले ।
सद्देशनांशुभिर्लोके द्योतित्वा भास्करोपमः ॥

श्रीभिल्लमाले यो धीरो गतोस्तं सद्विधानतः ।
तस्मादतुलोपशमः सद्दार्षिरभूदनाविलमनस्कः ।
परहितनिरतैकमतिः सिद्धांतनिधिर्महाभागः ॥

विषमभवगर्त्तनिपतितजंतुशतालंबदानदुर्ल्ललितः ।
दलिताखिलदोषकुलोपि सततकरुणापरीतमनाः ॥

---

[1] देशविस्तरः?

यः संग्रहकरणरतः सदुपग्रहनिरतबुद्धिरनवरतं ।
आत्मन्यतुलगुणगणैर्गणधरबुद्धिं विधापयति ॥
बहुविधमपि यस्य मनो निरीक्ष्य कुंदेंदुविशदमद्यतनाः ।
मन्यंते विमलधियः सुसाधुगुणवर्णनं सत्यं ॥
उपमितिभवप्रपंचा कथेति तच्चरणरेणुकल्पेन ।
गीर्देवतया विहिताऽभिहिता सिद्धाभिधानेन ॥

अथवा ।

आचार्यहरिभद्रो मे धर्मबोधकरो गुरुः ।
प्रस्तावे भावतो हंत स एवाद्ये निवेदितः ॥

विषं विनिर्ज्जूय कुवासनामयं
व्यचीचरद्यः कृपया सदाशये ।
अचिंत्यवीर्येण सुवासनासुधा-
न्नतोस्मि तस्मै हरिभद्रसूरये ॥

अनागतं परिज्ञाय चैत्यवंदनसंभ्रया ।
मदर्थेन कृता येन वृत्तिर्ललितविस्तरा ॥
यत्रातुलरथयात्राधिकमिदमिति लब्धवरजयपताकम् ।
निखिलसुरभुवनमध्ये सततप्रमदं जिनेंद्रगृहं ॥
यत्रार्थाष्टंकशालायां धर्मः सहेवधामसु ।
कामो लीलावतीलोके सदास्ते त्रिगुणो मुदा ॥
तत्रेयं तेन कथा कविना निःशेषगुणगणाधारे ।
श्रीभिल्लमालनगरे गदिता जिनमंडपस्थेन ॥
प्रथमादर्शे लिखिता साध्व्या श्रुतदेवतानुकारिण्या ।
दुर्गस्वामिगुरूणां शिष्यिकयेयं गणाभिधया ॥

संवत्सरशतनवके द्विषष्टिसहितेतिलंघिते चास्याः ।
ज्येष्ठेसितपंचम्यां पुनर्वसौ गुरुदिने समाप्तिरभूत् ॥
मंगलं महाश्रीः ॥

aśasti of the donor of the book :

॥ श्रीमालाचलमौलिमूलमिलितत्रैलोक्यसुश्लाघितः
पर्वालीकलितः सुवर्णनिलयः प्रासादलब्धालयः ।
लीनाभ्यकुलः (sic) प्रलीनकलुषः शुभ्रातपत्रानुगो
वंशोस्ति प्रगटः सदौषधनिधिः श्रीधर्कटानां पटुः ॥ १
सारासारविचारचारुचतुरः सारार्थबद्धादरः
संसारोदरवर्त्तिजंतुशरणश्रीमज्जिनार्चापरः ।
कारुण्याकरसद्गुरुस्तुतिवशप्राप्तार्थदानोद्यत-
स्तत्रात्मीयकुलक्रमोचितरतः सच्चेमिचंद्रोभवत् ॥ २
तस्यानघा घनपयोधरयुग्मरम्या
रामानुरूपगुणरंजितभर्तृचित्ता ।
चिंताव्यतीतफलदायकधर्मलीना
निर्वाणनामविदिता जनतासु पत्नी ॥ ३
जीवाजीवपदार्थसार्थवचनः संपूर्णचंद्राननः
सर्वाधीनधनः सलीलगमनः क्रोधेभपंचाननः ।
नैपुण्यार्जितसज्जनः प्रतिदिनप्रारब्धदानावनः
सूनुः श्लाघितसर्वदेवभुवनख्याताभिधानस्तयोः ॥ ४
देवेन केनापि कदाचिदेष
नीतो रजन्यां स्वगृहात्प्रसुप्तः ।
अष्टापदे वंदितवान् जिनेंद्रान्
प्रातः स्वहस्ते कुसुमं ददर्श ॥ ५

सदा दानाशक्ता[1] स्वकुलविमलाचारनिरता
सुशीलप्रख्याता परहितरता दैन्यरहिता ।
अमानातिक्रांता गुणगणयुता सज्जनमता
सदच्छुभ्रानामा वरसहचरी तस्य च तयोः ॥ ६

लक्ष्मीपतिः सुतनयोऽजनि यक्षदेवः
श्रीराजिनीनयनसंमद आम्रदेवः[2] ।
धीधीमनोभवनदीपकचांदिगाख्या-
स्तुर्या[3] यशोमतिवधूप्रियपुंडरीकः ॥ ७

चतुर्भिरेभिर्जिनधर्मलीनै-
र्विभावितागाधभवाब्धिभावैः ।
व्यधायि धंधाणकसंनिवेशे
शरण्यचंद्रप्रभदेवहर्म्यं ॥ ८

प्रत्याख्यानं येन कृत्वौदनादेः
पङ्क्तां निर्गत्योज्जयंते नगेंद्रे ।
श्रीमच्चेमिर्वंदितः पूजितश्च
क्षिप्रं भूयाद्यक्षदेवः ससौख्यं ॥ ९

यक्षदेवस्य तस्याद्यमी[4] जातवान्
चारुपुत्रः प्रियः शांतनामादिमः ।
धर्मकर्मा सुशीलाम्रदत्ताभिधः
क्रोधकोपोजितः [5]कमरुःपोजितः ॥ १०

धर्मार्थादिचतुःप्रकारपुरुषास्वार्थोद्यतस्यान्यदा
द्वौ द्वौ सुंदरभार्ययोर्वरसुतौ श्राद्धाम्रदेवस्य तौ ।

---

[1] दानसक्ता ? [2] आम्रदेवः? [3] चांदिगाख्यस्तुर्यो? [4] तस्माद्यमी ? [5] कामरूपो ?

संजातौ कुलजप्रियः[1] सुसरलौ पार्श्वाख्यमूणागकौ
राजन्या बुधलक्ष्मणो [2]गणनिधिर्नागेंद्रनामानघः ॥ ११

सन्नेमिचंद्रगुणमंदिरदेवचंद्र-
सूनुद्वयं व्यजनि चांदिगनामधेयः ।
प्रद्युम्नशंवकृतनामकमुज्ज्वलांगं
सत्पुंडरीकसुतयाजनि पुत्रयुग्मं ॥ १२

नागेंद्रः शुभधर्मकर्मनिरतः सन्मोहिनीभार्यया
पद्मावत्यभिधानया सरलया स्वस्रीयया संयुतः ।
वाहिन्या सुतया सुतेन गुणिना सुश्रीकुमारेण वै
शांतापत्ययशःप्रियानघयशोदेवेन धर्मार्थिना ॥ १३

अथान्यदा दानतपोविधान-
सुभावनाशीलसनाथधर्मे ।
जिनप्रणीते विदधन् प्रयत्नं
शृणोति धर्म्यं वचनं गुरुभ्यः ॥ १४

तद्यथा ।

निरवधिभववार्द्धौ कर्मदोषाङ्कमंतः
प्रवरशरणहीनो योनिलक्षेषु जीवाः ।
कथमपि त्रुटियोगान्मानुषं जन्मरत्नं
सकलगुणविशिष्टं कष्टलक्षैर्लभंते ॥ १५

प्राप्य तत्प्राणिभिः प्रार्थितार्थप्रदं
प्रेरणाप्रोद्यतप्रांजलप्रेरितैः ।
प्रत्यहश्चिंतयित्वा धनाद्यस्थिरं
कर्तुमेवोचितं चारु जैनं वचः ॥ १६

[1] कुलजप्रियौ? [2] गुणनिधिः?

प्राणातिपातविरतिप्रमुखानि यानि
जैनागमे निगदितानि महाव्रतानि ।
तानि क्षमो यदि न कर्त्तुमशक्तियोगा-
द्यूयं कुरुध्वममलं गृहिधर्ममेनं ॥ १७

कर्त्तव्यं जिनपुंगवस्य महनं स्तोत्रैश्च तत्संस्तवः
सेव्यः साधुजनः प्रसन्नवदनैः श्रव्यं जिनेंद्रोदितं ।
चिंत्या द्वादशभावना निजहिते कार्यः प्रयत्नो महान्
शक्त्या चान्यहिते भवाब्धितरणप्रत्युद्यतैः प्राणिभिः ॥ १८

मोहादिद्विपकुंभभेदनविधौ येषां सदा पौरुषं
कामित्वं कमनीयमुक्तिललनापीनस्तनस्पर्शने ।
न्यायोपात्तधनं गतं जिनमतक्षेत्रेषु सप्तस्वहो
तेषां पौरुषकामिता विभविता मन्ये कृतार्था भुवि ॥ १९

रम्ये श्रीजिनपुंगवस्य सदने बिंबे तदीयेऽनघे
संघे श्राध्यतमे प्रसस्तचरिते पूज्ये चतुर्वर्णके ।
सर्वज्ञागमलेखने विनिहितं वित्तं भवेदिष्टदं
सत्क्षेत्रे विधिनोप्तमिष्टसमये शाल्यादिबीजं यथा ॥ २०

ये कृत्वा जिनमंदिराणि विधिना संपूज्य वस्त्रादिभिः
श्रीसंघं समुपात्तनीतिविभवाः श्रद्धापराः श्रावकाः ।
स्याद्वादप्रतिबद्धवाक्यजनकश्रीचीररागेण[1] य-
न्निर्नीतं किल लेखयंति भविनः किं किं न तैः सत्कृतं ॥ २१

श्रुत्वा पुस्तकवाचनामनुदिनं गृह्णंति केचिद्व्रतं
देवाधीशजिनेंद्रपूजनपरा श्राद्धा भवेयुः परे ।

---

[1] श्रीवीतरागेण ?

अन्ये भद्रकभावभावितमनःसद्धर्मयोग्या नरा
जायंते खलु यस्य पुस्तकमिदं हेतुः स तच्छ्रेयसः ॥ २२ ॥

इत्याकर्ण्य जिनप्रणीतमनघं धर्मं गुरुभ्यस्ततः
पर्यालोच्य कुटुंबकेन गुणिना नागेंद्रनामा गृही ।
सिद्धाख्येन कृतां कथामुपमितिं सिद्धांतसारोद्धृतां
तोषादेष सुधीर्व्यलीलिखदिमां स्वश्रेयसे पुस्तके ॥ २३

यावन्मेरुः प्रतपति रविर्द्योतते यावदिंदु-
र्यावद्वायुः स्फुरति गगने तारकाः संति यावत् ।
यावद्भूमिः प्रवहति पयः सागरे यावदेत-
त्तावच्चंद्याद्गुणिभिरनिशं पुस्तकं वाच्यमानं ॥ २४

मंगलं महाश्रीः ॥

302. Kalpabhashya and **Kalpasutra** [कल्पभाष्यं । कल्पसूत्रं च].

Folios 137 to 252: 33½ inches long, 2¼ inches broad. 10 to 14 lines in a folio. 120 to 130 aksharas in a line. Numbered as No. 183.

Folio 252. R. सू ६ २ L. २५२.

Kalpabhâshya begins:

॥ नमः श्रीवर्धमानाय ॥

परिसए खित्तम्मीउ एस्स एक्केरिसंमि वसियव्वं ।
पुवुत्तदोसरहिए वीयाइ जढेससंबंधो ॥ १

Kalpabhâshya ends:

दीवणाय आराधणछित्तसंसारी ॥ सर्वसंख्या ग्रंथाग्रं ३९७०॥
कल्पभाष्यं समाप्तं ॥ मंगलमस्तु ॥

Kalpasûtra begins :

|| उवस्सयस्स अंतोवगडा यसालीणि वावी हीणिव ...
वितिउद्देश उसम्मत्तो ||

Kalpasûtra ends :

णोकप्पति निग्गंथाणं निग्गंथीणं उवस्सए आसइत्तए वा चिट्ठित्तए वा ।

जिणकप्पट्ठिई थेरकप्पट्ठित्तीत्ति बेमि || ६५
कप्पे छट्ठो उद्देसउ सम्मत्तो || ग्रंथाग्रं ३२१ सूत्रं ||

303. Avasyakatika by HARIBHADRÂCHÂRYA [आवश्यकटीका। हरिभद्राचार्यः].

Folios 1 to 227 ; agreeing in all respects with No. 302.

304. Chandraprajnaptitika by MALAYAGIRI [चन्द्रप्रज्ञप्तिटीका। मलयगिरिः].

Folios 1 to 249 : 34½ inches long, 1⅓ inches broad. 6 to 8 lines in a folio. 135 to 145 aksharas in a line. The "granthâgra" is given as 9500. Dated Samvat 1445 = A.D. 1389.

305. Chandraprajnaptisutra [चन्द्रप्रज्ञप्तिसूत्रम्].

Folios 1 to 50; agreeing in all respects with No. 304. The "granthâgra" given as 1854.

306. Laghusamgrahini by CHANDRASÛRI [लघुसंग्रहिणी। चन्द्रसूरिः].

Injured. 50 folios.

307. Strimokshavivada [स्त्रीमोक्षविवादः].

Injured. 25 folios.

308. Commentary on the **Abhidhanachintamani** by HEMACHANDRA [अभिधानचिन्तामणेटीका। हेमचन्द्रः].

Folios 1 to 323 : 31½ inches long, 1⅓ inches broad. 6 to 8 lines in a folio. 140 to 150 aksharas in a line. The "granthâgra" is given as 10,000. Numbered as 183. Folio 323. R. स्ता व L. ३२३.

309. Bhavabhavana, by HEMACHANDRA, with **Commentary** [भवभावना सटीका। हेमचन्द्रः].

Folios 1 to 325 ; 29 inches long, 2½ inches wide. 14 lines in a folio. 120 to 135 aksharas in a line. The "granthâgra" is given as 12,950. Dated Samvat 1249 = A.D. 1193.

श्रीप्रभवाहनकुलांबुनिप्रसूनः[1]
क्षोणीतलप्रथितकीर्तिरुदीर्णशाखः ।
विश्वप्रसाधितविकल्पितवस्तुरुच्चै-
श्छायाश्रितप्रचुरनिर्वृतभव्यजंतुः ॥ १

ज्ञानादिकुसुमनिचितः फलितः श्रीमन्मुनींद्रफलवृंदैः ।
कल्पद्रुम इव गच्छः श्रीहर्षपुरीयनामास्ति ॥ २

[2]तस्मिन् गुणगणरत्नरोहणगिरिर्गांभीर्यपाथोनिधि-
स्तुंगत्वानुकृतक्षमाधरपतिः सौम्यत्वतारापतिः ।
सम्यग्ज्ञानविशुद्धसंयमतपःस्वाचारचर्यानिधिः
शांतः श्रीजयसिंहसूरिरभवन्निःसंगचूडामणिः ॥ ३

रत्नाकरादिवैतस्माच्छिष्यरत्नं बभूव तत् ।
स वागीशोपि नो मन्ये यद्गुणग्रहणे प्रभुः ॥ ४

श्रीवीरदेवविबुधैः सन्मंत्राद्यतिशयप्रवरतोयैः ।
द्रुम इव यः संसिक्तः कस्तद्गुणकीर्त्तने विबुधः ॥ ५

तथा हि ।

आज्ञा यस्य नरेश्वरैरपि शिरस्यारोप्यते सादरं
यं दृष्ट्वापि मुदं व्रजंति परमां प्रायोतिदुष्टा अपि ।
यद्वक्त्रांबुधिनिर्यदुत्कलवचःपीयूषपानोद्यतै-
र्गीर्वाणैरिव दुग्धसिंधुमथने तृप्तिर्न लेभे जनैः ॥ ६

---

[1] अंबुनिधिप्रसूतः? [2] तस्मिन्सद्गुणरत्न°?

कृत्वा येन तपः सुदुष्करतरं विश्वं प्रबोध्य प्रभो-
स्तीर्थं सर्वविदः प्रभावितमिदं तैस्तैः स्वकीयैर्गुणैः ।
शुक्लीकुर्वदशेषविश्वकुहरं भव्यैर्निबद्धस्पृहं
यस्याशास्वनिवारितं विचरति श्वेतांशुशुभ्रं यशः ॥ ७

यमुनाप्रवाहविमलश्रीमन्मुनिचंद्रसूरिसंपर्कात् ।
अमरसरितेव सकलं पवित्रितं येन भुवनतलं ॥ ८

विस्फूर्जत्कलिकालदुस्तरतमःसंतानलुप्तस्थितिः
सूर्येणेव विवेकभूधरशिरस्यासाद्य येनोदयं ।
सम्यग्ज्ञानकरैश्चिरंतनमुनिक्षुण्णः समुद्योतितो
मार्गः सोभयदेवसूरिरभवत्तेभ्यः प्रसिद्धो भुवि ।

निजशिष्यलवश्रीहेमचंद्रसूरिमुखेन विवृतिरियं ।
सूत्रयुता तैरेव हि विहिता श्रुतदेवतावचसा ॥ १०

सप्तत्यधिकैकादशवर्षशतैर्विक्रमादतिक्रांतैः ।
निष्पन्ना वृत्तिरियं श्रावणवदि पंचमीदिवसे ॥ ११

आसीन्मेढतकस्थाने बोधिस्थः श्रावको धनी ।
याहिका नाम तद्भार्या शीलादिगुणसंयुता ॥ १२

सौवर्णिकः प्रसिद्धोत्र समायातः सुतस्तयोः ।
[1]सासनासान्यतान्ना तु साधारणसमाह्वयः ॥ १३

सोहिणिनाम्नी भार्या पुत्रौ लक्ष्मीधरोस्ति तस्येह ।
छत्रापल्यां च तथा वीरश्रेष्ठचंगसंभूतः ॥ १४

श्रेष्ठी यशोदेव इति प्रसिद्धो
यदेतयोर्वृत्तिरियं समग्रा ।

स्थितैर्गृहे चेल्लकनामकस्य
श्रेष्ठेस्तथा वीरकनंदनस्य ॥ ४
निष्पादितास्माभिरतोप्यमीषां
निःशेषकाणामपि मुक्तिहेतुः ।
संपद्यतां शीघ्रमसौ सहाय-
कर्मार्जितानामपरांगिनां च ॥ ५

प्रत्यक्षरगणनया ग्रंथाग्रं १२९९० मंगलं महाश्रीः ।
संवत् १२४९ श्रावणवदि ८ सोमे ॥ छ

310. Commentary on the **Vyavaharasutra** by MALAYAGIRI [व्यवहारसूत्रस्य टीका । मलयगिरि·].

Folios 1 to 374 : 32½ inches long, 2 inches broad. 10 to 12 lines in a folio. 145 to 150 aksharas in a line. Numbered as No. 183. Folio 374. R. सू ६ ए L. ३७४. The "granthâgra" is given as 33,625. Dated Samvat 1,309 = A.D. 1253.

311. Vyavaharasutrasya Dasamoddesaka [व्यवहारसूत्रस्य दशमोद्देशकः].

Folios 385 to 392: agreeing in all respects with No. 310. The "granthâgra" is given as 688. Dated as 310.

312. Parsvanathacharitra by MÁNIKYACHANDRA [पार्श्वनाथचरित्रम् । माणिक्यचन्द्रः].

Folios 1 to 187 : 33 inches long, 2½ inches broad. 10 to 12 lines in a folio. 145 to 156 aksharas in a line. Numbered as 183. Folio 186. R. सू ६ फु L. १८६.

Begins :

॥ ॐ नमो वीतरागाय ॥ अर्हं ॥
ॐ नमो विश्वमित्राय जैत्राय परमात्मने ।
लोकः कोक इव[1] स्तोकप्रीतिः संपद्यते यतः ॥ १ ॥

[1] इवास्तोक°?

Ends :

॥ ८९ ॥ इत्याचार्यश्रीमाणिक्यचन्द्रविरचिते महाकाव्ये श्री-पार्श्वनाथविहारनिर्वाणवर्णनो नाम दशमः सर्गः समाप्तः ॥

सद्वृत्तिलक्ष्मीरचलप्रतिष्ठा-
निकेतनस्फारसरस्वतीकः ।
मनुष्यलोकेप्रतिमः पृथिव्यां
श्रीकोटिकः स्फीतगणः समस्ति ॥१

सदापि नाकिभ्रितपादभूमेः
कैलासकांतेरिह वज्रसूरेः ।
सदौषधीभेदविभासमाना
वज्राह्वया संततिचूलिकास्ति ॥ २

अस्ताघलक्ष्मीसुभगंभविष्णुः
कलाविलासिद्विजपुंडरीकः ।
श्रीराजगच्छः शुचिमानसश्री-
स्तत्रास्ति गच्छः पृथ्वीपवित्रः ॥ ३

पुंसां विग्रहजं विकारमखिलं निर्मूलमुन्मूलयं-
स्तत्राद्यः समभूद्भवाभयभिषक् प्रद्युम्नसूरिर्गुरुः ।
येन स्वेदयता प्रयुज्य तरलां तर्कोज्ज्वलां भारतीं
वादीन्द्राः प्रविलापिनो घनतरं दर्पज्वरं त्याजिताः ॥ ४

दिगंबरसमाक्रान्तवैकपट्टं समाददे ।
यः प्रत्यक्षं नरेंद्रस्य जगतस्तद्यशः पुनः ॥ ५

तर्कग्रंथविचारदुर्गमवनीसंचारपंचानन-
स्तत्पट्टेभयदेवसूरिरजनि श्वेताम्बरग्रामणीः ।

सद्वाक्यश्रुतिलालसा मधुकरीकोलाहलाशंकिनी
हित्वा विष्टरपंकजं श्रितवती ब्राह्मी यदीयाननम् ॥ ६

दृङ्मिगाः सत्पथभेदमेता
ध्रुवं करिष्यंति जडैः समेताः ।
इतीव रोधाय चकार तासां
ग्रन्थं नवं वादमहार्णवं यः ॥ ७

विद्वन्मंडलमौलिमंडनमणिः श्रेखत्तपोहर्मणि-
र्निर्ग्रन्थोपि जिनेश्वरः समजनि श्रीमांस्ततः सद्गुरुः ।
यः स्फूर्जद्गुणपुंजमुंजजगतीजिष्णोः पुरः प्रज्ञिला-
न्वादे वादिवरान्विजित्य विजयश्रीसंग्रहं स व्यधात् ॥ ८

तत्पट्टपूर्वपर्वतमंडनमार्त्तंडमंडलश्रीकः ।
श्रीअजितसेनसूरिर्दूरितमस्तोमहज्ज्ञातः[1] ॥ ९

तर्कग्रंथपथप्रथापृथुमतिः क्ष्मापीठवाचस्पतिः
सूरिर्भूरिनयस्ततः समजनि श्रीवर्द्धमानाह्वयः ।
आस्थाने विदुषां यदीयवचनैरुत्कंटके वादिभि-
र्लेशेनापि भियेव नाम न पदोल्लासप्रयासः कृतः ॥ १०

श्रीसिद्धांतव्यवहृतिपटुस्तत्पदांभोजभृंगः
सूरिः श्रीमानजनि जगतीमंडनं शीलभद्रः ॥
अंगीकृत्या सकलसुमनःसाक्षिकं दीयमाना
व्यस्तव्याजं यदमलवचःसंपदाप प्रवृद्धिम् ॥ ११

अतुच्छराजगच्छश्रीसमुल्लासनलालसः ।
सूरिः कृपांबुधिरभूत्तत्पट्टे भरतेश्वरः ॥ १२

---

[1] °दूरितमस्तोमहत्?

द्राक्षे ख्यापय शक्तिमान्मविभवं पीयूषपोषं नय
प्रख्याता भव सर्करे तव मधो माधुर्यमत्यस्फुटं (sic)।
खर्जूर प्रभवं प्रपञ्चय रसं सत्काव्य येनाधुना
न श्रोत्राणि पवित्रयन्ति कृतिनामस्मद्गुरूणां गिरः । १३

तत्पट्टपूर्णकलशाः श्रीवैरस्वामिसूरयो गुरवः ।
विकिरंतु दुरितनिकरं वितरंतु समीहितां सिद्धिं ॥ १४

ज्योतिःशास्त्रमहर्निशं गणयतां नैमित्तकान्पृच्छतां
चर्चां शाकुनिकैः समं कलयतां क्लेशो भवेत्केवलः ।
पूज्यानां यदि नाममंत्रकलना मैत्री पवित्रीकृता
नो मिथ्या शृणुतामुवन्ति परमां ते कार्यसिद्धिं जनाः ॥१५

षड्तर्कीललनाविलासवसतिश्चंचत्तपोहर्म्पति-
स्तत्पट्टोदयचंद्रमाः समजनि श्रीनेमिचंद्रप्रभुः ॥
निःसामान्यगुणैर्भुवि प्रसृमरैः प्रालेयशैलोज्ज्वलै-
र्यश्चक्रे कणभोजिनो मुनिपतेर्व्यर्थं मतं सर्वतः ॥ १६

यस्याश्रावसुधाकिरः सुचिगिरः श्रीभारती शृण्वती
कामं कंपयती स्म विस्मयरसाकीर्णापि न स्वं शिरः ।
मंदारप्रभृतिप्रभूतकुसुमभ्रग्दामलीनालिनां
यद्वाणीश्रवणांतरायजननः कोलाहलः खेलति ॥ १७

यत्र प्रातिभशालिनामपि नृणां संचारमातन्वतां
सद्देहैः प्रतिभाकिरीटपटली सद्यः समुत्सार्यते ।
नीरंध्रं विषमप्रमेयविटपिव्रातावकीर्णे सदा
तस्मिंस्तर्कपथे यथेष्टगमना यज्ञे[2] यदीया मतिः ॥ १८

शिष्यस्तस्य प्रशस्यः समजनि जगदानंदकंदांबुदश्रीः
सूरिः श्रीसागरेंदुर्वचनरसभरैर्यस्य सिक्तां जनौघः ।
रोमोद्भेदांकुराढ्यां सिरसि युतकरांभोजपत्रां प्रमोदा-
दभ्रांभोबिंदुपुष्पां सुकृतफलवतीं कायवल्लीं बिभर्ति ॥ १९

निर्व्याजं घनदानयोग्यजडतावस्त्वन्विता मन्मति-
र्यत्पादप्रभवप्रसादविलसत्सद्यक्षरैः[1] स्वीकृतैः ।
संदेहोल्वणसौक्ष्मिकैः प्रतिपदं बाधामनासादिता
ग्रंथाली पथकांतराणि परितः स्पष्टं समुज्जृंभते ॥ २०

गुरुप्रसादविगलज्जडिमैकतमस्तमः ।
सूरिर्माणिक्यचंद्रोभूत्तत्पादाब्जमधुव्रतः ॥ २१

वंशः सत्त्वगुरुस्थितिः समहिमा सद्धर्मकर्मोदया-
दस्ति स्वस्तिनिबंधनं मतिमतां श्रीभिल्लमालाह्वयः ।
आमूलं भुवनाद्भुतैकगुणभूः श्रीमेहिलस्यांगजो
वीरस्तत्र पवित्रवृत्तसदनं मुक्ताफलश्रीरभूत् ॥ २२

विमलमतिमृणालिनीमरालः
सकलकलाकमलावलीविवस्वान् ।
निरुपममहिमावनीभू[2]-
त्समजनि सूनुरमुष्य वर्द्धमानः ॥ २३

कुमारपालक्ष्मापालाजयपालमहीभुजोः ।
यः सभाभूषणं चित्रं जैनं मतमरोचयत् ॥ २४

त्रिभुवनपालः श्रीमान्मल्हः सच्चक्रनंदकः ।
प्रियसत्यः श्रीदेहड इत्यस्याः पुरुषोत्तमाः ॥ २५

---

[1] °सद्भ्याक्षरैः ? [2] °महिमाहिमावनीभू° ?

सतीसीमंतमाणिक्यश्रीमादूकुक्षिसंभवाः ।
सच्चरित्रात्रयः पुत्रास्तस्य शस्यधियोभवन् ॥ २६

प्रज्ञावता सत्कविपुंगवेन
श्रीपल्हणानात्मसुतेन साकं ।
माणिक्यसूरिं गुरुमन्यदेति
श्रीदेहडोजल्पदनल्पभक्तिः ॥२७

नीरागतानिधी राजगच्छभूर्गुणवारिधिः ।
सूरिः प्रद्युम्नसूर्याख्यः पूर्व वः पूर्वजोऽभवत् ॥ २८

स पादलक्षगोपालत्रिभुवनगिर्यादिदेशगोपालान् ।
ययुश्चतुरधिकासीत्या (sic) वादजयैरंजयामास ॥ २८

श्रीअभयदेवसूरिस्तच्छिष्यस्तर्कभूरभूत् ।
भग्नासनालितुमुलाद्गीर्यदास्यमशिश्रियत् ॥ २९

जडोल्लासेन सन्मार्गभेदिनी दृक्तरंगिणी ।
रोद्धुं चकार स नवं ग्रंथं वादमहार्णवं ॥ ३०

तदाम्नायपुषां युष्मादृशानामपि युज्यतां ।
सद्ग्रंथकरणे स्फीतपरोपकरणे मतिः ॥ ३१

माणिक्यचंद्राचार्येण तस्येति प्रार्थनावशात् ।
श्रीपार्श्वनाथचरितं वाचां पथि विपंचितं ॥ ३२

गगनवसनमासायंत्रगं शीतरोचिः
सितकृमिजगुलुंछोदात्तरुक्तंतुजालैः ।
विरचयति विरंचिर्यावदुल्लासितारा-
कुसुमकमिह शास्त्रं नंदतात्तावदेतत् ॥ ३३

तमो विघटयन्नलिप्रतिममंबरारामतः
सदा दिनमुखे [1]विशाविकसदृक्षपुष्पोत्करं।
करैः किरणमालिकश्चटति यावदुल्लासिभि-
र्मतं जिनपतेर्मतं जयतु तावदेतल्क्षितौ ॥ ३४
श्रीसंघेन मयि क्रमांबुजरजःकल्पे पयःकल्पया
दृष्ट्या वाप इव प्रसादविटपी न्यस्तः परं पुष्यतां।
यस्माद्विश्वजनानुरागमहिमश्रीमंजरीसद्यसः-
पुष्पोल्लासि परोपकारकरणैश्वर्यं फलं चाप्यते ॥ ३५
रसर्षिरविसंख्यायां समायां दीपपर्वणि।
समर्थितमिदं वेलाकूले श्रीदेवकूपके ॥ ३६
ग्रंथाग्रं ९२७८ मंगलमस्तु ॥

श्रीपार्श्वनाथाय नमः ॥

यत्रानेकबुधा अनेककवयो धिष्ण्यानि भूयांस्यलं
चंद्रास्यापचयः[2] कलंकविकलः संजायते सर्वदा।
वक्रः कोपि न दृश्यते न च गुरुर्मित्रोदये निःप्रभः
पल्लीपालजनान्वयो नवनभोलक्ष्मीं दधानोस्ति सः ॥ १
तत्रोल्लासितलोकभूरिकमलः श्लिष्यत्प्रतापाकृती
राजा मंडलवृद्धिकारणतया प्रीतिं समुत्पादयन्।
दोषातिक्रमजातकांतिसुभगो बिभ्रत्सुवृत्तां तनुं
मार्त्तंडो जसदूर्धनी समभवच्चंदाणिपूर्मंडनं ॥ २
तद्भार्या योषितां वर्या परिचर्यापरायणा।
जिनेशचरणद्वंद्वे शोभना शोभनाजनि ॥ ३

[1] निशा°? [2] चंद्रस्योपचयः?

महाव्रतानीव सुताः स्युस्ताभ्यां पंच विभुताः ।
गुप्तित्रयमिवावद्यं पुत्रीत्रयं च जज्ञिरे ॥ ४

तेषां च ज्येष्ठः किल पूर्णचंद्रो
धर्मानुरक्तो यशश्चंद्रनामा ।
औचित्यचर्याचतुरस्त्वाभड-
नाहडजाल्हणश्च तथापरे ॥ ५

शीलमती च सहजू रत्नी च श्रावकव्रतं ।
श्रीयशोभद्रसूरीणां चरणांते प्रपेदिरे ॥ ६

कल्हणाल्हणरत्नश्च राजपालश्चतुर्थकः ।
पूर्णस्यागण्यपुण्यस्य तनयां मुनया अमी[1] ॥ ७

कल्हणाल्हणरत्नानां सुताः संति यथाक्रमं ।
अजयोऽचारिसिंहश्च[2] गुरुदेवार्चने रतौ ॥ ८

सुगुणसुवर्णशाली वित्राणेनैव गुरुगणाक्रमणं ।
सुकवेः श्लोक इव स्तनंधयस्तिङ्गणपालोभूत् ॥ ९

यशश्चंद्रजगद्देवोभूत्ततोपि वरदेवः ।
आभडः श्रीमानतुंगचरणांभोजषट्पदः ॥ १०

आभडस्य सुता एतेभयश्रीकुक्षिसंभवाः ।
पांडवा इव विख्याताश्चित्रं कौरवसंगताः ॥

प्रथमः पद्मसिंहाख्यो वीरचंद्रो द्वितीयकः ।
आसलो मूलदेवश्च देदलश्चाथ पंचमः ॥ - - - - - - -

---

[1] तनया मुनयोप्यमी ? [2] अजयश्चारिसिंहश्च ?

313. Dasavaikalikaniryukti [दशवैकालिकनिर्युक्तिः].

Folios 1 to 16. 30½ inches long, 2 inches broad. 6 to 10 lines in a folio. 140 to 150 aksharas in a line. The "granthâgra" is given as 445. Numbered as 183. Folio 16. R. $\frac{\text{ई}}{\text{कु}}$ L. १६.

314. Commentary on the **Dasavaikalika** by HARIBHADRA [दशवैकालिकनिर्युक्तिटीका । हरिभद्रः].

Folios 1 to 173; agreeing in all respects with No. 313. Folio 167. R. $\frac{\text{सु}}{\text{मो}}$ L. १६७.

Begins:

॥ नमः श्रुतदेवतायै ॥

जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान् । ...

Ends:

महत्तराया याकिन्या धर्मपुत्रेण चिंतिता ।
आचार्यहरिचंद्रेण टीकेयं शिष्यबोधिनी ॥

दशवैकालिकटी

315. Santinathacharita by MUNIDEVASÛRI [शान्तिनाथचरित्रम् । मुनिदेवसूरिः].

Folios 1 to 245: 28½ inches long, 1½ inches broad. Incomplete. Contains six sargas and part of the seventh.

316. Upadesamala by DHARMADÂSAGAṆI, with the **Commentary** of RATNAPRABHASÛRI [उपदेशमाला विशेषवृत्तिसहिता । मू० धर्मदासगणिः । टी० रत्नप्रभसूरिः].

Folios 1 to 311: 36 inches long, 2¼ inches broad. 8 to 10 lines in a folio. 142 to 146 aksharas in a line. Numbered as 183. Folio 311. R. $\frac{\text{स्ता}}{\text{१}}$ L. ३११.

Commentary begins:

नमः श्रीदेवसूरिगुरुपादुकाभ्यः ॥

यस्यारघट्टस्य घनोपदेश-
मालार्पितध्यानघटाघटीभिः ।
संसारकूपाज्जवभृज्जलाना-
मूर्द्धं गतिः स्यात्स जिनोक्तताद्वः ॥

रागादिक्षपणपटुः स केवलश्री-
र्जृंभारिव्रजमहितो यथार्थवाक्यः ।
नाभेयः स भवतु भूतये सदा न-
स्तीर्थस्याधिपतिरयं च वर्द्धमानः ॥

पायं पायं प्रवचनसुधां प्रीयते या प्रकामं
स्वैरं स्वैरं चरति कृतिनां कीर्त्तिवल्लीवनेषु ॥
दोग्ध्री कामान्नवनवरसैः सा भृशं प्रीणयंती
मादृग्वत्सान् जयति जगति श्रीगवी देवसूरेः ॥

विशुद्धसिद्धांतधुरं दधानां
संसारनिस्सारकृतावधानाम् ।
श्राद्धः सुधासिंधुमिमां विशालां
प्राप्नोति पुण्यैरुपदेशमालाम् ॥

सत्यामपि सद्वृत्तौ वृत्तिममुष्याः करोम्यहृदयोपि ।
त्वरयति यस्मान्मामिह सविशेषकथार्थिनां यत्नः ॥

तत्रादौ मंगलाभिधेयादिप्रतिपादनायाह ।

नमिऊणगाहा ॥

Commentary ends :

इति श्रीरत्नप्रभसूरिविरचितायामुपदेशमालाविशेषवृत्तौ चतुर्थो विश्रामः ॥

नानारूपनरोत्तमैकवसतिर्नीरागतासंगतः
पातालं परितः स्फुरन्निह वृहद्वच्छोस्ति रत्नाकरः ।
स श्रीमन्मुनिचंद्रसूरिसुगुरुस्तत्राभवद्भूरिभिः
शाखाभिर्भुवि यः प्रयागवटवद्विस्तारमुद्रामगात् ॥

साहित्यतर्कागमलक्षणेषु
यद्ग्रंथवीथीकविकामधेनुः ।
कस्योपकारं न चकार सम्यक्
निःशेषदेशेषु च यद्विहारः ॥

शिष्यः श्रीमुनिचंद्रसूरिगुरुभिर्गीतार्थचूडामणिः
पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिप्रभुः ।
आस्थाने जयसिंहदेवनृपतेर्येनास्तदिग्वाससा
स्त्रीनिर्वाणसमर्थनेन विजयस्तंभः समुत्तंभितः ॥
तत्पट्टप्रभवोभवन्नथ गुणग्रामाभिरामोदयाः
श्रीभद्रेश्वरसूरयः शुचिधियस्तन्मानसप्रीतये ।
श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः
शिष्यैः सेयमकारि सम्मदकृते वृत्तिर्विशेषार्थिनाम् ॥
श्रीदेवसूरिशिष्यभ्रातृणां विजयसेनसूरीणां ।
आदेशस्यानृणभावमगममेतावताहमिह ॥
यदीयमुपदेशमाला आवलोकस्य[1] मूलसिद्धांतः ।
प्रायेण पठति चायं तदिहास्माभिः कृतो यत्नः ॥

[1] आबाललोकस्य?

व्याख्यातृचूडामणिसिद्धनाम्नः
प्रायेण गाथार्थ इहाभ्यधायि ।
क्वचित्क्वचिद्या तु विशेषरेखा
सद्भिः स्वयं सा परिभावनीया ॥
यदिह किंचिदनागमिकं क्वचि-
द्विरचितं मतिमंदतया मया ।
तदखिलं सुधियः क्षमयामि च
कृतकृपाः परिशोधयतादरात् ॥
स्वस्य परस्य च सूक्तैवृत्तिर्विस्तारिता चकास्तीयम् ।
मणिखंडमंडलैरिव सुवर्णपूजा जिनेंद्राणाम् ॥
प्रकृता समर्थिता च श्रीवीरजिनाग्रतो भृगुपुरेसौ ।
अश्वावबोधतीर्थे श्रीमुव्रतपर्युपास्तिवशात् ॥
संशोधिता च संनिहितकतिपयैः सहृदयैरियं प्रायः ।
पुनरपि कंटकशुद्धिः कार्या वः प्रार्थये सर्वान् ॥
भास्वद्भास्वरकांतकांततिलकं प्रक्षिप्तवज्रावृतं
निर्यन्नीलशिलातलांशुपटलीदूर्वारदूर्वांकुरं ।
यावन्मेरुमहीभृतं प्रतिकरोत्यारात्रिकोत्तारणं
तारामिर्भुविलासिनी विजयतां तावन्नवैषा कृतिः ॥
विक्रमाद्वसुलोकार्कवर्षे माघे समर्थिता ।
एकादशसहस्राणि मानं सार्धं शतं तथा ॥ ११९५०
नमः श्रीवर्द्धमानाय वर्द्धमानाय वेदसा ।
वेदसारं परं ब्रह्म ब्रह्मबद्धस्थितिश्च यः ॥ १

स्वबीजगुप्तं कृतिभिः कृषीवलैः
क्षेत्रेषु सिक्तं शुभभाववारिणा ।
क्रियेत यस्मिन् सफलं शिवश्रिय
पुरं तदत्रास्ति दयावटाभिधम् ॥

तस्तत्रास्ति वस्तुप्रगुणगुणगणः प्राणिरक्षैकदक्षः
सज्ज्ञाने [1]लब्ध जिनवचनरुचिश्चंचदुच्चैश्चरित्रः ।
पात्रं पात्रैकचूडामणिजिनसुगुरूपासनावासनायाः
संघः सुश्रावकाणां सुकृतमतिरमी संति तत्रापि मुख्याः ॥३

होनाकः सज्जनज्येष्ठः श्रेष्ठी कुमरसिंहकः ।
सोमाकः श्रावकः श्रेष्ठः शिष्टधीररिसिंहकः ॥ ४

कडुयाकश्शुशुश्रेष्ठी सोंगाक इति सत्तमः ।
खीस्वाकः सुहडाकश्च धर्मकर्मैककर्मठः ॥ ५

एतन्मुखः श्रावकसंघ एषो-
न्यदावदान्यो जिनशासनः सः ।
सदा सदाचारविचारचारु-
क्रियासमाचारश्चुचित्रतानाम् ॥ ६

श्रीमज्जगच्चंद्रमुनींद्रशिष्य-
श्रीपूज्यदेवेंद्रमुनीश्वराणाम् ।
तदाद्यशिष्यत्वभृतां च विद्या-
नंदाख्यविख्यातमुनिप्रभूणाम् ॥ ७

तथा गुरूणां सुगुणैर्गुरूणां
श्रीधर्मघोषाभिधसूरिराजां ।

---

[1] लब्धलक्षो ?

सद्देशनामेवमपापभावां
शुभ्राव भाद्यवचतोत्तमांगः ॥ ८

विषयसुखपिपासोर्गोहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदभ्रारंभिणो भावनाः का-
स्तदिह नियतमेकं दानमेवास्य धर्मः ॥ ९

किंच ।

धर्मः स्फूर्ज्जति दानमेव गृहिणां ज्ञानाभयोपग्रहै-
स्त्रेधा तद्वरमाद्यमत्र यदि तौ निःशेषदानोदयः ॥
ज्ञानं चाद्य न पुस्तकैर्विरहितं दातुं च लातुं च वा
शक्यं पुस्तकलेखनेन कृतिभिः कार्यस्तदर्थोर्थवान् ॥ १०

श्रुत्वेति संघसमवायविधीयमान-
ज्ञानार्चनाद्भुतधनेन मिथः प्रवृद्धिं ।
नीतेन पुस्तकमिदं श्रुतकोशवृद्धयै
बद्धादरश्चिरमलेखयदेष हृष्टः ॥ ११

यावज्जिनमतभानुप्रकाशिताशेषवस्तुविस्तारः ।
जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२

शुभं भवतु ॥

317. Kalpachurni [कल्पचूर्णिः].

Folios 1 to 136 : 34¼ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 145 aksharas in a line.

Begins :

॥ ६॥ भद्दं सरस्सतीए सत्तस्सरकोसवयणवसहीए ।
जीय गुणेहिं कविवरा मयाविणासेहिं जीवंति ॥

उवस्सयस्स अन्तोवगडाए सुत्तं उच्चारयव्वं । अंतोवगडा नाम उवस्सगस्स अब्भंतरं अंगणं वा...

Ends:

संसारसंततिं छेत्तुं मोक्खं पावतीति ॥ कल्पचूर्णी समाप्ता ॥

318. Vyavaharachurni [व्यवहारचूर्णिः].

Folios 1 to 270: 34½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 140 aksharas in a line. Numbered as 183. Folio 270. R. थू L. २७०.

Begins:

॥ ॐ नमः सिद्धेभ्यः ॥

णमो जिणाणं ॥

उक्तः कल्पः अधुना व्यवहारस्यावसरः प्राप्तः तत्र कल्पव्यवहारस्यायं संबंधः ॥

Ends:

व्यवहारस्स भगवतः अर्थविवक्षया प्रवर्त्तनं दक्षं विवरणमिदं श्रमणगुणानाममृतमिति ॥ ॥ ग्रंथाग्रं १०२३० ॥ शुभं भवतु ॥

ले० खीवडेन लिखितं पुस्तकं ॥ मंगलं महाश्रीः ॥

ऊकेशवंशप्रभवे प्रसिद्धः
वाचाकपुत्रो नरसिंहसाधुः ।
सोहीतनूजास्तनयास्तदीयाः
सप्तैव [1]कृप्नोज्ज्वलधर्मकृत्याः ॥ १

तत्राद्यः सांगण इति चीताकस्त्रिभुवनश्च लाखाकः ।
रावणदेदाकावथ धानाक इति क्रमेणामी ॥ २

सहेशनामेवमपापभावां
शुभाव भाद्यावचतोत्तमांगः ॥ ८

विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदभ्रारंभिणो भावनाः का-
स्तदिह नियतमेकं दानमेवास्य धर्मः ॥ ९

किंच ।

धर्मः स्फूर्ज्जति दानमेव गृहिणां ज्ञानाभयोपग्रहै-
स्त्रेधा तद्वरमाद्यमत्र यदि तौ निःशेषदानोदयः ॥
ज्ञानं चाद्य न पुस्तकैर्विरहितं दातुं च लातुं च वा
शक्यं पुस्तकलेखनेन कृतिभिः कार्यस्तदर्थोर्थवान् ॥ १०

श्रुत्वेति संघसमवायविधीयमान-
ज्ञानार्चनाद्भुतधनेन मिथः प्रवृद्धिं ।
नीतेन पुस्तकमिदं श्रुतकोशवृद्धचै
बद्धादरश्चिरमलेखयदेष हृष्टः ॥ ११

[1]यावज्जिनमतभानुप्रकाशिताशेषवस्तुविस्तारः ।
जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२

मं भवतु ॥

317. Kalpachurni [कल्पचूर्णिः].

Folios 1 to 136 : 34¼ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 120 to 145 aksharas in a line.

Begins :

॥ ६॥ भद्दं सरस्सतीए सत्तस्सरकोसवयणवसहीए ।
जीय गुणेहिं कविवरा मयाविणासेहिं जीवंति ॥

उवस्सयस्स अन्तोवगडाए सुत्तं उच्चारयव्वं [अंतोवगडा नाम उवस्सगस्स अब्भंतरं अंगणं वा...

Ends:

संसारसंततिं छेत्तुं मोक्खं पावतीति ॥ कल्पचूर्णी समाप्ता ॥

318. Vyavaharachurni [व्यवहारचूर्णिः].

Folios 1 to 270: 34½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 140 aksharas in a line. Numbered as 183. Folios 270. R. थू L. २७०.

Begins:

॥ ॐ नमः सिद्धेभ्यः ॥

णमो जिणाणं ॥

उक्तः कल्पः अधुना व्यवहारस्यावसरः प्राप्तः तत्र कल्पव्यवहारस्यायं संबंधः ॥

Ends:

व्यवहारस्स भगवतः अथेविवक्षया प्रवत्तेनं दक्षं विवरणामं श्रमणगुणानाममृतमिति ॥ ॥ ग्रंथाग्रं १०२३० ॥ शुभं भवतु ॥

ले० खीवडेन लिखितं पुस्तकं ॥ मंगलं महाश्रीः ॥

ऊकेशवंशप्रभवे प्रसिद्धः
वाचाकपुत्रो नरसिंहसाधुः ।
सोहीतनूजास्तनयास्तदीयाः
सप्तैव [1]कृप्तोज्ज्वलधर्मकृत्याः ॥ १

तत्राद्यः सांगण इति चीताकस्त्रिभुवनश्च लाखाकः
रावणदेदाकावथ धानाक इति क्रमेणामी ॥ २

सद्देशनामेवमपापभावां
शुभाव भावावचनोत्तमांगः ॥ ८
विषयसुखपिपासागेर्हिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदभ्रारंभिणो भावनाः का-
स्तदिह नियतमेकं दानमेवास्य धर्मः ॥ ९
व ।
धर्मः स्फूर्ज्जति दानमेव गृहिणां ज्ञानाभयोपग्रहै-
स्त्रेधा तद्वरमाद्यमत्र यदि तौ निःशेषदानोदयः ॥
ज्ञानं चाद्य न पुस्तकैर्विरहितं दातुं च लातुं च व.
शक्यं पुस्तकलेखनेन कृतिभिः कार्यस्तदर्थोर्थवान् ॥ १०
श्रुत्वेति संघसमवायविधीयमान-
ज्ञानार्चनाद्भुतधनेन मिथः प्रवृद्धिं ।
नीतेन पुस्तकमिदं श्रुतकोशवृद्धचै
बद्धादरश्चिरमलेखयदेष हृष्टः ॥ ११
[1]यावज्जिनमतभानुप्रकाशिताशेषवस्तुविस्तारः ।
जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२
शुभं भवतु ॥

317. Kalpachurni [कल्पचूर्णिः].

Folios 1 to 136 : 34¼ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 120 to 145 aksharas in a line.

Begins :

॥ ६॥ भद्दं सरस्सतीए सत्तस्सरकोसवयणवसहीए ।
जीय गणेहिं कविवरा मयाविणासेहिं जीवंति ॥

उवस्सयस्स अन्तोवगडाए सुत्तं उच्चारेयव्वं । अंतोवगडा नाम उवस्सगस्स अब्भंतरं अंगणं वा...

Ends:

संसारसंततिं छेत्तुं मोक्खं पावतीति ॥ कल्पचूर्णी समाप्ता ॥

318. Vyavaharachurni [व्यवहारचूर्णिः].

Folios 1 to 270: 34½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 140 aksharas in a line. Numbered as 183. Folios 270. R. थू L. २७०.

Begins:

॥ ॐ नमः सिद्धेभ्यः ॥

णमो जिणाणं ॥

उक्तः कल्पः अधुना व्यवहारस्यावसरः प्राप्तः तत्र कल्पव्यवहारस्यायं संबंधः ॥

Ends:

व्यवहारस्स भगवतः अर्थविवक्षया प्रवर्त्तनं दक्षं विवरणमिदं श्रमणगुणानाममृतमिति ॥ ॥ ग्रंथाग्रं १०२३० ॥ शुभं भवतु ॥

ले० खीवडेन लिखितं पुस्तकं ॥ मंगलं महाश्रीः ॥

ऊकेशवंशप्रभवे प्रसिद्धः
वाचाकपुत्रो नरसिंहसाधुः ।
सोहीतनूजास्तनयास्तदीयाः
सप्तैव [1]कृप्तोज्ज्वलधर्मकृत्याः ॥ १

तत्राद्यः सांगण इति चीताकस्त्रिभुवनश्च लाखाकः ।
रावणदेदाकावथ धानाक इति क्रमेणामी ॥ २

---

[1] तोज्ज्वल°?

व्यवहारचूर्णिमेनामलीलिखन्निजसुतस्य सोमस्य ।
देवश्रीतनुजस्य श्रेयोर्थं साधुदेदकः ॥
जयति जिनशासनमिदं निर्वृतिपुरमार्गशासनं यावत् ।
मुनिभिरिह वाच्यमानस्तावदसौ पुस्तको नंद्यात् ॥

319. Commentary on the **Bhagavatisutra** by ABHAYADEVASŪRI [भगवतीसूत्रस्य टीका। अभयदेवसूरिः]..

Folios 1 to 401 : 34½ inches long, 2½ inches broad. 10 to 14 lines in a folio. 135 to 150 aksharas in a line. The "granthâgra" is given as 18,616. Numbered as 183. Folio 401. R. $\frac{\text{स्ता}}{\text{१}}$ L. ४०१. Dated Samvat 1298 = A.D. 1242.

320. Commentary on **Dharmadasagani's Upadesamala** [उपदेशमालाया धर्मदासगणिकृताया विवरणम्].

Folios 1 to 269 : 36 inches long, 2½ inches broad. 10 to 12 lines in a folio. 118 to 125 aksharas in a line. Numbered as 183. Folio 268. R. $\frac{\text{पू}}{\text{र्ण}}$ L. २६८. Dated Samvat 1291 = A.D. 1235.

Begins :

॥ ॐ नमो वीतरागाय ॥
॥ हेयोपादेयार्थोपदेशभाभिः प्रबोधितजनाब्जं ॥

Text begins :

जगचूडामणि

Ends :

कृतिरियं जैनजैमिनिकणभुक्सौगतादिदर्शनवेदिनः सकलग्रंथार्थ-
- - - - - - - - चार्यस्येति ॥
सिद्धर्षिकृता विवृतिः कथानकैर्योजिता स्वबोधाय
प्राक्तनमुनींद्ररचितैश्चारुभिरुपदेशमालायाः ॥

---------- संवत् १२९१ वर्षे आषाढशुदि १३ शनावुपदेशमालायाः पुस्तकं लिखितमिति ॥ मंगलं महाश्रीः ॥

321. Commentary on the **Suryaprajnapti**, by MALAYAGIRI [सूर्यप्रज्ञप्तिटीका । मलयगिरिः].

Folios 1 to 385 : $32\frac{1}{2}$ inches long, $1\frac{3}{4}$ inches broad. 6 to 8 lines in a folio. 140 to 150 aksharas in a line. Numbered as 183. Folio 385. R. $\frac{\text{स्ता}}{\text{द}}$ ० L. ३८९.

Begins:

॥ नमः श्रीसर्वज्ञाय ॥

यथास्थितं जगत्सर्वमीक्षिता यः प्रतिक्षणं ।
श्रीवीराय नमस्तस्मै भास्वते परमात्मने ॥

श्रुतकेवलिनः सर्वे विजयंतां तमश्छिदः ।
येषां पुरो विभांति स्म खद्योता इव तीर्थिकाः ॥

जयति जिनवचनमनुपममज्ञानतमःसमूहरविबिंबं ।
शिवसुखफलकल्पतरुं प्रमाणनयभंगगमबहुलं ॥

सूर्यप्रज्ञप्तिमहं गुरूपदेशानुसारतः किंचित् ।
विवृणोमि यथाशक्ति स्पष्टं स्वपरोपकाराय ॥

अस्या निर्युक्तिरभूत्पूर्वं श्रीभद्रबाहुसूरिकृता ।
कालिदोषात्सानेशत् व्याचक्षे केवलं सूत्रं ॥

Ends :

सुकृती ३ ॥ इति मलयगिरिसूरिविरचिता सूर्यप्रज्ञप्तिटीका समाप्ता ।

322. Suryaprajnaptisutra [सूर्यप्रज्ञप्तिसूत्रम्].

Folios 1 to 88 ; agreeing in all respects with No. 321. Numbered as 183. Folio 88. R. $\frac{\text{ज्ञ}}{\text{ज्ञा}}$ L. ८८. The "granthâgra" is given as 2200.

323. Salibhadracharitra by Dharmakumârasâdhu
[शालिभद्रचरित्रम्। धर्मकुमारसाधु].

Folios 1 to 147: 12¼ inches long, 1¼ inches broad. 8 to 10 lines in a folio. 39 to 41 aksharas in a line. Numbered as 183. Folio 145.

R. सु पू L. १४९. Folio 147. R. सु मा L. १४७.

Begins:

॥ नमः श्रीसर्वज्ञाय ॥

श्रीदानधर्मकल्पद्रुर्ज्जीयात्सौभाग्यभाग्यभूः ।
पूर्वापश्चिमतीर्थेशलक्ष्मीभोगमहाफलः ॥ १
आदौ धनभवे येन घृतमेघायितं तथा ।
यज्ञे यथोर्वीशस्य श्रीः श्रीनाभेयः स वः श्रिये ॥ २

Ends:

श्रीशालिर्गुरुराजकुंजरवराध्यारूढया प्रौढया
श्रीमद्धर्मधराधिपप्रहितया वैराग्यभंग्या स्वयं ।
स्वीचक्रे जगमुद्रयेव सहसा सर्वार्थसिद्धचैव य-
स्तस्यैतच्चरितं सतां प्रदिशतां कल्याणमालाश्रियः ॥ ४७
प्रस्तुतं दानधर्मेण श्रीशालिचरितं शुभं ।
गोभद्रेण श्रीविबुधप्रभेण तु विशेषितं ॥ ४८
श्रीमद्भद्रेश्वरवीरपदोपांते समर्थितं भूयात् ।
सकर्णकर्णानाममृतप्रातराशवत् ॥ ४९
श्रीनागेंद्रमुनींद्रवंशविपुलक्षीरार्णवैरावणाः
श्रीहेमप्रभसूरयः प्रसृमरश्रीकीर्त्तिसांराविणः ।
तत्पट्टे प्रभुधर्मघोषगुरवो रेजुः स्फुरद्गौरवाः
श्रीसोमप्रभसूरयस्तरणयस्तत्पट्टपूर्वाचले ॥ ५०

ब्रह्माणः[1] किल भारती श्रितवती यत्कंठपीठे मठी
गोविंदः[2] कमला यदंघ्रिकमलासेवासुहेवाकिनी ।
ईशनाः किमु गंगयेव महिता[3] गौर्या सुकीर्त्या च ये
श्रीसोमप्रभसूरयः सुमनसां मूर्द्धन्यतां ते दधुः ॥ ५१

तत्पट्टाचलचूलिका विजयते दंभाख्यजंभाजित-
श्रीः श्रीमान्विबुधप्रभः प्रभुरसौ सुज्ञानलीनाशयः ।
तस्य प्राप्य निदेशलेशमनिशं गीर्देवता ध्यानत-
श्चक्रे धर्मकुमारसाधुरमलां श्रीशालिलाकथां[4] ॥ ५२

इयं कथा वृद्धिकुमारिकेव[5]
सदूषणा भूषणवर्जितासीत् ।
प्रद्युम्नदेवस्य गुरुप्रसादात्[6]
बभूव पाणिग्रहणस्य योग्या ॥५३

प्रभाचंद्रेण गणिना गुणगौरवशालिना ।
अलेखि प्रथमादर्शे भक्तिव्यक्तिनिदर्शनं ॥ ५४

यावद्भानदिवाकरः शुभदिनश्रीसौविदल्लोहित-
स्तीर्थे पूर्वगिरावुदेति तिमिरध्वंसी विवेकारुणः ।
स्फीता तावदियं यतिक्षितिपतेः श्रीशालिभद्रप्रभो-
र्बुद्धैर्बोधकरैः सुमंगलकलाभोगावली कीर्त्यतां[7] ॥ ५५

श्रीशालिभद्रचरिते धर्मकुमारसुधिया कृते ।
श्रीप्रद्युम्नधिया सुद्धे [8]सप्तमधिक्रमोभवत् ॥ ५६

---

[1] ब्रह्माणं? [2] गोविंदं? [3] महितो? [4] श्रीशालिलीलाकथां? [5] वृद्धकुमारिकेव?
[6] गुरोःप्रसादात्? [7] कीर्त्यतां? [8] सप्तमाधिक्रमो?

इयं दानमहाधर्मकल्पद्रुम इवाद्भुतः ।
भूयात्समस्तभव्यानां मनोवांछितसिद्धये ॥ ९७
ब्राह्मी निर्मलशब्दसिद्धिकलिता मन्ये पवित्राशया
लक्ष्मीर्वा पुरुषोत्तमप्रियतमा नानार्थजातप्रसूः ।
[1]द्युन्मंगशालिभद्रचरिता गौरीगिरीशप्रिया
जीयाद्धर्मकुमारपंडितमतिविस्तारिधर्मोन्नतिः[2] ॥ ९८

इति श्रीशालिभद्रचरिते सर्वार्थसिद्धिवर्णनो नाम सप्तमः प्रस्तावः समाप्तः ॥

जिनातिशययक्षाख्यवत्सरे विहिता कथा ।
ग्रंथेन द्वादशशती चतुर्विंशतिसंयुता ॥ १ ॥ छ

324. Samavayangasutra [समवायांसूगत्रम्].

Folios 1 to 97 : 14½ inches long, 2 inches broad. 8 to 10 lines in a folio. 45 to 50 aksharas in a line. The "granthâgra" is given a 1667.

325. Commentary on the **Yogasastra** by HEMACHANDRA [योगशास्त्रस्य टीका । हेमचन्द्रः].

Folios 1 to 258 : 12½ inches long, 1½ inches broad. 4 to 6 lines in a folio. 40 to 43 in aksharas in a line. Incomplete.

326. Uttaradhyayanasutra [उत्तराध्ययनसूत्रम्].

Folios 3 to 139 : 12 inches long, 1½ inches broad. 4 to 6 lines in a folio. 50 to 57 aksharas in a line. Incomplete.

327. Upadesamalavritti [उपदेशमालावृत्तिः].

Folios 3 to 205. Injured. Numbered as 183. Folio 186. R. L. १८६. सु ७ फु

328. Karmavipakavrittiyadi [कर्मविपाकवृत्त्यादि ।].

Folios 1 to 200. Injured.

329. Samavayangavritti [समवायांगवृत्तिः].

Folios 1 to 100. Dated Samvat 1349 = A.D. 1293. Injured.

[1] उद्यन्मंगलशालि°? [2] °मतेर्विस्तारिधर्मोन्नतिः?

330. Kalpavrihachchurni [कल्पवृहच्चूर्णि].

Folios 1 to 240: 32½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 127 to 130 aksharas in a line. The "granthâgra" is given as 8700. Numbered as No. 183. Folio 92. R. ९३/२ L. ९२. Folio 240. R. सू/द/० L २४०.

Begins:

नमः प्रवचनाय ॥

मंगलादीनि सत्थाणि मंगलमज्झाणि मंगलावसाणाणि । मंगल-परिग्गहिया य सिस्सा सुत्तत्थाणं अवग्गहेहावायधारणासमत्था भवंति । तानि चादिमध्यावसानमंगलात्मकानि सर्वाणि लोके विराजंति विस्तारं च गच्छंति ।

अनेन कारणेनादौ मंगलं मध्ये मंगलं अवसाने मंगलमिति । ...

कल्पचूर्णीपीठिका परिसमाप्ता ॥ ...

Ends:

एमेव तेल्लिगाहा कंठा ॥ पणित्ति महल्लावणावि पणित्ति दारि-ल्लावणा एवं दावणे पुच्छा य महगिरिणोत्ति । महागिरिणा अज्जसुहत्थी पुच्छितो अज्जो पउरो अहोरोवही[1] जाणेज्जासि । मा रन्ना लोगो पउत्ततो होज्जा । ताहे अज्जसुहत्थिणा अगविसित्ता चेव भणियं । अहं राया ममत्तं करेति । तेण अणुराया जणो लोतियं धम्मं मणु-यत्तमाणो देन्ति संभोएत्ति । ताहे अज्जमहागिरिणा अज्जसुहत्थीभ-णितो । अज्जोउमं णाम एरिसो एवं भणसि । अगविसित्तत्ति । संभो-गपत्थद्धं कंठं ॥ एवं पसंगेण गयं सो राया गाहाद्वयं कंठं ॥ ताहे अणुयाणे गाहा कंठा ॥ अणुजाणंति रधो तस्स पत्थतो गच्छंति ।

[1] आहारेविहा?

जं च ते करं देतीति यातत्तु संपतिणा भणिया । जतिमं गाहाद्वयं घासावणत्ति । सरेज्जेसु जे जणवया तेसु घोसावियं । जहा । समणाणं पणमह तेण । साधूणं पत्थद्धं । किंच समणगाहाद्वयं । चारहडसाहुवेसेणं एसणादिजुत्तं भिक्खं हिंडाविया । ते समणभडा सेस कंठं ॥ उदीर्णैर्योधैराकुला सिद्धा सेना यस्य स उदीर्णयोधाकुलसिद्धसेन इति भगवतः कल्पचूर्ण्यां प्रथमोद्देशकः परिसमाप्तः ॥ वृहच्चूर्णिग्रंथाग्रं ८७०० ॥

331. A collection of books in one manuscript [महत्पञ्चकल्पमित्यादि].

Folios 1 to 225 : 30½ inches long, 2¼ inches broad. 10 to 14 lines in a folio. 145 to 152 aksharas in a line. Numbered as 183. See separate entries which follow.

381, 1. Mahatpanchakalpabhashya [महत्पञ्चकल्पभाष्यम् । संघदासः].

Folios 1 to 67. Folio 43. R. $\frac{\text{घ}}{\text{३}}$ L. ४३. Folio 67. R. $\frac{\text{व्वं}}{\text{र्मा}}$ L. ६७.

Begins :

॥ नमः सर्वज्ञाय ॥

॥ वंदामि भद्दबाहुं पाईणं चरिमसगलसुयनाणी ।
सुत्तस्स कारगमिसिं दसाणकप्पे य ववहारे ॥ १

कप्पंति णाम निष्पण्णं महत्थं वत्तुकामतो णिज्जूहगस्स भत्तीए मंगलठाए संभूतिं ...

Folio 43 :

मोक्खय चेव छिन्नसंसारो ॥ ७२ ॥ दसकप्पो सम्मत्तो ॥
वुत्तो दसविहकप्पो अहुणा वीसतिविहं तु वोच्छामि ।
तस्स उ दारा इणमो संगहिया ईहिं गाहाहि कप्पेसु णाम कप्पो ठवणा...

. Ends :

चरणकरणविसुद्धे आयरणपरूवणं कुणह ।
आयरियसमासार्उ[1] सोचा एंचा[2] य घेतुमत्थेणं ॥
हियए ववत्थवेउं आपूरणकरणसमग्गो जत्थ जदा ।
गणप्पहाणो उ सो होइ गणथेरी गणचरियवियाणऊ वीरो ॥
पासत्थोसन्नकुसीलट्ठाणपरिरक्कर्उ दुपक्केवि ।
सो होइ गणथेरो गुणथेरगुणेहि उवउत्तो ॥

गणपरूषणा कुज्जा ।

कप्पपणगस्सभेदो परूविर्उ मोक्कसाहणट्ठाए ।
जं चरिऊण सुविहिया करेंति दुक्करकयं धीरा ॥
पंचविहमुत्तकप्पाण विभासावित्थरं पमोत्तूणं ।
गहिया सीसहियट्ठा [3]अव्वो—त्तठया चेव ॥ छ्

महत्पंचकल्पभाष्यं संघदासक्षमाश्रमणविरचितं समाप्तमिति ॥ छ्
गाहग्गेणं पंचवीससयाइं चउहत्तराइं ॥ २५०४ सिलोयग्गाणं
एगत्तीससयाणि ॥ ३१३० ॥ मंगलं महाश्रीः ॥

331, 2. Panchakalpachurni [पञ्चकल्पचूर्णिः].

Folios 68 to 135. Folio 68. R. श्रु L. ६८. Folio 110. R. सु ल L. ११०.

Folio 134. R. ला एक्क L. १३४. Folio 135. R. सू ध वृ L. १३५.

Begins :

॥ ॐ नमः सिद्धेभ्यः ॥

मंगलादीणि सत्थाणि पूर्वाभिहितानि मंगलानि पूर्वं मा वास्मिन् तंत्रे कल्पाख्यनामनिष्पन्ने निक्षिपे भगवंतः तीर्थकराः ऋषभाद्याः कृतार्थ[4]-

[1] सगासार्उ ? [2] गचा? [3] The letter here looks like ज्जि. [4] कृतार्थाः?

कृतकृत्या इति कृत्वा तेषां नमस्कारः कृतः। अधुना नामनिष्पन्ने निक्षेपे पंचकल्पसंज्ञके येनेदं दशाकल्पव्यवहारसूत्रं प्रवचनमहितार्थं दाहूतं[1] तस्य नमस्कारं करोमि प्रत्येकशः गाहा यस्तत्र कर्त्तुः तत्राद्या गाथा ॥ वंदामि भद्दबाहुं ॥ वदि स्तुत्यभिवादनयोः वंदनं अर्चनं ...

Folio 68

गाहा ॥ आयारदसा जम्हा तेण भगवता आयाइयस्स कप्पो दसा कप्पववहारा य नवमपूव्वनीसंदभूता निर्ज्जूढा तेनासौ पूजार्हः ...

Folio 110 :

इयाणिं वीसइविहकप्पो दाराणि । नामठवणादव्वकप्पो ३ खेत्तकप्पो ४ कालपकप्पो ५ दंसणकप्पो ६ सुयकप्पो ७ अज्झयणकप्पो ८ चरित्तकप्पो ९ उवहिकप्पो १० संभोगकप्पो ११ आलोयणकप्पो १२ उवसंपयकप्पो १३ अणुन्नकप्पो १४ अट्ठाणकप्पो १५ अणुवासकप्पो १६ ठियकप्पो १७ अट्ठियकप्पो १८ जिणकप्पो १९ अणुपालणकप्पो २० नामस्थापने पूर्ववत् ...

Folio 134 :

कप्पकप्पस्स[2] भेउ परूविउं मोरकसाहणट्ठाए ।
जं चरिऊण सुविहिया करेंति दुक्करकयं धीरा ॥ ७९

पंचकल्पचूर्णिः समाप्ता ॥ ग्रंथप्रमाणं सहस्रत्रयं शतमेकं पंचत्रिंशत्युत्तरं ॥ ३१३५ ॥ मंगलं महाश्रीः ॥

Ends :

इत्याकर्ण्य ततो निजविभवैः श्रीकल्पसूत्रभाष्यस्य ।
श्रीपंचकल्पचूर्णेश्च पुस्तकं लेखयामास ॥ २०
यावद्व्योमसरोवरे० २१ ॥ मंगलं महाश्रीः ॥

---

[1] व्याहृतं ? [2] कप्पपकप्पस्सं ?

331, 3. Dasasrutaskandhachurni [दशाश्रुतस्कन्धचूर्णिः].

Folios 135 to 221. Folio 175. R. $\frac{\text{सु}}{\text{शु}\ \text{नै}}$ L. १७५. Folio 176. R. $\frac{\text{सु}}{\text{शु}\ \text{न}}$ L. १७६. Folio 190. R. $\frac{\text{रै}}{\text{नै}}$ L. १९०. Folio 221. R. $\frac{\text{सू}}{\text{र्ण}\ \text{९}}$ L. २२१.

Begins :

॥ नमः सर्वज्ञाय ॥

। नमो अरहंताणं । णमो सिद्धाणं । नमो आयरियाणं । णमो उवज्झायाणं । नमो लोए सव्वसाहूणं । सुतं मे आउसंतेण भगवता एवमक्खातं इंध खलु थेरेहिं भगवंतेहिं वीसं असमाहिट्ठाणा पन्नत्ता । इमे खलु ते थेरेहिं भगवंतेहिं वीसं असमाहिट्ठाणा पण्णत्ता तं जहा ॥ दवदवचरियावि भवति । अपमज्जियचारीयावि भवति...

Folio 175 :

आयातिट्ठाणनामं अज्झयणे सभट्ठं सहेउयं सकारणं सूत्तं च अत्थं च तदुभयं च भुज्जो २ उवदरिसित्तित्ति बेमि ॥ छ छ

नेव पावनियाणट्ठाणदसा दसमज्झयणं सम्मत्थं ॥ समत्तो आयारदसाउ ॥ शुभं भवतु ॥ ग्रंथाग्रं श्लो० १८३१ ॥ छ

Folio 176 :

॥ नमः सर्वविदे ॥

मंगलादीणि सत्थाणि मंगलमज्झाणि मंगलावसाणाणि ।
मंगलपरग्गहिता य सिस्सा अवग्गहेहापायधारणासमत्था ॥

अविग्घेण सत्थाणं पारगा भवंति ताणि य सत्थाणि लोगे वियरंति वित्थारं च गच्छंति । तत्थादिमंगलेण निव्विग्घेण सिस्सा सत्थस्स पारं गच्छंति । मज्झमंगलेणं सत्थं थिरपरिजियं भवइ । अवसाणमंगलेण सत्थं सिस्सपसिस्सेसु पच्चयं गछंति । तत्थादिमंगलं ॥

सुतं मे आउसंतेण भगवता एवमक्खातं इह खलु थेरेहिं भगवंतेहिं वीसं असमाधिट्ठाणा पन्नता । मज्झमंगलं । पज्जोसवणाकप्पो पढमं सुतादारब्भ जाव थेरावलिया परिसम्मत्ता ॥ अवसाणमंगलं । तेणं कालेणं तेणं समएणं समणे भगवंतमहावीरे रायगिहे नगरे गुणसिलए चेइए बहूणं समणाणं जाव आयाति ठाणं नाम अज्झो अज्झयणं सअट्ठं सहेतुयं सकारणं भुज्जो उवदंसेमि त्ति बेमि ॥ तं पुण मंगलं नामादिचतुर्विधं । आवस्सगाणुक्कमेण परूवेयव्वं । तत्थ भावमंगलं निज्जुत्तिकार आह ।

वंदामि भद्दबाहुं गाहा ॥ भद्दबाहुं नामेणं पाईणा गोत्तेण चरिमो अपच्छिमो । ...

Folio 190 :

गणिसंपदा चउत्थं अज्झयणं समत्तं ।...

Ends :

जण्ण भणितं तं कंठं ॥ पंचमज्झयणं समाप्तं ।

जात्यंधः सेसं कंठं जावणयावि । जावकरणणयो सव्वेसिंपि णयाणं गाधा ॥ दशानां चूर्णी परिसमाप्ता ॥ छ

संवत् १३२१ वर्षे...श्रेयोर्थं दशाश्रुतस्कंधस्तत्रचूर्णिर्लिखापिता ॥छ

331, 4. Ayaradasanijjutti [आयारदसानिज्जुत्ती].

Folios 221 to 225.

Begins :

॥ नमः सर्वज्ञाय ॥

वंदामि भद्दबाहुं०

आउविवागज्झयणाणि भावउं दव्वउं उवत्थदसा ।
दसआउविवागदसा वाससयाउं दसहत्थेत्ता ॥ २...

Ends:

१९ आचारदसाणं निज्जुत्ती सम्मत्ता ॥ १४४ गाथा श्लोक १८० शुभं भवतु ॥

332. Pannavanasutra [पन्नवणासूत्रम्.]

राजेंद्रचंद्रसूरींद्रैर्विद्या काचन काचन ।
जिनादिकुशलाख्यैश्चादाय्याचार्यपदं च मे ॥ ९
[1]अंभरुहकरंदबिंदुनिकराँल्लात्वा यथा षट्पदः
स्वां वृत्तिं तनुते तथा श्रुतकणानादाय ह्युच्चैः पदैः ।
सूरिः श्रीतरुणप्रभः प्रमितये मुग्धातिमुग्धात्मनां
षोढावश्यकसूत्रवृत्तिमलिखत्सौख्यावबोधप्रदां ॥ १०
यन्मिथ्याभिदधे मया मतिमहामांद्यादसम्यग्विदा
व्याक्षेपादथवा तदत्र सुधियः संशोध्य निर्मत्सराः ।
व्यातन्वंतु तथैमकां गतधियो निःसंशयानां यथा
षोढावश्यकधर्मकर्मणि परं संबोधमाबिभ्रते ॥ ११

---

[1] अंभोजान्मकरंद ?

अबुधबोधदशैधनदीधिते-
र्दिनकृतेर्विवृतेर्यदुपार्जयं ।
उपचितं सुकृतं सुकृतेप्सितं
भवतु तेन भवी सुकृती कृती ॥ १२

शशिशशिवेदेंदुमिते संवति सति पत्तने महानगरे ।
दीपोत्सवे च लिलेख सुगमां दिनकृत्यविवृतिरियं ॥ १३

भरतमिव षडंशं त्रायमाणोंगिकायं
त्रिदशदशशताक्षैः श्राव्यकमान - - - -
अनुष्टुभां सहस्राणि [1]सप्ताक्षरसंज्ञया ।
ज्ञेयानि विवृतावत्र साधिकानि मनीषिभिः ॥ ११

61. **Lokanalikasutra** with the **Bhashavritti** of DHANAVIJAYAI [लोकनालिकसूत्रं भाषावृत्तियुक्तम् । भा० धनविजयः].

Folios 1 to 6. 28 lines in a folio. 50 aksharas in a line. Gâthâs 32.

Ends:

लोकगिरा वृत्तिरियं विनिर्मिता लोकनालिसूत्रस्य ।
वाचकधनविजयेन स्वपरकृते राजवरनगरे ॥ १
श्रीविजयदेवसूरीश्वरराज्ये विजयसिंहसूरियुते ।
शशिवारिधिशशि - - संख्ये वर्षे वरभाद्रपदमासि ॥

62. **Gautamakulakavritti** by JNÂNATILAKAGAṆI [गौतमकुलकवृत्तिः । ज्ञानतिलकगणिः].

Folios 1 to 23. 36 lines in a folio. 52 aksharas in a line.

Ends:

श्रीखरतरगणनायकजिनहंसयतीश्वरा भुवि बभूवुः ।
श्रीपुण्यसागरमहोपाध्यायास्तद्विनेयवराः ॥ १
विजयंते तच्छिष्यवाचकवरपद्मराजगणिमणयः ।

---

[1] सप्तैव?

तेषामंतेवासी विनिर्ममे ज्ञानतिलकगणिः ॥ २
गौतमकुलस्य वृत्तिं विलोक्य शास्त्राणि वाक्पताकायां ।
वर्षे व्योमभवानीसुतास्यलेद्याशशांकमिते ॥ ३
दीपोत्सवपर्वदिने विनयिनि जिनचंद्रयुगप्रवरे ।
जगति यदशुद्धं तच्छोध्यं प्रसाद्य सद्योत्र धीमद्भिः ॥४
एकोनसप्ततिकथा समुदायसमन्विता सुगमबोधा ।
विज्ञजनवाच्यमाना वृत्तिरियं भुवि चिरं जीयात् ॥ ५

इति श्रीगौतमकुलकवृत्तिः समाप्ता ॥

63. Nanditadhyachchhandasutra with **Commentary**, by RATNACHANDRA [नंदिताढ्यच्छंदःसूत्रं सटीकम् । रत्नचन्द्रः].

Folios 1 to 10. 30 lines in a folio. 50 aksharas in a line. Dated Samvat 1713 = A. D. 1657

Begins :

॥ ६० ॥ पंडितप्रवरपंडितश्री ५
संघविजयगणिगुरुभ्यो नमः ॥

जैनीं वाचं नमस्कृत्य कृत्स्नज्ञेयप्रकाशिनीं ।
नंदिताढ्यमहं छंदः प्राकृतं विवृणोम्यहं ॥ १

Text begins.

नमिऊण चरणजुयलं नेमिजिणंदस्स भावउं पयउं ।
गाहालक्खणमेयं वुच्छामि गरूवएसेण ॥ १

Ends :

९३ ॥ मांडव्यपुरगच्छीयदेवानंदमुनेर्गिरा ।
टीकेयं रत्नचंद्रेण नंदिताढ्यश्च निर्मितौ ॥ १ ॥

समाप्ता चेयं नंदिताढ्यच्छंदष्टीका कृतिः श्रीदेवाधार्यशिष्यस्याष्टोत्तरशतप्रकरणकर्तुर्महाकवेः पंडितरत्नचंद्रगणेरिति ॥

64. Srutaboda by VARARUCHI, with a **Commentary** by a pupil of MEGHACHANDRA [श्रुतबोधः सटीक । मू० वररुचि. टी० मेघचन्द्रस्य शिष्यः].

Folios 1 to 8. 34 lines in a folio. 54 aksharas in a line.

Commentary begins :

श्रीमत्सारस्वतं धाम नत्वा स्तुत्वा च सद्गुरुं ।
टीका श्रीश्रुतबोधस्य च्छंदसः क्रियते मया ॥ १

Text ends :

स्रग्धरा सा प्रसिद्धा ॥ ४० स्रग्धराच्छंदः] ॥

इति पंडितवररुचिविरचिते कांताप्रश्ने एकांतसमासीने श्रुतबोधाभिधाननामच्छंदः संपूर्णम् ॥

Commentary ends :

इति श्रीवाचकोत्तममेघचंद्रगुरवो विश्वत्रयीविश्रुता-
स्तत्पादांबुरुहप्रसादपटु— — — — — — —

65. Vrittaratnakara by KEDÂRA BHAṬṬA with a **Commentary** [वृत्तरत्नाकरः सटीकः । मू० केदारभट्टः].

Folios 1 to 7. 50 lines in a folio. 88 aksharas in a line. Dated Samvat 1666 = A. D. 1610.

Commentary begins :

शारदायै नमः ॥

देहावलंबितव्यालं नत्वा सुरगणस्तुतं ।
गणेशं क्रियते वृत्तिर्वृत्तरत्नाकराश्रया ॥ १ ॥

गणेशमीश्वरं नत्वा एष श्लेषः वृत्तिसच्को ज्ञेयः । सुखसंतान० । . . .

66. Kalikacharyakatha [कालिकाचार्यकथा].

Folios 1 to 10. 18 lines in a folio. 20 aksharas in a line.

Begins :

हयपडिणीयपयावो तक्कत्तइकारउ कलानिलउ ।
जयउ जणाणंदयरो जगपवरो कालगायरिउ ॥ १

Ends·

इअ बोहिअबहुअनरो देविंदियवंनिया जुगप्पवरा ।
सिरिकालगसूरिवरा हवंतु भव्वाण भद्दकरा ॥ २१

67. **Sraddhapratikramanasutravritti** by RATNAŚEKHARASÛRI [श्राद्धप्रतिक्रमणसूत्रवृत्ति· । रत्नशेखरसूरिः].

Folios 1 to 126. 34 lines in a folio. 60 aksharas in a line. Dated Samvat 1646=A. D. 1590. Granthâgra 6644.

Praśasti :

विख्याततपेत्याख्या जगति जगच्चन्द्रसूरयोभूवन् ।
श्रीदेवसुंदरगुरूत्तमाश्च तदनुक्रमाद्विदिताः ॥ १
पंच च तेषां शिष्यास्तेष्वाद्या ज्ञानसागरा गुरवः ।
विविधा च चूर्णिणलहरिप्रकटनतः सान्वयाह्वानाः ॥ २
श्रुतगतविविधालापकसमुद्धृत[1]समभवंश्चंद्रसूरींद्राः ।
कुलमंडना द्वितीयाः श्रीगुणरत्नास्तृतीयाश्च ॥ ३
षट्दर्शनवृत्तिक्रियारत्नसमुच्चयविचारनिचयसृजः ।
श्रीभुवनसुंदरादिषु भेजुर्विद्यागुरुत्वं ये ॥ ४
श्रीसोमसुंदरगुरुप्रवरास्तुर्या अहार्यमहिमानः ।
येभ्यः संततिरुच्चैर्भवति द्वेधा सुधर्मभ्यः ॥ ५
यतिजीतकल्पविवृत्तेश्च पंचमाः साधुरत्नसूरिवराः ।
यैर्मादृशोप्यकृष्यत करप्रयोगेण भवकूपात् ॥ ६
श्रीदेवसुंदरगुरोः पट्टे श्रीसोमसुंदरगणेंद्राः ।
युगवरवद्विजयंते तेषां शिष्याश्च पञ्चैते ॥ ७
मारीत्यवमनिराकृतिसहस्रनामस्मृतिप्रभृतिकृत्यैः ।
श्रीमुनिसुंदरगुरवश्चिरंतनाचार्यमहिमभृतः ॥ ८

---

[1] °समुद्राः समभवन्?

श्रीजयचंद्रमुनींद्रा निस्तंद्राः संघगच्छकार्येषु ।
श्रीभुवनसुंदरवरा दूरविहारैर्गुणोपकृतः ॥ ९

एकांगा अप्येकादशांगिनश्च जिनसुंदराचार्याः ।
निर्ग्रंथा ग्रंथकृतः श्रीमज्जिनकीर्तिगुरवश्च ॥ १०

एषां श्रीसुगुरूणां प्रसादतोब्दे षडंकविश्व१४९६मिते ।
श्रीरत्नशेखरमणिर्वृत्तिमिमामकृत कृतितुष्टयै ॥ ११

चातुर्विद्योदधिभिर्दधिभिर्दधिश्रुद्धपरमपरभागं ।
साशोध्यत प्रयत्नाल्लक्ष्मीभद्राह्वविबुधेन्द्रैः ॥ १२

विज्ञावतंसविहितप्रशंसगणिसत्यहंसविबुधाद्यैः ।
गुरुभक्त्यास्याः प्रथमादर्शे सान्निध्यमाधायि ॥ १३

एतस्यां टीकायामनुष्टुभामर्थदीपिकानाम्न्यां ।
षट्षष्टिशती चत्वारिंशच्चतुरुत्तरानुमिता ॥ १४

वरचूर्णिविविधवृत्त्याद्यनुसृत्य कृतेयमल्पमतिनापि ।
उत्सूत्रमत्र विबुधैः शोध्यं जीयादियं च चिरम् ॥ १५

इति श्रीतपागच्छ०श्राद्धप्रतिक्रमणसूत्रवृत्तौ शेषाधिकारः पंचमः । समाप्ता चेयमर्थदीपिकानाम्नी श्रावकप्रतिक्रमणसूत्रटीका । ग्रं०५६४४ संवत् १६४६ वर्षे चैत्रशुदि ४ गुरौ लिखिता । तपागच्छनायकश्रीपूज्यसोमविमलसूरीश्वरपट्टालंकारपूज्यश्री ६ श्रीहेमसोमसूरीश्वरविजयराज्ये पं० श्रीआणंदवीरगणिशिष्य पं० श्रीसंघवीरगणिशिष्य पं० उदयवीरगणिशिष्येण उदयसिंघमुनिना लिखितम् । विश्वलनगरे ।

68. **Kalyanamandirastotra** by KUMUDACHANDRA with the **Commentary** of GUṆASÂGARA [कल्याणमंदिरस्तोत्रं सटीकम् । मू० कुमुदचन्द्रः । टी० गुणसागरः].

Folios 1 to 21. 42 lines in a folio. 15 akshara in a line.

Commentary ends:

श्रीवादीश्वरदेवसूरिसुगुरोर्मूलक्रमोद्भासकाः
सूरींद्रा अमरप्रभाः सुगुरवो वादीभविद्रावणाः।
तत्पट्टप्रकटैकभाग्यविशदः श्रीसागरेंदुः प्रभुः
पट्टे श्रीगुणसागरस्तु गणभृत्क्षांत्या क्षितौ राजते ॥ १
गुणसागरसूरीशैर्नानाशास्त्रविशारदैः ।
कल्याणमंदिरे टीका सुगमा तैर्विनिर्मिता ॥ २

69. Bhaktamarastotra by MANATUṄGASÛRI with the **Commentary** of AMARAPRABHASÛRI [भक्तामरस्तोत्रं सटीकम्। मू० मानतुंगसूरिः। टी० अमरप्रभसूरिः].

Folios 21 to 39. 42 lines in a folio. 15 aksharas in a line. Dated Saṃvat 1747=A. D. 1691.

Commentary ends:

श्रीअमरप्रभसूरीशा वैदुष्यगुणभूषिताः ।
भक्तामरस्तवां वृत्तिमकार्षुः सुखबोधिकाम् ॥ १
साधुश्रीवाचनाचार्यदेवसुंदरसद्यतेः ।
तस्याभ्यर्थनतोप्येवं गुणरत्नमहोदधेः ॥ २
रीत्या भंगोन्वये भंगो समासव्यत्ययः क्वचित् ।
कथितो विपरीतार्थो विबुधैः शोध्यतामियं ॥ ३
इति भक्तामरस्तवटीका समाप्ता ॥

70. Upadesakalpadruma [उपदेशकल्पद्रुमः].

Folios 1 to 35. 40 lines in a folio. 52 aksharas in a line. Incomplete.

Begins:

॥ ६ ॥

ऐं नमः पार्श्वनाथ विश्वकल्पद्रुमाय ते ।
सुरासुरनराधीशैः सततं वंदितांघ्रये ॥ १

Folio 6:

इति उपदेशकल्पद्रुमाभिधाने व्याख्यानपद्धतौ प्रथमप्रश्नोत्तरः संपूर्णः १ ॥ ...

Folio 19:

इति उपदेशकल्पद्रुमाभिधाने शतशाखाविस्तारे व्याख्यानपद्धतौ शाखायां देवत्वायुर्बंधकनाम द्वितीयप्रश्नोत्तरः ॥ २ ...

Folio 22:

इति उपदे° सागचंद्राशोकदत्तयोः कथाकथने° तृतीयचतुर्थप्रश्नोत्तरः ॥ ३४...

71. A Commentary on the **Pratikramakrama** of JAYACHANDRASÛRI by NAYACHANDRA [प्रतिक्रमक्रमस्य जयचन्द्रसूरिकृतस्य सहेतुकविधिः। नयचन्द्रः].

Folios 1 to 19. 30 lines in a folio. 40 aksharas in a line.

Begins:

॥ नमः श्रीप्रवचनाय ॥

श्रीवर्द्धमानमानम्य श्रीगुरूंश्च गुणैर्गुरून् ।
प्रतिक्रांते क्रमः कोपि यथावगममुच्यते ॥ १

दृष्टांतकथाः श्रीआवश्यकलघुवृत्तितो लिखिता ज्ञेयाः ।

Ends:

इत्थं सहेतुकयथाक्रमसूत्रयुक्त्या
साधुप्रतिक्रमणकृन्निजकर्मजालं ।
सद्यो विभिद्य वृतकेवलिविक्रमेण
मुक्तिं भजेत भूशमक्षयसौख्यलक्ष्मीं ॥ १

श्रीजयचंद्रगणेंद्रैः प्रतिक्रमक्रमविधिर्यथावगमं ।
लिखितस्तत्रोत्सूत्रं यन्मिथ्यादुष्कृतं तस्य ॥ २

॥इति किंचिद्धेतुगर्भः प्रतिक्रमणकविधिः समाप्तः ॥

॥ श्रीपरमगुरुश्रीतपागच्छनायकश्रीनयचंद्रसूरिकृतः समाप्तः ॥

72. **Ajitasantistava** by NANDISHEṆA with the **Commentary** of JINAPRABHASŪRI [अजितशान्तिस्तवस्य नन्दिषेणकृतस्य टीका। जिनप्रभसूरिः].

Folios 1 to 12. 34 lines in a folio. 63 aksharas in a line. Granthâgra 740.

Begins:

॥ ऊर्हं ॥

अजितशांतिजिनाधिपयोः स्तवः
सकलरोगविषोर्मिसुधाप्लवः ।
जयति विघ्नतमःपटलीरविः
कुशलकैरवखंडहिमच्छविः ॥ १

जगत्त्रयीशांतिकपादसेवौ
सम्यक्प्रणम्याजितशांतिदेवौ ।
सूत्रं तयोरेव चिरंतनर्षि-
व्याख्यानुसाराद्विवृणोमि किंचित् ॥ २

च शब्दः समुच्चये । प्रापयतु च लंभयतु च नंदिषेणं स्तवकारमभिनंदिं सामस्त्येन समृद्धिमानंदं वा पर्षदोपि श्रोतृसभाया अपि सुखनिंदिं शर्मवृद्धिं दिशतु दिशत्वित्युत्तरत्र वर्तमानं क्रियापदमिहापि योज्यं । मम च श्रोतुर्दिशतु प्रयच्छतु संयमे पृथिवीसंयमादिसप्तदशलक्षणे नंदिं प्रमोदसमृद्धिं नंदिषेणश्चेह श्रेणिकपुत्रोन्यो वा कश्चिन्महर्षिर्न सम्यगवगम्यते । केचित्त्वाहुः । श्रीशत्रुंजयांतर्गुहायामजितशांतिनाथौ वर्षारात्रमवस्थितौ तयोश्चैत्यद्वयं पूर्वाभिमुखं जातं अनुपमसरःसमीपे अजितचैत्यं मरुदेव्यंतिके शांतिचैत्यं श्रीनेमिनाथगणधरेण नंदिषेणाख्येन तीर्थयात्रोपागतेन तत्राजितशांतिस्तवरचनाकृतेति ॥ ३७ ॥ मूलवृत्तावेतावानेवाजितशांतिस्तवो व्याख्यातः । संप्रति पुनस्तस्यैव मा-

हात्म्यप्रख्यापकं गाथाद्वयमन्यदप्यभिधीयते । तच्चान्यकर्तृकमप्यतिप्र-
सिद्धत्वाद्व्याचक्ष्महे तत्राद्यगाथेयं परिकियचाउम्मासियसंवत्सर ।...

Ends:

३९ ॥ कविदर्पणमुपजीव्य प्रायेण छंदसामिहस्तोत्रे ।
स्वपरोपकारहेतोरभिदधिरे लक्षणानि मया ॥ १

किंचन चिरत्नविवृत्तेः सुधियः स्वधिया च किंचिदभ्यूह्य ।
स्तवमिहमेतं व्यवृणवमिह यदनुचितं विशोध्यं तत् ॥ २

जगति चिरमजितशांतिस्तवविवृतिर्बोधदीपिका सेयं ।
स्फुरतु खलवचनमरुतामगोचरः सुरुचिरथ रत्नमयी ॥ ३

संवद्विक्रमभूपतेः शिरऋतूदर्चिःशशांकैर्मिते
पौषस्यासितपक्षभाजि शनिना युक्ते द्वितीयातिथौ ।
श्रीमान् श्रीजिनसिंहसूरिसुगुरोः पादाब्जपुष्पंधयः
पुर्यां दाशरथेर्जिनप्रभगुरुर्जैग्रंथ टीकामिमाम् ॥ ४

अशुद्धपाठप्रतिशोधनार्थं
वृत्तिः स्तवस्यास्य मया व्यधायि ।
इतोपि चेत्क्वस्य च नोपकारः
शंखस्तदापूरितरां पयोभिः ॥ ५

समाप्ता चेयं श्रीमदजितशांतिस्तववृत्तिर्बोधदीपिका नाम कृतिरियं श्रीजिनप्रभसूरीणाम् । ग्रंथाग्रं ७४०

प्रत्यक्षरं निरूप्यास्य ग्रंथमानं विनिश्चितम् ।
अनुष्टुभां सप्तशती चत्वारिंशत्समन्विता ॥ १

73. Angavijja [अंगविज्जा].

Folios 134 to 230. 28 lines in a folio. 40 aksharas in a line. Incomplete.

१३४ ॥ इति भो महापुरिसदिन्नाय अंगविज्जाय कम्मजोणी नाम अट्ठावीसतिमो अज्झाउ संमत्तो ॥ २८

१३५ इति० अंगविज्जाये णगरविजयो णामाज्झायो एगूणतीसतिमो समत्तो ॥ २९

१३६ इति० अंगविज्जाये आभरणजोणीणामाज्झायो तीसतिमो संमत्तो ॥ ३०

१३७ इति० अंगविज्जाय वच्छजोणीणामज्झाउ एगतीसतिमो संमत्तो ॥ ३१...

१३८ इति० अंगविज्जाय धणजोणीनामाज्झायो बत्तीसतिमो सम्मतो ॥ ३२...

१३९ इति० अंगविज्जाय जाणज्जोणीणामज्झायो तेत्तीसतिमो-सम्मतो ॥ ३३...

१४० इति० अंगविज्जाय संलाबज्जोणीनामाज्झायो चउत्तीसतिमो सम्मतो ॥ ३४...

१४३ इति० अंगविज्जाय पयाविशुद्धीणामाज्झायो पंचत्तीसतिमो सम्मत्तो ॥ ३५...

१४५ इति० अंगविज्जाय दोहलो णामाज्झायो छत्तीसतिमो सम्मतो ॥ ३६...

१४६ इति० अंगविज्जाय लरकणो णामाज्झायो सत्ततीसतिमो सम्मत्तो ॥ ३७...

इति० अंगविज्जाय वंजणज्झायो अठतिमो सम्मत्तो ॥ ३८...

१४७ इति० अंगविज्जाय कण्णवासणो णामाज्झायो एगुणचत्तालीसतिमो सम्मत्तो ॥ ३९...

१९९ इति० भोयणो णामज्झायो चत्तालीसइमो सम्मत्तो ॥

नमो भगवते महावीरवद्धमाणस्स णमो भगवतो जसवतो महापुरिसस्स महावीरवद्धमाणस्स अहापुव्वं खलु भो महापुरिसदिण्णए चरिए गंडिया नाम अपहस्स मज्झायंतं खलु भो तमणु वरकामो तं जधा ।

१९८ इति खलु भो महापुरिसदिण्णाय अंगविज्जाय रहस्सपडलेणामज्झाउ एगचत्तालीसइमो सम्मत्तो ॥

१६३ इति सुविणो णामाज्झायो बायालीसतिमो सम्मत्तो ॥

१६५ इति० पवासो णामाज्झायो तेयालसइमो सम्मत्तो ॥

इति० पवासज्झायस्स अट्ठकालंज्झायो चउयालीसतिमो संमत्तो ॥

१६७ इति० पवेसो णामाज्झायो पणयालीसतिमो सम्मत्तो॥४५

१७० इति० पवेसणो णामज्झायो षट्चालीसतिमो संमत्तो॥४६

१७१ इति० जक्षाज्झायो नाम सीतालीसतिमो संमत्तो ॥ ४७

१७२ इति० जयो णामाज्झायो अडयालीसतिमो संमत्तो ॥ ४८

१७४ इति० पराजयो णामाज्झायो एगोणपण्णासतिमो समणुगंतव्वो भवति ॥ ४९

१७६ इति० उवदुत्तो णामाज्झायो पण्णासतिमो संमत्तो ॥५०

१७७ इति० देवताविजयो णामोज्झायो एगपण्णासतिमो वरकातो भवति ॥ ५१

१८१ इति० णरकत्तविजयो णामज्झायो वरकातो भवति द्विपंचासतिमो सम्मत्तो ॥ ५२

१८२ इति० उप्पातो णामाज्झायो तिपण्णासतिमो सम्मत्तो॥ ५३

१८४ इति० पसारो णामाज्झायोतो चउपन्नासतिमो ॥ ५४

१८९ इति० णिधाणो णामाज्झायो वरकातो भवति पणपण्णास-
तिमो सम्मत्तो ॥ ९९

८७ इति० पणिव्विसुत्तो णामोज्झायो वरकात्तो भवति छप-
ण्णासतिमो सम्मत्तो ॥ ९६

१९२ इति० पणट्ठकोसयो णामज्झायो सत्तावण्णोवरकातो भ-
वति ॥ ९७

२०३ इति खलु भो महापुरिसदिन्नाय अंगविज्जाय चिंतिता-
णामाज्झायो अणंतागमसंजुत्ता जिणाणंतराणि पवरगुणांतपवरागम-
संयुत्ताय मणोगतभावप्पकासणकराय मंगविज्झाय णमो कारयित्ता
णमो भगवतो जसवतो महति महावीरवद्धमाणाय अभिप्पसण्णाय
अंगविज्झाय चिंताणामज्झायो अट्ठावणो सम्मतो ॥

उसभादीतिच्छकरे सिरसा वंदितु वीरणित्थे वोविज्जं महापुरिस-
देसितं चरणाणीय पंचविहो जो कालो महापुरिसदेसिताय विज्झाय
सो गाधाहि णिविद्धो अणु अणुयो गच्छंति घेतूणं पंचविधो पुण-
कालो मुहुत्तमादी दिवसाय परकाया मासा वस्सं वस्साणि य दिग्घ-
कालो य ॥...

२०९ भगवतीयमहापुरिसदिन्नाय मंगविज्जाय कालणामावलि-
कयोमध्यायइतीयं ॥ ३८

२१८ एवं भगवतीय अंगविज्जाय महापुरिसदिण्णाय अग्घप-
माणं सम्मत्तं ॥ २२

२२३ भगवतीयमहापुरिसदिन्नाय अंगविज्जाय कालज्झायो
सम्मतो ॥

२२९ इति महापुरिसदिन्नाय अंगविज्जाय कालज्झायो नाम
एकोनषष्टिमो समाप्तः ॥

74. Dharmakalpadruma by UDAYADHARMASŪRI [धर्मकल्पद्रुमस्य नवमः पल्लवः । उदयधर्मसूरिः].

Folios 1 to 23. 34 lines in a folio. 47 aksharas in a line. Contains the ninth "pallava" of the work.

Ends:

श्रीमदागमगच्छेस्ति नानाशास्त्रविशारदः ।
श्रीमानुदयधर्माह्वः पंडितस्तीक्ष्णबुद्धिमान् ॥ १७

मया मूर्खेण यत्किंचिदत्रावद्य प्ररूपितं ।
संशोध्यं तद्बुधैः कृत्वा सुप्रसादं ममोपरि ॥ १८

सर्ववाङ्मयदक्षाणां विदुषां का हि मत्कृतिः ।
तथापि ग्रंथ एषोपि वाच्यः श्रोतृविनोदकृत् ॥ १९

यशोधर्मगुणाः सौख्यं लक्ष्मीरायुश्चमंगलं ।
फलान्येतानि दत्तेऽत्र धर्मकल्पद्रुमो ह्ययं ॥ २०

इति श्रीवीरदेशनायां धर्मकल्पद्रुमे शिखरोपमरूपसेननृपाख्यानवर्णनो नाम नवमः पल्लवः ॥

75. Snatripanchasika by ŚUBHAŚĪLAGAṆI with the **Translation of** JINAHARSHA [स्नात्रपंचाशिका भाषासहिता । मू० शुभशीलगणिः भा० जिनहर्षः].

Folios 1 to 20. 28 lines in a folio. 47 aksharas in a line.

Ends:

इति देवपूजायां श्रेणिकनृपकथा ५०

इति श्रीजिनेंद्रपूजाविषये श्रीतपागच्छाधिराजश्रीमुनिसुंदरशिष्य पं० शुभशीलगणिविरचिता स्नात्रपंचाशिका समाप्ता । तस्या बालावबोधः कृतो जिनहर्षेण संवेगिगणिकनकविजयाभ्यर्थया श्रीपत्तनमध्ये ग्रंथाग्रं ८००

76. **Snatripanchasika** by UDAYASAGARA [स्नात्रपञ्चाशिका। उदयसागरः].

Ends:

इति श्रीजिनपूजायां वीरवणिक्कथा द्वितीया समाप्ता ॥ २

इति श्रीसम्यक्त्वदीपिकायां स्नातृपंचाशिकायां चंद्रगोपकथा तृतीया समाप्ता ॥ ३

इति श्रीभट्टारकश्रीउदयसागरसूरीश्वरविरचितायां सम्यक्त्वदीपिकायां स्नातृपंचाशिकायां जलपूजायां प्रतिबद्धा हीरकबंटिककथा चतुर्थी समाप्ता ॥ ४

इति० गंधपूजायां सुंदरश्रेष्ठिककथा पंचमी समाप्ता ॥ ५

इति० वस्त्रपूजायां चंदनश्रेष्ठिकथा षष्ठी ॥ ६

इति० नृत्यपूजायां भीमरजककथा सप्तमी ॥ ७

इति० प्रणामपूजायां हंसकुंभकारकथाऽष्टमी ॥ ८

इत्यक्षतपूजायां शुकशुकीकथा नवमी ॥ ९

इति० कोशवृद्धिविषये भीमवणिक्कथा दशमी ॥ १०

इति० पुष्पविषये अर्जुनभिल्लकथा एकादशी ॥ ११

इति० प्रणामपूजायां विषये केशवविप्रकथा द्वादशी ॥ १२

इति० पूजोपकरणविषये कमलाब्राह्मणीकथा त्रयोदशी ॥ १३

इति० फलपूजाविषये दिलीपगोपकथा ॥ १४

इति० भावपूजायां वृद्धनारीकथा पंचदशी ॥ १५

इति० पुष्पपूजाविषये सागरकथा षोडशी ॥ १६

इति० दीपपूजाविषये वणिक्कथा सप्तदशी ॥ १७

इति० पुष्पपूजोपरि हरिवणिक्कथा अष्टादशी ॥ १८

इति० नवीनबिंबपूजाविषये रावणनृपकथा ऊगणीसमी ॥ १९

इति० जिनपूजाविषये रामचंद्रकथा विंशत्तमी । २०
इति० तिलकपूजाविषये दमयंतीकथा एकविंशत्तमी । २१
इति० कर्णनृपकथा द्वाविंशत्तमी । २२
इति० फलविषये कौलककथा त्रयोविंशत्तमी । ३
इति० चंद्रमेनिककथा चतुर्विंशत्तमी । २४
इति० मुकंदविप्रकथा पंचविंशत्तमी । २५
इति० मातंगकथा षड्विंशत्तमी । २६
इति० पुष्पपूजायां मालिकाकथा सप्तविंशत्तमी । २७
इति० पुष्पपूजाविषये मुकुंदद्विजकथाऽष्टाविंशत्तमी । २८
इति० धनवणिक्कथा एकोनत्रिंशत्तमी समाप्ता । २९
इति० स्वर्णकारकथा त्रिंशत्तमी । ३०
इति० कुमारपालभूपकथा एकत्रिंशत्तमी । ३१
इति० भीमसूत्रधारकथा द्वात्रिंशत्तमी । ३२
इति० वीरभूपकथा त्रित्रिंशत्तमी । ३३
इति० सिंहलनृपकथा चतुस्त्रिंशत्तमी ।। ३४
इति० रमाकुंभकारिकाकथा पंचत्रिंशत्तमी । ३५
इति० श्रीपर्वदिने पूजायां युधिष्ठिरनृपकथा षट्त्रिंशत्तमी । ३६
इति० संप्रतिभूपकथा सप्तत्रिंशत्तमी । ३७
इति० विक्रमार्कनृपकथा अष्टत्रिंशत्तमी । ३८
इति० भावसारकथा एकोनचत्वारिंशत्तमी । ३९
इति० श्रीवज्रस्वामिकथा चत्वारिंशत्तमी समाप्ता । ४०
इति० कुंतलश्रेष्ठिकथा एकचत्वारिंशत्तमी । ४१
इति० कपर्दकश्रेष्ठिकथा द्विचत्वारिंशत्तमी । ४२
इति० कार्बटिकप्रियाकथा त्रिचत्वारिंशत्तमी । ४३

इति० अशोकमालिकथा चतुश्चत्वारिंशत्तमी । ४४

इति० सिंहनृपकथा पंचचत्वारिंशत्तमी । ४५

इति० श्रीजिनपूजायां पाजाश्रेष्ठिकथा षट्चत्वारिंशत्तमी । ४६

इति० नागार्जुनयोगिकथा सप्तचत्वारिंशत्तमी । ४७

इति० शंखनृपमदनकुमारकथा अष्टचत्वारिंशत्तमी । ४८

इति० प्रह्लादनभूपकथा एकोनपंचाशत्तमी । ४९

इति० श्रेणिकनृपकथा पंचाशत्तमी । ५०

इति श्रीजिनेंद्रपूजाविषये श्रीविधिपक्षगच्छाधिराजपूज्यभट्टारक-श्रीश्रीउदयसागरसूरीश्वरविरचितायां० स्नातृपंचाशिका नाम ग्रंथः समाप्तः ॥

Praśasti:

जयति भुवनैकसूरः सर्वत्राविहतकेवलालोकः ।
नित्योदयः स्थिरस्तापवर्जितो वर्द्धमानजिनः ॥ १

श्रीवीरवक्त्राच्चिपदीमवाप्य
यो द्वादशांगीं विमलां चकार ।
स्वामी सुधर्मा सकलर्षिशास्ता
जीयात्स्वकीयान्वयवृद्धिकर्त्ता ॥ २

चांद्रे कुले श्रीविधिपक्षगच्छ-
स्तत्राभवत्साधुपथमर्मूर्त्तिः ।
तदीयपट्टे शिवसिंधुसूरि-
स्तत्स्थानके श्रीअमराब्धिसूरिः ॥ ३

तत्पट्टांबुजभास्करा भृशधियो दुर्वादिदंतावल-
हर्यक्षा उपकेशवंशजनुषो रोषादिदोषद्विषः ।

निर्णीतागमशब्दशास्त्रविषया उद्योगिनोध्यापने
विद्यासागरसूरयो युगवरा विश्वप्रियाः स्वर्ययुः । ४

तत्पदांभोजमधुपः सूरिः श्रीउदयोदधिः ।
ज्ञातृपंचाशिकाग्रंथे रचयामास हर्षतः । ५

वर्षेऽब्धिखाग्नींदुमिते सुरम्ये
श्रीपौषमासे च वलक्षपक्षे ।
श्रीपूर्णिमायां शशिवासरे च
श्रीपादलिप्ताख्यपुरे सुराष्ट्रे । ६

श्रीयोग्यविमलसाधोस्तथा श्रीदर्शनांबुधैः ।
अभ्यर्थनया रचितो ग्रंथोयं बोधिलब्धये । ७

श्रीमालिवंशे गुरुदेवभक्तः
कीकासुतः श्रीकचराभिधानः ।
तदीयसंघेन समं च यात्रां
कुर्वन् कृतोयं जिनराजभक्त्यै । ८

यावल्लवणसमुद्रो यावन्मेरुर्महीधरः ।
यावच्चंद्रदिवानाथौ तावन्नंदत्वयं ग्रंथः ॥ ९

अर्हतो मंगलं मे स्युः सिद्धाश्च मम मंगलं ।
साधवो मगलं मे स्युर्जैनो धर्मोस्तु मंगलं । १०

॥ इति प्रशस्तिः समाप्ता ॥

Navagrahastotra [नवग्रहस्तोत्रम्].

Ends :

भद्रबाहुरुवाचेदं पंचमश्रुतकेवली ।
विद्याप्रवादपूर्वाच्च ग्रहशांतिविधिः स्मृतः । ११

77. Srimandalaprakarana by VINAYAKUŚALA [श्रीमंडलप्रकरणम् । विनयकुशल].

Folios 1 to 5. 24 lines in a folio. 36 aksharas in a line. Dated Samvat 1888 = A. D. 1832.

Ends:

एसो विचारलेसो जीवाभिगमाइआगमेहिंतो ।
विणयकुसलेण लिहिउं सरणत्थं सपरगाहाहिं । ९९
इति श्रीमंडलप्रकरणं समाप्तं ।

78. Kayasthitistavana with an **Avachuri** [कायस्थितिस्तवनं सावचूरि].

Folios 1 to 3. 24 lines in a folio. 49 aksharas in a line. Incomplete.

Begins:

जह तुह दंसणरहिउं कायठिईभीसणे भवारन्ने ।
भमिउं भवभयभंजण जिणंद तुह विन्नविस्सामि ॥ १

79. Vichararasayanaprakarana by MAHEŚVARASŪRI [विचाररसायनप्रकरणम् । महेश्वरसूरिः].

Folios 1 to 3. 26 lines in a folio. 42 aksharas in a line. In 87 Gâthâs.

Begins:

श्रीपरमात्मने नमः ॥
नमिऊण वद्धमाणं धम्मनिहाणं जिणागमं सोच्चा ।
वुच्छामि बोहणट्ठं कंपि सरूवं जिणरकायं ॥ १
गुणाट्ठाणाणि १४ य जोगा १५ उवउगा १२ तहय लेस ६ संघयणा ६ ।
संठाणाणि य ६ पाणा १० पज्जत्ती ६ चेव सम्मत्तं ॥ २
मिच्छत्ताणि य ५ इंदी ५ अह व समुग्घाय ७ सन्नि १० वियाणि ।
दिट्ठी ३ नाण ५ उप्पती ५ अणुक्कमेणं भणिज्जामि ॥ १

Ends:

सिरिविक्कमकालाउ रामतुरंगेसुपंचभूमीसु । १९७
फग्गुणमासे रइयं पगरणमेयं मए विहिणा ॥ ८९

जं दिट्ठं सुयमज्झे संकलियं तं समासउं किंचि ।
सहाए सहभेउं नायव्वो निउणबुद्धीहिं ॥ ८६
सिरिपल्लगणाहिवेण सूरिवरेणावि महेसरेणेयं ।
कहियं विचारपगरणं पढज्जमाणं सुहं देउं ॥ ८७

इति श्रीमहेंद्रसूरिकृतं विचाररसायनं समाप्तं ॥

80. Arthakandantargata Sasthisamvatsari by DURGADEVA [अर्थकाण्डान्तर्गतषष्टिसंवत्सरी । दुर्गदेव].

Folios 1 to 12. 32 lines in a folio. 50 aksharas in a line. Dated Samvat 1754 = A. D. 1698.

Begins:

६० ॥ श्रीगुरुभ्यो नमः ॥

एवं पार्श्व भविष्यंति पृथिव्यां सचराचरं ।
अर्थकांडं मयाख्यातं सर्वं नरविशेषतः ॥ १
ज्योतिषी नहि जानाति अर्थकांडस्य लक्षणं ।
माता पिता च भ्राता च किं करिष्यंति योषितः ॥ २
अर्थकांडं न जानाति तस्य जन्म निरर्थकं ।

ॐ नमः परमात्मने ।

केवलज्ञानमास्थाय दुर्गदेवेन भाषितं ॥ ३

दिगंबरोवाच ।

भगवन् दुर्गदेवेश देवानामधिप प्रभो ।
भगवन् कथितं सत्यं संवत्सरफलाफलं ॥ ४

अथ षष्टिसंवसरनामानि ।

प्रभव भला १ विभव २ शुक्ल ३ प्रमोद ४ प्रजापति भव्या ५ अंगिराज अभव्यं ६ श्रीमुख ७ भाव ८ भव्ययवा न चारू ९

धाता १० ईश्वर ११ बहुधान्य १२ भव्य प्रमाथी निबल १३ विक्रम १४ वृषभ १५ चतुर्भावि १६ विरुर्द शुभा न १७ तारण चारू १८ पार्थिव निबल १९ व्यय २० ॥

भणितं दुर्गदेवेन ज्ञायते येन शुभाशुभं ।

ब्रह्मावीसी ।

अथ विष्णुवीसी ।

सर्वजित् १ सर्वधारी २ चारू । विरोधी निबल ३ विकृत ४ खर ५ नंदन ६ निबल विजय ७ जय ८ मन्मथ ९ दुर्मुख १० हेमलंबं भला ११ विलंब भलो १२ विकारी विरूर्द १३ शर्बरी १४ प्लवंग चारू १५ शुभकृत् १६ शोभन १७ क्रोधन १८ विश्वावसु १९ पराभव २० अभव्य एवं विष्णुवीसी ॥ एवं संवत्सरई ४० फल हूआ ॥

हवि रुद्रवीसी ।

प्लवग १ कीलक २ भला सोम्य निबल ३ साधारण ४ विरोधकृत् भला ५ परधावी निबल ६ प्रमाथी ७ आनंद भला ८ राक्षस निबल ९ नल १० पिंगल ११ कायुक्त १२ सिद्धार्थ १३ रौद्र १४ दुर्गति १५ दुंदभि भला १६ रुधिरोद्गारी १७ रक्ताक्ष १८ क्रोधन १९ कृतकृत्य २० ए रुद्रवीसी ।

Ends:

इति क्षय सं० फलं ६० इति रुद्रवीसी समाप्ता ॥

इति दुर्गदेवकृता षष्टिसंवत्सरी समाप्ता ॥

81. Jinachaityastava [जिनचैत्यस्तवः].

आघाटे मेदपाटे क्षितितटमुकुटे चित्रकूटे त्रिकूटे
लाटे धाटे च नाटे विटपिघनतटे देवकूटे विराटे ।

कर्णाटे हेमकूटे विकटतरतटे चित्रकोटे च भोटे
श्री० ॥ ४ ॥
श्रीमाले मालवे वा मलयिनि निखिले मेहले पिच्छले वा
नेपाले नाहले वा कुवलयतिलके सिंहले मेखले वा ।
डाहाले कौशले वा विगलितसलिले जंगले वा तमाले
श्री० ॥ ५ ॥ ...✓
चंपायां चंद्रमुख्यां गजपुरमथुरापत्तने चोज्जयिन्यां
कोशांब्यां कोशकायां कनकपुरवरे देवगिर्य्यां च काश्यां ।
नाशिक्ये राजगेहे दशपुरनगरे भद्दिले तामलिप्यां
श्रीमत्तीर्थंकराणां प्रतिदिवसमहं तत्र चैत्यानि वंदे ॥ ७

B

List of the more important paper MSS, preserved in the Library of the late Kalyanachandra, Cambay.

1. **Avasyakasaptati** by MUNICHANDRASÛRI with the **Commentary** of MAHEŚVARÂCHÂRYA [आवश्यकसप्ततिः पाक्षिक-सप्तत्यपरनाम्नी सटीका । मू० मुनिचन्द्रसूरिः । टी० महेश्वराचार्यः].

Commentary begins :

श्रीगौतमाय नमः ॥
श्रीमते वर्द्धमानाय जिनेंद्राय जगद्विदे ।
सुरासुरनमस्याय वागीशाय नमो नमः ॥ १
अनन्यसाधारणशीलसंपदे
विनम्रविद्वज्जनमुद्रितापदे ।
दिगंबराडंबरभंगसूरये
प्रणम्य तस्मै गुरुदेवसूरये ॥ २

स्वगुरूणामपि श्रीमद्गुरूणामनघा गिरः ।
सिद्धांतगर्भसंदर्भाः किंचिल्किंचिद्विवृण्महे ॥ २

इह किल कलिकालबलप्रबलकुतर्ककर्कशप्रादुर्भवत्कुग्रहाग्रहावेशवशीकृतांतःकरणाः केचित्तपस्विनः कष्टानुष्ठानेनात्मानमायासयंतः संतोन्यानपि मुग्धबुद्धीन्व्यामोहयंति ततस्तानेवंविधानवलोक्य अपारकरुणासारसुधारसैकपारावाराः अनेकांतजयपताकाचारुचारीसंचारचतुरनर्तकीनर्तनसूत्रधाराः दुःखमासमयसमुल्लासितप्रमादपातालतलावमज्जच्चित्तःकलंकानुष्ठाननिष्ठाधरणीसमुद्धरणादिवराहरूपाः संसारकांतारांतःपरिभ्रांतनितांतश्रांतजंतुजातसंतापनिर्वापकसद्देनामृतकूपाः कर्मप्रकृत्याद्यखिलखिलग्रंथग्रंथाभिद्रुरस्वशेमुषीविमुखीकृताखर्वगर्वसुपर्वसूरयः पूज्याः श्रीमन्मुनिचंद्रसूरयः सूर्या इव मूलोन्मूलिततमस्संभारेण स्वगोप्रस्तारेण तेषां सन्मार्गप्रबोधमुत्पादयितुं तद्विप्रतार्यमाणान्यजंतुजातमवबोधयितुमात्मस्मृतिं विधातुं च सिद्धांतोद्धारसारभूतं प्रमाणनिष्पन्ननामकमावश्यकसप्तत्याख्यं प्रकरणमारभमाणाः प्रत्यूहव्यूहापोहाय स्वाभिमतं प्रत्यासन्नोपकारित्वाच्चरमतीर्थाधिपतिं यथार्थाभिधानं श्रीमन्महावीरमभिष्टुवंतः साक्षादभिधेयप्रयोजनाभिधायिकामिमामादावेव गाथां प्राहुः ॥

Text begins:

देविंदविंदवंदियपयपउमं वंदिउं जिणं वीरं ।
आवस्सयस्सरूपं समासउं किंपि जंपेमि ॥ १

Text ends:

मुणिचंदसूरिणा सुमरणत्थमिणमप्पणो पवचणाउं ।
उद्धरियं जुत्तिजुयं परेसि संबोहणत्थं च ॥ ७० ॥

Commentary ends:

श्रीदेवसूरिगुरोः[1] स्फुटनाममंत्र-
नित्यस्मृतिस्तदुपदेशवशेन वृत्तिं ।
श्रीमन्मुनींद्रमुनिचंद्रकृतावमुष्यां
सूरिर्महेश्वर इति प्रकटां चकार ॥ १

सिद्धांततर्कसाहित्यलक्षणेषु विचक्षणैः ।
वज्रसेनसुधीरस्मत्सहाय्यं कृतवानिह ॥ २

मूलग्रंथनिरीक्षणोत्सुकमनाः कृत्वा तदन्वेषणां
प्रादुर्भूतगुरूक्तिनिश्चलमतिर्वृत्तिं यतो निर्ममे ।
तद्युष्माभिरशेषशास्त्रहृदयग्राहि स्फुरन्निर्मल-
प्रज्ञैरज्ञजनैरिवात्र न मनः कार्यं समारोपभूः ॥ ३

विपक्षाक्षेपविक्षेपवलक्षं दिक्षु यद्यशः ।
मतिः सिद्धांतशुद्धा च तत्सद्यः फलमस्य तु ॥ ४

इति श्रीमुनींदुसूरिविरचितायामावश्यकसप्ततिकायां श्रीदेवसूरि-पूज्यपादपद्मोपजीविना श्रीमहेश्वराचार्येण विरचिता सुखप्रबोधिनी वृत्तिः समाप्ता ॥

2. **Jayatihuyanastotra** by ABHAYADEVASŪRI with a **Commentary** [जयतिहुयणस्तोत्रं सटीकम् । मू० अभयदेवसूरिः].

Folios 1 to 6.

Begins:

॥ ॐ नमः सिद्धं ॥

जय तिहुयणवरकप्परुक्ख जय जिणधन्नंतरि
जय तिहुयणकल्लाणकोस दुरियक्करिकेसरि ।

तिहुयजणअविलंघिआण भुवणत्तयसामिय
कुणसु सुहाइ जिणेस पास थंभणयपुरट्ठिय ॥ १

अत्रायं वृद्धसंप्रदायः ॥

पुरा भगवान् श्रीअभयदेवसूरिर्गूर्जरयात्रायां शंभाणकस्थाने विहृतवान् । तत्र च महाव्याधिवशेनातीव शरीरापाटवे सति प्रत्यासन्ननगरग्रामेभ्यः पाक्षिकप्रतिक्रमणाय समाजिगमिषुर्विशेषेण समाहूतो मिथ्यादुःकृतदानाय सर्वश्रावकसंघः । त्रयोदश्यर्द्धरात्रे चाभाणि शासनदेवतया । प्रभो स्वपिषि जागर्षि वा । ततो मंदस्वरेणोक्तं भगवता । जागर्मि । पुनरूचे तया । प्रभो शीघ्रमुत्तिष्ठत चैताः सूत्रकुकुटिका उन्मोचय । भगवानाह । न शक्नोमि । देवता प्राह । कथं न शक्नोषि । अद्यापि चिरकालं वीरतीर्थं प्रभावयिष्यसि नवांगीवृत्तिं च विधास्यसि । भगवानवोचत् । कथमेवंविधशरीरो विधास्यामि । देवतावादीत् । स्तंभनकपुरे सेढिकानद्युपकंठे खंखरपलासमध्ये श्रीपार्श्वनाथः स्वयंभूरस्ति तत्पुरो वेदान् वंदस्व । येन सुस्थशरीरो भवसि । ततः सा तिरोभूत् । प्रातः क्षणे प्रत्यासन्ननगरग्रामेभ्यः समागत्य श्रावकसंघेन ववंदे भगवान् । भणितं च भगवता । स्तंभनकपुरे श्रीपार्श्वनाथं वंदिष्यामहे । आद्धैरचिंति । नूनं कश्चिदुपदेशः प्रभूणां येनेदमावेदयंति । ततस्तैर्भणितं । वयमपि वंदिष्यामहे । ततो वाहनेन गच्छतः प्रभोर्मनाक् शरीरसौस्थ्यमभूत् । ततो धवलक्कपुरात्परतः पादचारेण विहृतवान् । स्तंभनपुरं श्रावकाः सर्वतः पार्श्वनाथमवलोकयंतो गुरुणाभिहिताः खंखरपलासमध्ये अवलोकयत । ते तथा चक्रुः । ततस्तत्र न दृष्टा पार्श्वप्रतिमा । तत्र च प्रत्यहं गौरेका समागत्य प्रतिमामूर्द्ध्नि क्षीरं क्षरति । ततो हृष्टैः श्रावकैर्यथादृष्टं निवेदितं गुरोः पुरः । ततः श्रीअभयदेवसूरिस्तत्र गत्वा दर्शनमात्रे

एव स्तोतुं प्रवर्त्तते । जय तिहुयणेत्यादिभिर्द्वात्रिंशता तात्कालिकैर्नमस्कारैः । ततोत्यं नमस्कारद्वयमतीव देवताकृष्टिपरमवगम्याभिदधे देवतया । भगवंस्त्रिंशतापि नमस्कारैरध्येतृणां भद्रं विधास्ये । अतोत्यनमस्कारद्वयमस्मदाकृष्टिकरत्वेन नः कष्टावहमित्यपसार्यतां । तदनुरोधात्तथा चक्रे । ततोचिंत्यप्रभावत्वात्प्रभुकृतनस्काराणां स्वयं प्रत्यक्षीभूते श्रीपार्श्वनाथे विधिना चैत्यवंदनं संघेन सह विदधे । ततस्तत्र कारितं श्रावकसंघेनोत्तुंगतोरणं देवगृहं । ततो रोगोपशमात्सुस्थीभूतशरीरेण प्रभुणा श्रीअभयदेवसूरिणा स्थापितस्तत्र श्रीपार्श्वनाथः । विदधे च प्रतिष्ठा प्रसिद्धं च महातीर्थमिति । सेयं नमस्कारत्रिंशिका किंचिद्वचाख्यायते ॥

Ends :

अथ विज्ञप्तिकासर्वस्वमाह ।

एय महारिय जत्त देव इहु न्हवणमहूसर्उ ।
जं अणलियगुणगहणु तुम्हं मुणिजणअणिसिद्धर्उ ॥
एम पसीय सुपासनाह थंभणयपुरट्ठिय ।
इय मुणिवरु सिरिअभयदेउ विन्नवइ आणिंदिय ॥ ३०

एषा मदीया यात्रा देव एष स्नानमहोत्सवो यदनलीकगुणग्रहणं स्तवनं कृतमिति शेषः । युष्माकं मुनिजनानिषिद्धं । अन्यस्य हि पाप्मिनो राजादेर्गुणग्रहणं साधूनां निषिद्धं । एवंसति प्रसीद [1]पार्श्वनाथ स्तंभनकपुरास्थित इत्येवं मुनिवरः श्रीअभयदेवसूरिर्नवांगीविवरणकरणानंदितभूरिसूरिः विज्ञपयति आनंदितत्रिलोकः लोकश्लाघितः ।

॥ ३० ॥ इति जयतिहुयणवृत्तिः समाप्ता ॥

---

[1] सुपार्श्वनाथ ?

3. **Meghadutakavya** by MERUTUṄGASŪRI [मेघदूतकाव्यं । मेरुतुंगसूरि].

Folios 1 to 9.

Begins :

ॐ नमः श्रीवीतरागाय ॥ अर्हं ॥

कश्चित्कांतामविषयसुखानीछुरत्यंतधीमा-
नेनोवृत्तिं त्रिभुवनगुरुः स्वैरमुज्झांचकार ।
दानं दत्वा सुरतरुरिवात्युच्चधामारुरुक्षुः
पुण्यं पृथ्वीधरवरमथो रैवतं स्वीचकार ॥ १ ॥...

॥ ५० ॥ इति श्रीविधिपक्षमुख्याभिधानश्रीमदंचलगच्छेशश्री-मेरुतुंगसूरिविरचिते श्रीमेघदूतकाव्ये प्रस्तावनापरिस्कृतपतिविरहविवशराजीमतीविहितदेवाधिदेवश्रीनमीश्वरबालकेलिवर्णनो नाम प्रथमः सर्गः ॥ १ ॥...

॥ ५० ॥ इति श्री०मेघदूतमहाकाव्ये पतिविरहविवशराजीमती विहितदेवाधिदेवश्रीनेमीश्वरवसंतकेलिवर्णनो नाम द्वितीयः स्वर्गः॥..

॥ ५६ ॥ इति श्री०श्रीनेमीश्वरविवाहमहोत्सवप्रत्यावृत्तिवर्णनो नाम तृतीयः सर्गः ॥...

Ends :

सप्रीचीनां वचनरचनामेवमाकर्ण्य साधोः
पत्युर्ध्यानादवहितमतिस्तन्मयत्वं तथापत् ।
संख्याताहैरधिगति महानंदसर्वस्वसद्मा
तस्माद्भेजेनुपमति यथा शाश्वतीं सौख्यलक्ष्मीं ॥ ४२ ॥

इति श्रीविधिपक्षमुख्याभिधानश्रीमदंचलगच्छेश्वरश्रीमेरुतुंगसूरि-विरचिते श्रीमेघदूतकाव्ये पतिविरहविवशराजीमतीवितीर्यमाणोपलंभवर्णनो नाम चतुर्थः सर्गः ॥

4. **Commentary** on MERUTUṄGA'S **Meghaduta**, by ŚÎLA-RATNASÛRI [मेघदूतकाव्यस्य टीका । शीलरत्नसूरिः].

Folios 2 to 46.

Ends:

समाधिरलंकारोतिशयोक्त्यनुप्राससंकराश्च ॥ इति चतुर्थसर्गटीका ॥ तथा च ।

सर्वव्याकरणप्रमाणपटवो न्यायस्फुरत्फाक्किका-
निष्णाता गुरवोभवन्न तु कृतिस्तेषां हि मिथ्या भवेत् ।
एष प्रत्यय एव मेस्ति सुचिरं तेषां पदाब्जद्वयी-
सेवातो बहुलप्रयोगरचनास्पष्टोपयोगस्पृशां ॥ १
अन्येषां मतिगूढतापहृतये व्याख्यामधीतां मुखा-
त्तेषामेव तथा विचार्य विबुधैः सार्वै प्रयत्नेन च ।
स्पष्टार्था लिखिता व्यधीयत परावर्त्तः प्रयोगेषु य-
त्क्वापि क्वापि तदस्तु मा गुरुवचश्चर्चाव्यलीकं मम ॥ २
व्याख्यालेखि मयामृषान्न खलु या शोध्यैव[1] सद्भुधै-
र्व्यर्थंग्यानि प्रकटीकृतान्यनुपदं गूढानि नो यान्यपि ।
नेयानि स्वयमेव तान्यनलसैः स्पष्टं परेषामपि
ज्ञाप्यानि प्रकटापकारकृतये प्राग्भावनावैर्भुवि ॥ ३
वर्षे चंद्रनिधानपूर्व१४९१कलिते श्रीविक्रमार्कात्तथा
चैत्रांतर्वदिपंचमीबुधदिने श्रेष्ठानुराधायुते ।
श्रीजैनोज्ज्वलमेघदूतसुवृहत्काव्यस्य पूर्णाभव-
द्टीका श्रीअणहिल्लपाटक इति ख्याते क्षितौ पत्तने ॥ ४
पूज्यश्रीगुरुमेरुतुंगगणभृद्भुर्यैर्व्रतं लंभितः
श्रीमच्छ्रीजयकीर्त्तिसूरिगुरुभिस्तत्पट्टलब्धोदयैः ।

[1] मयकामृषान्न खलु या शोध्यैव सा सद्भुधैः ?

वात्सल्यात्परिपाठितश्च कृतवान् श्रीकाव्यटीकामिमा-
मार्चार्यः किल शीलरत्न उचितां स्वाल्पिष्टबुद्धेर्मितां ॥ ५
एतस्याः किल वृत्तेः श्रीमन्माणिक्यसुंदराचार्याः ।
विबुधाः शोधनमवहितमतयो बहुसमयतत्त्वज्ञाः ॥ ६

इत्याचार्यश्रीशीलरत्नसूरिविरचितायां श्रीजैनमेघदूतमहाकाव्यटीकायां चतुर्थः सर्गः समाप्तः ॥ तत्समाप्तौ समाप्ता चेयं टीका ॥

5. **Panchalingiprakarana** by JINEŚVARA, with a **Commentary** [पंचलिंगिप्रकरणं सटीकम् । मू० जिनेश्वरसूरिः].

Folios 1 to 40.

Commentary begins:

॥ श्रीवीतरागाय नमः ॥

सम्यक्त्वं नयसारनामविदितः श्रीग्रामचिंतामणी-
र्यः संप्राप्य सुरद्रुमाधिकसहः श्रीसर्वमुख्येंदिराः ।
पत्राभा उपभुज्य जैनकमलामासाद्य पुष्पोपमां
श्रीकैवल्यफलश्रियं निरुपमां भुंक्ते स वीरः श्रिये ॥ १

श्रीजिनेश्वरसूरीणां नत्वा पादसरोरुहं ।
पंचलिंगिप्रकरणविवृतिर्लिख्यते मया ॥ २ ॥

इह गूर्जरवसुंधराधिपश्रीदुर्ल्लभराजसभासभ्यसमाजमहावादिचैत्यवासिकल्पितजिनभवनवाससमासादितविसृत्वरकीर्त्तिकर्पूरपूरसुरभितत्रिभुवनभवनाभोगश्रीजिनेश्वरसूरिविरचितपंचलिंग्याख्यप्रकरणस्य यद्यपि प्रतिवादिदंतिकुंभस्थलकेशरिभिः श्रीजिनपतिसूरिभिर्नानाप्रमाणावतारबंधुरा विद्वज्जनमनोहरा वृत्तिर्निर्मिता तथापि संक्षिप्तरुचिसत्त्वानुग्रहाय तद्व्याख्यानुसारेण किंचिल्लिख्यते मया । तत्र निःश्रेयसकल्पविटपिबीजभूतस्य शक्रचक्रवर्त्तिकमलासंबंधावंध्यनिबंधनि-

बंधनस्य दुर्गतिद्वारनिरोधामोघपरिघायमाणस्य प्रशस्ततत्त्वार्थश्रद्धान-कृपात्मपरिणामविशेषस्य सम्यक्त्वस्य लिंगमभिधित्सुरुपलिंगे[1] मागश्-दिपंचकसमाहाररूपं पंचलिंग्याख्यप्रकरणमारभमाणः श्रीजिनेश्वर-सूरिः प्रत्यूहापोहाय प्रथमं भावमंगलरूपलिंगपंचकाभिधायिकां गा-थामाह ॥

Text begins:

उपसमसंवेगा चिय निव्वेउ तह य होइ अणुकंपा ।
अत्थिक्कं चिय पंचवि हवंति सम्मत्तलिंगाइं ॥ १

Text ends:

इय भावणासमेउ सम्मदिट्ठी न इत्थ संदेहो ।
इत्तु चिय लिंगमिणं अव्वहिचारी ससज्झेणं ॥ १०१

Commentary ends:

आस्तिक्यत्वात् । अभयकुमारमंत्रिवदिति गाथार्थः ॥ १०१

इति पंचलिंगं विवृतं तद्विवृतौ समाप्तं पंचलिंगिप्रकरणविवरणं ।

6. **Kumarasambhavakavya**, by JAYAŚEKHARASŪRI [कुमा-रसंभवः । जयशेखरसूरि·].

Folios 1 to 19.

Begins:

॥ ६० ॥

अस्त्युत्तरस्यां दिशि कोशलेति
पुरी परीता परमर्द्धिलोकैः ।
निवेशयामास पुरः प्रियायाः
स्वस्या वयस्यामिव यां धनेशः ॥ १ ॥...

---

[1] उपलिंगेनोपशमादि ?

॥ ७७ ॥ इति श्रीजयशेखरसूरिविरचिते श्रीजैनकुमारसंभवमहाकाव्ये कोशलाश्रीऋषभदेवबालकेलियौवनवर्णनो नाम प्रथमः सर्गः ॥...

॥ ७३ ॥ इति० सौधर्मेंद्रागमनप्रभुस्तवनवर्णनो नाम द्वितीयः सर्गः ॥...

॥ ८१ ॥ इति० शक्रविज्ञप्तिविवाहमंडपरचनकन्यालंकारलक्षणस्तृतीयः सर्गः ॥...

॥८०॥ इति० भगवद्विवाहमहोत्सववर्णनो नाम चतुर्थः सर्गः॥...

॥८७॥ इति० सुमंगलासुनंदापरिणायनलक्षणः पंचमः सर्गः॥...

॥ ७४ ॥ इति० निशानिशाकरोदयऋतुवर्णनसुमंगलागर्भसंभवो नाम षष्ठः सर्गः ॥ ...

॥ ७७ ॥ इति० सुमंगलास्वप्नदर्शनो नाम सप्तमः सर्गः ॥ ...

॥ ६८ ॥ इति० चतुर्दशमहास्वप्नावधारणावर्णनो नाम अष्टमः सर्गः ॥ ...

॥ ८० ॥ इति० महास्वप्नव्यावर्णनो नाम नवमः सर्गः ॥ ...

॥ ८६ ॥ इत्याचार्यश्री० सुमंगलास्वप्नाभ्युपगमनस्वप्नप्रतिजारणलक्षणो दशमः सर्गः ॥ ...

Ends:

॥ ७० ॥ इति० सूर्योदयशक्रसमागमवर्णनो नाम एकादशः सर्गः ॥ ग्रंथाग्रं ११२ समस्त १२२५ ॥

सूरिश्रीजयकेसरः कविघटाकोटीरहीरच्छवि-
र्द्धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीनीरधिः ।

वाणीदत्तवराश्चिरं विजयते तेन स्वयं निर्मिते
सर्गो जैनकुमारसंभवमहाकाव्ये ऽमेकादशः ॥

7. Rishibhashitani [ऋषिभाषितानि].

Folios 1 to 16.

Begins:

॥ ॐ नमः सिद्धं ॥

सोयव्व वदती सोयव्वमेव ए दवति ।
जेण समयं जीवे सव्वदुरकाण मुच्चति ॥ १ ॥
तम्हा सोयव्वातो परं णत्थि सोयंती ।
देवनारदेण अरहता इसिणो पुइयं ॥ २ ॥ ...
॥ १२ ॥ नारदज्झयणं सम्मत्तं ॥

Ends:

एवं सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती ।
णो पुणरवि रज्जत्थं हव्वमागच्छंति त्ति बेमि ॥ ४५ ॥
इसिभासियाइं सम्मत्ताइं ॥ ग्रं. ८१५ ॥

8. Jambudvipasamgrahini by HARIBHADRASÛRI with Commentary by PRABHÂNANDASÛRI [जम्बूद्वीपसंग्रहिणी सटीका । मू० हरिभद्र सूरिः । टी० प्रभानन्दसूरिः].

Folios 1 to 17.

Begins:

॥ ॐ नमो वीतरागाय ॥

नत्वा वीरजिनं संदर्शितविश्वविश्ववस्तुचयं ।
श्रीक्षेत्रसंग्रहण्या वृत्तिं कुर्वे यथाशक्ति ॥ १ ॥

दत्तैकांतवादिसंदोहविशारदानां गिरा स्वर्गापगानादानुवादानां श्रीहरिभद्रसूरिपादानां कृतेर्व्याचिख्यासायां मादृशस्याल्पमेधसः कोवकाशस्तथाप्यर्थनिपुणप्रकरणरागाच्च शक्तिमजानानोप्युपचक्रमे ।

इह तावत्सूत्रकारः प्रथमं चतुरतिशयस्वरूपभगवन्नमस्कारमंगलाद्य-
भिधायिकां शिष्टोपदिष्टमार्गानुसरणार्थमाद्यगाथामाह ॥ नमिय जिणं
सव्वन्नुं ...

आह चोमास्वातिवाचकः । नद्यौ विजयच्छेदिन्यो रोहितादिवत् ।...

Text ends:

खंडाई गाहाए दसहि दारेहिं जेंबुदीवस्स ।
संघयणी संमत्ता रइया हरिभद्दसूरीहिं ॥ २८ ॥

Commentary ends:

कैः कृतेयमित्याह । श्रीहरिभद्रसूरिभी राचितास्तत्र तया निब-
द्धेति भद्रं ॥

नित्यं श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुत-
ज्ञानश्रीसमलंकृताः सुविशदाचारप्रभाभासुराः ।
येषां वासस्नपया[1] प्रसन्नतरया शीलांबुसंपूर्णया
भव्यस्येह न कस्य कस्य विदधे चेतोमलक्षालनं ॥ १

9. Rayamallabhyudayamahakavya by PADMASUNDARA [रायमल्लाभ्युदयमहाकाव्यम् । पद्मसुंदरः].

Folios 1 to 105 Dated Samvat 1625.

Begins:

॥ ॐ नमः सिद्धेभ्यः ॥

स श्रीमान्नाभिसूनुर्विलसदविकलब्रह्मविद्याविभूति-
प्रश्लेषानंदसांद्रद्रवमधुरसुधासिंधुमग्नानुभूतिः ।
यस्यांतर्वैरिवारेंधनदहनशिखाधूमभूमभ्रमाभा
भ्राजंते मूर्द्धि नीलच्छविजटिलजटाः पातु वः श्रीजिनेंद्रः॥१...

उमाग्रोतकवंशजः शुचिमतिस्तत्त्वार्थविद्यापटु-
र्यस्याभिज्ञमतल्लिकाभिरनिशं गोष्ठी स्फुटं रोचते ।
मान्यो राजसभासु सज्जनसभाशृंगारहारो भुवि
श्रीजैनेंद्रपदद्वयार्च्चनरतः श्रीरायमल्लोभवत् ॥ ७

तेनाभ्यर्थनयार्थितः सविनयं तेजःपुरस्थः — —
—[1] न्यः संसदि पद्मसुंदरकविः षट्तर्कसंक्रांतधीः ।
श्रीनाभेयजिनादिवीरचरमश्रीतीर्थकृत्संकथा-
गर्भं चा — — — तां[2] मृदु महाकाव्यं मम प्रीतये ॥ ८

यः पूर्वं श्रुतपंचमीफलकथागर्भं भविष्याव्हयं
काव्यं कारितवान् — — ज्ञपदथो[3] नत्वा पुनः सत्कविं ।
नाभेयादिसमस्ततीर्थपमहाकल्याणवृत्तांकितं
सत्काव्यं क्रियतां सतां श्रुतिमनःप्रल्हादनश्रेयसे ॥ ९

चतुर्विंशतितीर्थेशकल्याणचरिताद्भुतं ।
प्रारभ्यते महाकाव्यं महापुरुषसंश्रितं ॥ १०

---

[1] पुरस्थः सदा मान्यः or पुरस्थः सतां मान्यः ? [2] चारु विधीयतां ?
[3] कारितवान्व्यजिज्ञपदथो ?

महाकवीनामालंब्य मतमागमसम्मतं ।
संक्षेपरुचिभव्यांगिप्रीत्यै तदभिदध्महे ।। ११

Ends :

श्रीवीरनिर्वाणदिने भविता केवलं मम ।
विहृत्याहं कियत्कालं प्रांते तु विपुले गिरौ ।। ८२
प्राप्स्यामि निर्वृतिं तस्मिन्दिवसेथ गणेश्वरः ।
श्रीसुधर्माभिधो लब्धा केवलज्ञानमुज्ज्वलं ।। ८३
तन्निर्वाणदिने जंबूनामा भाव्यंतकेवली ।
ततो नंदी नंदिमित्रस्तृतीयोप्यपराजितः ।। ८४
गोवर्द्धनो भद्रबाहुः पंचैते श्रुतपारगाः ।
क्रमेणैव भविष्यंति विशाखार्यस्ततः परं ।। ८५
प्रोष्टिलः क्षत्रियांकश्च जयनामा नगाह्वयः ।
सिद्धार्थो धृतिषेणश्च विजयो बुद्धिलस्तथा ।। ८६
गंगदेवो धर्मसेनो द्वादशांगस्य पारगाः ।
दशपूर्वार्थगास्सर्वे तथा नक्षत्रनामकः ।। ८७
जयपालश्च पांडुश्च ध्रुवसेनोनुकंपकः ।
एकादशांगवेत्तार एतेभूवन्मुनीश्वराः ।। ८८
सुभद्रोथ यशोभद्रो यशोबाहुस्तृतीयकः ।
लोहार्योपि चतुर्थः स्यादाचारांगविदोप्यमी ।। ८९
जिनसेनादयः पश्चाद्वर्त्तयिष्यंत्यणुश्रुतं ।
पुरूरवाः सुरश्चापि मरीचिर्ब्रह्मकल्पजः ।। ९०
जटिलब्राह्मणो देवः पुत्रमित्रद्विजस्ततः ।
देवश्चाग्निद्विजो देवश्चाग्निमित्राह्वयो द्विजः ।। ९१

माहेंद्रोभूत्ततो देवो भारद्वाजो द्विजस्ततः ।
माहेंद्रदेवो मनुजो नरकेषु त्रसेषु च ॥ ९२

स स्थावरेष्वसंख्यातकालं भ्रांत्वा स्वकर्मतः ।
स्थावराख्यो द्विजस्तुर्ये कल्पे देवस्ततोभवत् ॥ ९३

विश्वनंदी महाशुक्रेदेवश्च्युत्वाथ केशवः ।
त्रिपृष्ठाह्वः सप्तमेथ निरये स मृगाधिपः ॥ ९४

प्रथमे नरके तस्मात्केसरी धर्ममर्मवित् ।
आद्ये कल्पे सिंहकेतुः सुरोथ कनकोज्ज्वलः ॥ ९५

खेचरेशः सुरः स्वर्गे सप्तमे हरिषेणराट् ।
महाशुक्रसुरो राजा प्रियमित्रस्ततः सुरः ॥ ९६

सहस्राराभिधे कल्पे राजा नंदाभिधस्ततः ।
अच्युतेंद्रस्ततश्च्युत्वा वर्द्धमानो जिनेश्वरः ॥ ९७

श्रीमद्गौतमवक्त्रतः श्रुतसुधां पीत्वा नृपः श्रेणिकः
प्रापानंदममंदमुज्ज्वलमनाः श्रुत्वाथ नत्वा जिनं ।
प्रह्वीभूय स गौतमं मगधराट् श्रीश्रेणिकः शुद्धधीः
स्वामुत्तंभितकेतनामथ पुरीं धर्मैकतानोविशत् ॥ ९८

यः स्याद्वादसुधासमुद्रलहरीमग्नं निरूप्याखिलं
विश्वं विश्वपदार्थसार्थकलितं प्राबोधयत्सज्जनान् ।
तन्नीराजनवर्द्धमान - निभो द्राग्मुक्तिपूर्यायिनां
भूयान्मंगलकारणं स भविनां श्रीवर्द्धमानः प्रभुः ॥ ९९

आनंदोदयपर्वतैकतरणेरानंदमेरोर्गुरोः
शिष्यः पंडितमौलिमंडनमणिः श्रीपद्ममेरुर्गुरुः ।

तच्छिष्योत्तमपद्मसुंदरकविः श्रीरायमल्लोदयं
काव्यं नव्यमिदं चकार सकलार्हद्वृत्तभव्यांकितं ॥ १००

जनपदेषु महान्कुरुजंगलः
सुकृतिभिः कृतिभिः कृतमंगलः ।
उडुगणेषु निशाकरमंडलः
किमु विभाति विभाकरतुंदिलः ॥ १

यत्रासिधारासत्तीर्थे स्नात्रातं कुरुपांडवैः ।
वसुंधरावधूद्वाहकृते कृतपरिश्रमैः ॥ २

यत्र गंगासरित्पूरधारा हारायते भृशं ।
विलसद्भूमिभामिन्याः शंखकुंदेंदुसुंदरा ॥ ३

तत्र स्नात्रामपुरवद्धस्तिनामपुरं परं ।
तच्छाखानगरं रम्यं चरस्थावरसंज्ञकं ॥ ४

यच्च नानाद्रुमारामपरिमंडितमंडलं ।
विभ्राजते नु वसुधावनिताकर्णकुंडलं ॥ ५

यत्र रूपाः स्फुरद्रूपवीहपरिमंडलैः ।
पुष्करिण्यः पुष्करौघैः सारसैः परिशीलिताः ॥ ६

यत्र सौधाः सुधाशुभ्राश्चंद्रिकाधौतभूतलाः ।
जनताजनितानंदाः संति संतापहारिणः ॥ ७

नंद्यावर्त्तादयो यत्र नागराणां बभुर्गृहाः ।
स्फुटस्फुटिकपाषाणघटितामलविग्रहाः ॥ ८

यत्सौधशिखरस्थानां मुग्धानां मुखमंडलैः ।
लक्ष्यते पौरवृंदेन शतचंद्रायितं नभः ॥ ९

सुभावकाणां यत्र श्रीर्व्ययिता जिनसद्मसु ।
प्रोत्तुंगशिखरव्याजादुच्चैः पदमिवादिशत् ॥ १०

तत्राग्रोतकवंशे गोइलगोत्रे बभूव नरसिंहः ।
सिंहः सत्पुरुषाणां पौरुषवृत्त्या विभाति स्म ॥ ११

तत्पत्नी मदनाही शीलवती धर्मकर्मसु नितांतं ।
कुशलाथ रत्नगर्भा सुतरत्नद्वयमसौ सुषुवे ॥ १२

नानूचसहणपालस्तत्तनयौ विनयनयकलाकुशलौ ।
आस्तां निरस्तकलुषौ जिनधर्मपरायणौ नित्यं ॥ १३

नानूसाधोश्च सुधासुधांशुशुद्धांशुविशदगुणकीर्त्तेः ।
उंढरहीपत्न्यासीन्निजशीलपवित्रितचरित्रा ॥ १३

रोहणभूरिव रत्नं नररत्नं रायमल्लतनयं सा ।
प्रासूत रत्नगर्भा जननी जननयनकुमुदेंदुं ॥ १४

यस्तु जिनचरणपूजापुरंदरः सुंदरः सदा स्वगुणैः ।
दाता ज्ञाता निपुणो जिनधर्मधुरंधरः सततं ॥ १५

एकोनपंचवर्गप्रमितजिनानां चरित्रसंदृब्धं ।
यो रायमल्लपूर्वाभ्युदयं काव्यं च कारितवान् ॥ १६

यस्य धनं धनबीजं सुदेवगुर्वागमादिसत्क्षेत्रे ।
उप्तं श्रद्धांभोभिः सिक्तं स्वर्गादिफलदायि ॥ १७

यस्य भवानीदासः सहोदरः पुण्यवानपि कनीयान् ।
नृपसदसि लब्धमानः सौभाग्यसुभाग्यभोगनिधिः ॥ १८

स च रायमल्लसाधुः सद्धर्मसुधाब्धिवर्द्धननवेंदुः ।
जैनक्रियासु कुशलः कुशलैकशिरोमणिर्जीयात् ॥ १९

तच्छिष्योत्तमपद्मसुंदरकविः श्रीरायमल्लोदयं
काव्यं नव्यमिदं चकार सकलार्हद्वृत्तभव्यांकितं ॥ १००

जनपदेषु महान्कुरुजंगलः
सुकृतिभिः कृतिभिः कृतमंगलः ।
उडुगणेषु निशाकरमंडलः
किमु विभाति विभाकरतुंदिलः ॥ १

यत्रासिधारासत्तीर्थे स्नात्वा कुरुपांडवैः ।
वसुंधरावधूद्वाहकृते कृतपरिश्रमैः ॥ २

यत्र गंगासरित्पूरधारा हारायते भृशं ।
विलसद्भूमिभामिन्याः शंखकुंदेंदुसुंदरा ॥ ३

तत्र स्नात्रामपुरवद्धस्तिनामपुरं परं ।
तच्छाखानगरं रम्यं चरस्थावरसंज्ञकं ॥ ४

यच्च नानाद्रुमारामपरिमंडितमंडलं ।
विभ्राजते नु वसुधावनिताकर्णकुंडलं ॥ ५

यत्र रूपाः स्फुरद्रूपवीहपरिमंडलैः ।
पुष्करिण्यः पुष्करौघैः सारसैः परिशीलिताः ॥ ६

यत्र सौधाः सुधाशुभ्राश्चंद्रिकाधौतभूतलाः ।
जनताजनितानंदाः संति संतापहारिणः ॥ ७

नंद्यावर्त्तादयो यत्र नागराणां बभुर्गृहाः ।
स्फुटस्फुटिकपाषाणघटितामलविग्रहाः ॥ ८

यत्सौधशिखरस्थानां मुग्धानां मुखमंडलैः ।
लक्ष्यते पौरवृंदेन शतचंद्रायितं नभः ॥ ९

सुभावकाणां यत्र श्रीर्व्ययिता जिनसद्मसु ।
प्रोत्तुंगशिखरव्याजादुच्चैः पदमिवादिशत् ॥ १०

तत्राग्रोतकवंशे गोइलगोत्रे बभूव नरसिंहः ।
सिंहः सत्पुरुषाणां पौरुषवृत्त्या विभाति स्म ॥ ११

तत्पत्नी मदनाही शीलवती धर्मकर्मसु नितांतं ।
कुशलाथ रत्नगर्भा सुतरत्नद्वयमसौ सुषुवे ॥ १२

नानूचसहणपालस्तत्तनयौ विनयनयकलाकुशलौ ।
आस्तां निरस्तकलुषौ जिनधर्मपरायणौ नित्यं ॥ १३

नानूसाधोश्च सुधासुधांशुशुद्धांशुविशदगुणकीर्त्तेः ।
ऊढरहीपव्यासीन्निजशीलपवित्रितचरित्रा ॥ १३

रोहणभूरिव रत्नं नररत्नं रायमल्लतनयं सा ।
प्रासूत रत्नगर्भा जननी जननयनकुमुदेंदुं ॥ १४

यस्तु जिनचरणपूजापुरंदरः सुंदरः सदा स्वगुणैः ।
दाता ज्ञाता निपुणो जिनधर्मधुरंधरः सततं ॥ १५

एकोनपंचवर्गप्रमितजिनानां चरित्रसंदृब्धं ।
यो रायमल्लपूर्वाभ्युदयं काव्यं च कारितवान् ॥ १६

यस्य धनं धनबीजं सुदेवगुर्वागमादिसत्क्षेत्रे ।
उप्तं श्रद्धांभोभिः सिक्तं स्वर्गादिफलदायि ॥ १७

यस्य भवानीदासः सहोदरः पुण्यवानपि कनीयान् ।
नृपसदसि लब्धमानः सौभाग्यसुभाग्यभोगनिधिः ॥ १८

स च रायमल्लसाधुः सद्धर्मसुधाब्धिवर्द्धननवेंदुः ।
जैनक्रियासु कुशलः कुशलैकशिरोमणिर्जीयात् ॥ १९

तच्छिष्योत्तमपद्मसुंदरकविः श्रीरायमल्लोदयं
काव्यं नव्यमिदं चकार सकलार्हद्वृत्तभव्यांकितं ॥ १००

जनपदेषु महान्कुरुजंगलः
सुकृतिभिः कृतिभिः कृतमंगलः ।
उडुगणेषु निशाकरमंडलः
किमु विभाति विभाकरतुंदिलः ॥ १

यत्रासिधारासत्तीर्थे सुस्नातं कुरुपांडवैः ।
वसुंधरावधूद्वाहकृते कृतपरिश्रमैः ॥ २

यत्र गंगासरित्पूरधारा हारायते भृशं ।
विलसद्भूमिभामिन्याः शंखकुंदेंदुसुंदरा ॥ ३

तत्र सुत्रामपुरवद्धस्तिनामपुरं परं ।
तच्छाखानगरं रम्यं चरस्थावरसंज्ञकं ॥ ४

यच्च नानाद्रुमारामपरिमंडितमंडलं ।
विभ्राजते नु वसुधावनिताकर्णकुंडलं ॥ ५

यत्र रूपाः स्फुरद्रूपवीहपरिमंडलैः ।
पुष्करिण्यः पुष्करौघैः सारसैः परिशीलिताः ॥ ६

यत्र सौधाः सुधाशुभ्राश्चंद्रिकाधौतभूतलाः ।
जनताजनितानंदाः संति संतापहारिणः ॥ ७

नंद्यावर्त्तादयो यत्र नागराणां बभुर्गृहाः ।
स्फुटस्फुटिकपाषाणघटितामलविग्रहाः ॥ ८

यत्सौधशिखरस्थानां मुग्धानां मुखमंडलैः ।
लक्ष्यते पौरवृंदेन शतचंद्रायितं नभः ॥ ९

सुश्रावकाणां यत्र श्रीर्व्ययिता जिनसद्मसु ।
प्रोत्तुंगशिखरव्याजादुच्चैः पदमिवादिशत् ॥ १०

तत्राग्रोतकवंशे गोइलगोत्रे बभूव नरसिंहः ।
सिंहः सत्पुरुषाणां पौरुषवृत्त्या विभाति स्म ॥ ११

तत्पत्नी मदनाही शीलवती धर्मकर्मसु नितांतं ।
कुशलाथ रत्नगर्भा सुतरत्नद्वयमसौ सुषुवे ॥ १२

नानूचसहणपालस्तत्तनयौ विनयनयकलाकुशलौ ।
आस्तां निरस्तकलुषौ जिनधर्मपरायणौ नित्यं ॥ १३

नानूसाधोश्च सुधासुधांशुशुद्धांशुविशदगुणकीर्त्तेः ।
ऊढरहीपत्न्यासीन्निजशीलपवित्रितचरित्रा ॥ १३

रोहणभूरिव रत्नं नररत्नं रायमल्लतनयं सा ।
प्रासूत रत्नगर्भा जननी जननयनकुमुदेंदुं ॥ १४

यस्तु जिनचरणपूजापुरंदरः सुंदरः सदा स्वगुणैः ।
दाता ज्ञाता निपुणो जिनधर्मधुरंधरः सततं ॥ १५

एकोनपंचवर्गप्रमितजिनानां चरित्रसंदृब्धं ।
यो रायमल्लपूर्वाभ्युदयं काव्यं च कारितवान् ॥ १६

यस्य धनं धनबीजं सुदेवगुर्वागमादिसत्क्षेत्रे ।
उप्तं श्रद्धांभोभिः सिक्तं स्वर्गादिफलदायि ॥ १७

यस्य भवानीदासः सहोदरः पुण्यवानपि कनीयान् ।
नृपसदसि लब्धमानः सौभाग्यसुभाग्यभोगनिधिः ॥ १८

स च रायमल्लसाधुः सद्धर्मसुधाब्धिवर्द्धननवेंदुः ।
जैनक्रियासु कुशलः कुशलैकशिरोमणिर्जीयात् ॥ १९

ऊधाहीति प्रथमा तद्भार्या दानशीलसंपन्ना ।
धुरि सौभाग्यवतीनां पतिव्रतासीत्कुलगरिष्ठा ॥ २०

तत्पुत्रोमीद्रो दक्षो नयविनयशीलसंपन्नः ।
सद्धर्मकर्मनिरतो जयतादाचंद्रतारार्कं ॥ २१

अथ रायमल्लसाधोर्मीनाहीति द्वितीयभार्यासीत् ।
तत्कुक्षिशुक्तिगर्भे बभुः सुताः शुक्तिजाकृतयः ॥ २२

आद्यस्तूदयसिंहोनुजस्तथा शालिवाहनाभिख्यः ।
अपरोप्यनंतदासो नंदंतु चिरं त्रयस्तनयाः ॥ २३

वर्षे विक्रमराज्यतः शरकलाभृत्तर्कभूसंमिते
ज्येष्ठे मासि सिते च पंचमदिनेर्हद्दत्तसंदर्भितं ।
काव्यं कारितवानपूर्वरसवद्यो रायमल्लोदयं
जीयादारविचंद्रतारकमयं श्रीरायमल्लाह्वयः ॥ २४

इति श्रीपरमाप्तपरमपुरुषचतुर्विंशतितीर्थकरगुणानुवादचरिते पं० श्रीपद्ममेरुविनेय पं० पद्मसुंदरविरचिते वर्द्धमानजिनचरितमंगलकीर्त्तनं नाम पंचविंशः सर्गः ॥ २५

असुरसुरनरेंद्रव्यूहकोटीरकोटी-
मणिगणकिरणांभोधौतपादारविंदः ।
चरमजिनपतिस्ते वर्द्धमानः समिद्धां
प्रदिशतु शिवलक्ष्मीं राजमल्लाह्वयाय ॥ १ ।

आशीर्वादः ।

10. **Kanadarahasya** by PADMANÂBHA [कणादरहस्यम्। पद्मनाभ.].

Folios 1 to 22.

Begins:

॥ श्रीसर्वज्ञाय नमः ॥

जयति पुरनिहंतुः क्षोभपंचेषुबाणो-
जनि रचति पुमर्थानेककल्पद्रुमाणां ।
युगपदसुरजानां तद्वृहां त्रासहास्यौ
निरवधिगुणसीमा कोपि भीमा कटाक्षः ॥ १

स्तंबेरमाग्रणीयं भ्रमरकुलं दानपानरमणीयं ।
प्रद्योतमानगंडस्थलमंडलमंडनं जयति ॥ २
आरचय्य प्रयत्नाद्यैरिहैकाशीतिकारिकाः ।
आचार्यपद्मनाभेन व्याख्या संप्रति तन्यते ॥ ३

विघ्नध्वंसकामनया कृतं मंगलं शिष्यशिक्षायै निबध्नाति । कालिं-दीत्यादिना ॥

Ends:

अंतेपि मंगलं शिष्टाचारप्राप्तमिति तनोति । अक्षय्यघटेत्यादिना । अतिरिक्तं तु ग्रंथविस्तरभयान्न लिखितमित्युपरम्यते ॥

न प्रार्थयामि भवतो दुर्वृत्ताः प्रार्थये साधून् ।
अंगीकृतमपि येषां शेषादिभिरप्यहो दूभूष्य [sic] ॥
यद्यदत्र विनिक्षिप्तं नव्यं सिद्धांतवर्त्तिना ।
पद्मनाभेन तैः प्रीतः प्रगल्भोस्तु गुरोर्गुरुः ॥

इति श्रीसन्मिश्रश्रीजगद्गुरुबलभद्रात्मजविश्वनाथानुजविजयश्री-गर्भसंभवसकलशास्त्रारविंदप्रद्योनभट्टाचार्यमिश्रश्रीमत्पद्मनाभकृतौ स्व-कृतराद्धांतमुक्ताहारव्याख्याने कणादरहस्यं समाप्तमिति ॥

11. Pravachanasaroddharavishamapadavyakhya by UDAYAPRABHASÛRI [प्रवचनसारोद्धारस्य विषमपदव्याख्या । उदयप्रभसूरिः].

Folios 1 to 34. Dated Saṃvat 1526 = A.D. 1470.

Begins:

|| □ ||

प्रवचनसारोद्धारे विषमपदार्थावबोधमाधत्ते ।

श्रीउदयप्रभसूरिः श्रीपार्श्वाधीशमानम्य || १

सूत्रेणैव गतार्थे व्याख्या पुनरुक्तदोषपोषाय ।

हीनांग इत्यवज्ञा विज्ञैस्तेनात्र नो कार्या || २

यथा ।

सूत्रेणैष सुसूत्रः कार्यो हार इव योजितविमुक्तः ।

यस्माद्विषमपदार्थासंबंधिर्दुरधिगम्याः[1] || ३

तस्मात् ।

सारस्वतामृतनिषेकविबोधितेषु
प्रेक्षावतामिह मनःकमलाकरेषु ।
क्षीरोदकोद्धरणशास्त्रमराल एष
क्रीडाः प्रमोदमुदिताः सततं तनोतु || ४

नमिऊणमिति वक्ष्ये ।

Ends:

चउरंसेन परिमंडल इत्यादि || ८

समाप्तोयं प्रवचनसारोद्धारस्य विषमपदार्थावबोध इति ||

सपादलक्षक्षोणीशसमक्षं जितवादिनां ।
श्रीधर्मघोषसूरीणां पट्टालंकारकारकः || १
त्रिवर्गपरिहारेण गद्यगोदावरीसृजः ।
बभूवुर्भूरिसौभाग्याः श्रीयशोभद्रसूरयः || २

[1] °विषमपदार्थावबोधबंधा दु°?

स्वपरसमयज्ञानप्र[1]तीतप्रकृष्टजगज्जना-
श्रुतुरवचनामो[2]दापृष्टामरेशगुरुप्रभाः ।
अभिनृपसभं गंगागौरीप्रनर्त्तितकीर्त्तय-
स्तदनु महसः पात्रं जाता रविप्रभसूरयः ॥ ३
एवं प्रवचनसारे तच्छिष्यलवश्चकार टिप्पनकं ।
श्रीउदयप्रभसूरिर्विषमपदार्थावबोधाख्यं ॥ ४
इह संति तेपि सिद्धांतसिंधुपारीणबुद्धयः सुधियः ।
हृद्यात्मभवां[3] येषां कौस्तुभरत्नायते विश्वं ॥ ५
प्रवचनसारोद्धारश्रियः समस्तांगसंगसुभगानां ।
स्यात्तद्विचारचर्चा तेषामेषा प्रमोदाय ॥ ६
प्रवचनसारं सारं विषमपदार्थावबोधसंतप्तः ।
सत्यं उदयात्सवितुं[4] विश्वं विश्वमपि सजीवमाभाति ॥ ७
सर्वप्रकारसाहाय्यकारिणः क्षांतिशालिनः ।
जयप्रभस्य कृतिनः प्रयत्नादेष निर्मितः ॥ ८
अवधानवंध्यबुद्धिर्यदत्र न समंजसं ।
उक्तवानहमुत्सूत्रं तत्र मिथ्या कृतं मम ॥ ९
यद्वा यदत्र किंचित्तनुमतिभिर्दुष्टमुदितमस्माभिः ।
प्रीतास्तद्धीमंतः संतः कुर्वंतु निर्दोषं ॥ १० ग्रंथाग्रं ३३०३
मुनिचंद्रसूरिपंडितगुणचंद्राभ्यां भरादिहोपकृतं ।
प्रथमोत्सहनवाचनलेखनकर्मप्रकर्षेण ॥ ११
आकाशकमलं यावन्मेरुनालं हरिद्दलं ।
भानुर्विकाशयत्येष तावन्नंद्यादसौ भुवि ॥ १२
इति सिद्धांतावचूरिः ॥ संवत् १५२६ वर्षे ० लिखितावचूर्णिः ॥

---

[1] ० ज्ञानातीत०? [2] ० वचनामोदस्पृष्टामरेश०? [3] हृद्यात्मभुवां? [4] सवितुर्विश्वमपि?

12. **Parsvanathashtaka** by INDRANANDI with the **Commentary** of ŚRUTAKĪRTI [पार्श्वनाथाष्टकं सटीकम्। मू० इन्द्रनन्दिः। टी० श्रुतकीर्तिः].

Folios 1 to 20.

Begins:

॥ नमः श्रीपार्श्वनाथाय ॥

श्रीपार्श्वनाथमानम्य धरणेंद्रनमस्कृतं ।

पार्श्वाष्टकसंबद्धां सद्वृत्तिं विदधाम्यहं ॥ १

श्रीमदिंद्रनंद्याचार्यो मंत्रस्तुतिरूपेण श्रीपार्श्वनाथभट्टारकं स्तोतुकाम आह ॥

श्रीमन्नागेंद्ररुंडस्फुरितफणमणिद्योतिताशामुखश्रीः...

शाकिन्यः श्रींद्रनंदिप्रथितगतिरसौ पातु मां पार्श्वनाथः ॥ ८ ॥

Ends:

लब्धार्थलाभाः श्रुतकीर्त्तयस्ते

यद्वृत्तिरत्नाकरतो भवंतु ॥ १

पांडितश्रीश्रुतविरचितश्रीपार्श्वनाथाष्टकसद्वृत्तिः समाप्ता ॥

13 **Laghustava** with the **Commentary** by RAJAMUKUṬA [लघुस्तवः सटीकः। टी० राजमुकुटः].

Commentary begins:

॥ ॐ नमः श्रीत्रिपुरायै ॥

केवलाक्षरशुद्ध्यर्थमर्थमात्रप्रतीतये ।

लघुस्तवे मया वृत्तिरुद्धृता ज्ञानतो ननु ॥ १

अत्रायं श्लोकः ।

Text begins:

ऐंद्रस्येव शरासनस्य दधती मध्ये ललाटं प्रभां...

Text ends:

त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवं ॥ २१ ॥

Commentary ends:

अपिशब्दो विस्मयार्थे ॥ इति महाकविराजमुकुटमणिना विरचितभारतीस्तोत्रस्य स्वनाम्ना चिह्नितस्य लघुस्तवाभिधेयस्य भाष्यं परिसमाप्तमिति ॥

14. Prakritalakshana by CHANDA [प्राकृतलक्षणम् । चण्डः].

Folios 1 to 7.

Begins:

॥ ऐं नमः ॥ स्वस्ति श्रीगुरुभ्यो नमः ॥ अर्हं ॥

प्रणम्य शिरसा वीरं स्वल्पैर्व्यापिभिरक्षरैः ।
लक्षणं प्राकृतं वक्ष्ये किंचिद्बुद्धमनादहं ॥ १

क्वचिल्लोपः क्वचित्संधिः क्वचिद्वर्णविपर्ययः ।
आगमोत्यादिमध्येषु लक्ष्यःस्यात्सुभाषितात् ॥ २

सिद्धं प्राकृतं त्रेधा ।

Ends:

हंसे पथुत्ते ॥ ४० ॥

इति श्रीचंडकृते प्राकृतलक्षणे व्यंजनविधानं तृतीयं समाप्तं ॥ समाप्ता चैषा प्राकृतसारोद्धारवृत्तिः ॥

15. Pramanamanjari by SARVADEVASŪRI with an **Avachuri** [प्रमाणमञ्जरी सावचूरिः । सर्वदेवसूरिः].

Folios 1 to 6.

Begins:

॥ अर्हं नमः ॥

कासारतीरसरसीरुहमाददानः
शुभ्रं भ्रमद्भ्रमरमध्यमिवेंदुबिंबं ।
ह्रैमातुरश्चिरतरं भवतः स पाया-
त्संजातनिर्मलजलप्रतिबद्धनर्मा ॥ १

अभिवंद्य विधोरर्द्धधारिणं च कणव्रतम् ।
प्रमाणमंजरी शर्वदेवेन क्रियते मया ॥ २ ...
नाकाशे व्यभिचारः तस्यापि साधनात् ॥ इति ।

इति तार्किकसर्वदेवसूरिणा प्रणीतायां प्रमाणमंजर्यामभावपदार्थः सप्तमः ॥

Ends:

आकाशस्य सपक्षत्वान्न व्यभिचार इत्यर्थः ॥
प्रमाणमंजर्यामभावपदार्थावचूरिः सारप्रदर्शिनी ॥

16. **Mahapurushacharita** by MERUTUṄGÂCHÂRYA [महापुरुषचरितम् । मेरुतुंगाचार्यः].

Folios 1 to 9. Incomplete.

॥ ॐ नमः परमात्मने ॥

जयति स परमात्मा केवलज्ञानमूर्त्ति-
र्दलितनिखिलकर्मा शास्वतानंदमग्नः ।
हृदयकमलमंतर्यः सदालोक्यमानः
प्रवितरति मुमुक्षोर्मोक्षलक्ष्मीं प्रसन्नः ॥ १
श्रीऋषभनेमिशांतिश्रीमत्पार्श्वजिनवर्द्धमानानां ।
भवसहितान्यपि रचयिष्यंतेत्र चरितानि ॥ २
शेषमहापुरुषाणामास्मिन्सूत्रे तु संगृहीतानां ।
तद्गुणमात्रग्रहणाद्रचयिष्यंतेत्र चरित्राणि ॥ ३
श्रुतिमार्गाध्वगः प्राय उपदेशो गतागतैः ।
यदि विश्राम्यति श्रावकस्यापि कृतिनो हृदि ॥ ४

तथाहि ।

ग्रंथप्रारंभे इष्टदेवताप्रणिधानप्रधाना प्रेक्षावतां प्रवृत्तिरित्यौचित्यानस्तत्र[1] प्रथमनमस्कारो यथा ।

[1] औचित्यापादनस्तत्र ?

प्रणिधाय परंज्योतिर्नत्वा चंद्रप्रभुं गुरुं ।
उपदेशशतीं कुर्वे सूक्तमुक्ताकलस्रजं ॥ १...

इति श्रीमन्मेरुतुंगाचार्यविरचिते महापुरुषचरिते सपरिकरश्री-युगादिजिनचरितवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

17. Vastuvijnanaratnakosha [वस्तुविज्ञानरत्नकोश].
Folios 1 to 5.

॥ ॐ नमो वीतरागाय ॥

अथातो वस्तुविज्ञानरत्नकोशं व्याख्यास्यामः ॥

सर्वशास्त्रमयं रम्यं सर्वज्ञानप्रकाशिकं ।
स्वल्पग्रंथं सुबोधार्थं रत्नकोशं समभ्यसेत् ॥ १

तत्र शतेन सूत्राणां संग्रहो यथा ।

१ त्रीणि भुवनानि
२ त्रिविधं लोकस्थानं
३ त्रिविधा भूमिः
४ त्रिविधाः पुरुषाः
५ त्रयः पदार्थाः
६ चत्वारः पुरुषार्थाः
७ षट्त्रिंशद्राजवंशाः
८ सप्तांगं राज्यं
९ षण्णवतिराजगुणाः
१० षट्त्रिंशद्राजपात्राणि
११ षट्त्रिंशद्राजविनोदाः
१२ अष्टादशविधं स्थानं
१३ चतस्रो राजविद्याः
१४ चतस्रो राजनीतयः
१५ षट्त्रिंशद्दंडायुधानि
१६ सप्तविंशतिशस्त्राणि
१७ द्विपंचाशत्तत्त्वानि
१८ द्विसप्ततिकलाः
१९ चतुरशीतिविज्ञानानि
२० चतुरशीतिदेशाः
२१ द्वात्रिंशल्लक्षणास्थानानि
२२ चतुर्विंशतिविधं गृहं
२३ अष्टोत्तरशतं मंगलानां-स्थानानि
२४ त्रिविधं दानं
२५ पंचविधं यशः

२६ सप्तधा कीर्त्तिः
२७ अष्टौ रसाः
२८ एकोनपंचाशद्भावाः
२९ चत्वारोभिनयाः
३० चतस्रो वृत्तयः
३१ चत्वारो महानायकाः
३२ चत्वारो नायकाः
३३ द्वात्रिंशद्गुणनायकाः
३४ त्रिविधा महानायिकाः
३५ अष्टविधा नायिकाः
३६ द्वात्रिंशद्गुणनायिकाः
३७ त्रिविधं सौख्यं
३८ चत्वारि सौख्यस्य कारणानि
३९ नवविधो गंधोपयोगः
४० दशविधं शौचं
४१ द्विविधः कामः
४२ दश कामावस्थाः
४३ विंशती रक्तस्त्रीणां लक्षणानि
४४ एकविंशतिर्विरक्तस्त्रीणां लक्षणानि
४५ द्वाविंशतिः कामिनीनां विकारेंगितानि
४६ चतुर्विंशतिरसतीनां लक्षणानि
४७ षोडश दुष्टस्त्रीणामपलक्षणानि
४८ अष्टौ स्त्रीणामभिसारकारणानि
४९ अष्टौ नार्योगम्याः
५० अष्टविधो मूर्खः
५१ चतुर्विंशतिविधं नागरिकवर्त्तनं
५२ त्रिविधं रूपं
५३ त्रिविधं स्वरूपं
५४ द्वादशविधः प्रमोदोपचारः
५५ पंचविधः परिचयः
५६ दश पुरुषाः स्त्रीणामनिष्टा भवंति
५७ दशभिः कारणैः स्त्रियो विरज्यंते
५८ दशभिः कारणैः कामिन्यः संबध्यंते
५९ सप्तविधाः कामुकानां सुरतारंभाः
६० अष्टविधं विदग्धानां सुरतं
६१ नवविधं सुरतावसानं

६२ नवविधाः शयनगुणाः
६३ दशविधो नृपाणां प्रमोदः
६४ चतुर्विधः प्रबोधः
६५ चतुर्विधा बुद्धिः
६६ अष्टौ बुद्धिगुणाः
६७ चतुर्विधं गांधर्वं
६८ त्रिविधं गीतं
६९ षट्त्रिंशद्गीतगुणाः
७० चतुर्विधं व्याधं
७१ त्रिविधं नृप - - -
७२ षोडशविधं वादलक्षणं
७३ विंशतिविधं विकृत्वं[1]
७४ षड्विधं भाषालक्षणं
७५ पंचविधं पांडित्यं
७६ चतुर्विधं वादलक्षणं
७७ षड्विधं दर्शनलक्षणं
७८ अष्टविधं माहेश्वरं
७९ दशविधं ब्राह्मं
८० चतुर्विधं सांख्यं
८१ सप्तविधं जैनं
८२ दशविधं बौद्धं
८३ चतुर्विधं चार्वाकं
८४ चतुर्विंशतिविधं विचारकत्वं
८५ दशविधं गुरुत्वं
८६ पंचविधं चरित्रं
८७ पंचविधं पालनं
८८ सप्तविधमुत्तमत्वं
८९ नवविधा शक्तिः
९० सप्तविधा भुक्तिः
९१ अष्टविधमभिमानलक्षणं
९२ चतुर्विधं वात्सल्यं
९३ पंचविधो महोत्सवः
९४ सप्तविधा प्राप्तिः
९५ चतुर्विधं शौर्यं
९६ दशविधं बलं
९७ दशविधो जयः
९८ दशविधः संग्रहः
९९ पंचविधः परिच्छेदः
१०० पंचविधं प्रभुत्वं चेति ॥

सूत्राणां शतेन समूहः समाख्यातः ॥
अथ वस्तुविज्ञानरत्नकोशे समासेनैव निर्देशः समारभ्यते ॥
तत्रादौ त्रीणि भुवनानि १ सुरनरनागानां ॥ १ ॥

---

[1] विकृतत्वं ?

Ends:

पंचविधं प्रभुत्वं ॥ कुलप्रभुत्वं १ ज्ञानप्रभुत्वं २ दानप्रभुत्वं३ स्थानप्रभुत्वं ४ अभयप्रभुत्वं ५ ॥ १०० ॥

इति वस्तुविज्ञानरत्नकोशे सूत्रशतेन निर्देशो व्याख्यानं समाप्तमिति ॥

18. Srutasvadasiksha by SAHAJAKUŚALA [श्रुतास्वादशिक्षा। सहजकुशलः].

Folios 1 to 5.

Begins:

॥ ६० ॥

सिद्धत्थसुयं सिद्धं बुद्धं नमिऊण वीरमर्हंतं ।
देमि नियअप्पसिरकं विविहसुयस्सायसुहजणयं ॥ १ ॥

Ends:

समजिणसुरसुरकं अप्पणो बोहिदरकं
दुहदुरियविपरकं धम्मचिंतासुभिरकं ।
सहजकुसलसिरकं जो सहाणं समरकं
मुणिय धरइ दिरकं सो सुहं जाइ मुरकं ॥ १६८ ॥

॥ इति श्रुतास्वादशिक्षाग्रंथः ॥

19. Vicharasaraprakarana by PRADYUMNASŪRI [विचारसारप्रकरणम् । प्रद्युम्नसूरिः].

Folios 1 to 21.

Begins:

॥ श्रीसर्वज्ञाय नमः ॥

पणयजणपूरियासो भयइतासो गुणाण आवासो ।
उवसग्गवग्गनासो जयउ जए जिणवरो पासो ॥ १ ॥
मुणिरायतिलयभूई अच्चभुयच्चरियकयचमुक्कारो ।
सिरिधम्मघोससूरी वइयचूडामणी जयउ ॥ २ ॥

तस्स य सीसो गुणरयणजलनिही लद्धिबुद्धिसंजुत्तो ।
पढमो बुहजणणिलउ पंडियपउमप्पहो जयउ ॥ ३ ॥
चारित्तचक्कवट्टी खमदमसहिउ सहाइमियवयणो ।
सिरिदेवप्पहसूरी सुसिद्धहत्थो जए जयउ ॥ ४ ॥
पज्जुन्नसूरिलिहियं वियारलेसं जिणाण समयाउ ।
नमिउं देवं सुगुरुं सपरत्थं ताण सीसेण ५ ॥ ...

Folio 13 ·

थूलभद्दभगिणी सत्तत्ति ॥

जक्खा १ य जक्खदिन्ना २ भूया तह भूयदिन्ननामा य ।
सेणा५वेणा६रेणा७ताउ एयउ अणुक्कमसो ॥ १९ ॥
सो जयउ थूलभद्दो तिन्नि पमत्ताइ जस्स जायाइं ।
सीहविउव्वणममणं कहणं अत्थस्स मित्ताणं ॥ २० ॥
चउदसपुव्वच्छेउ संघयणं पढमयं च संट्ठाणं ।
सुहममहापाणाणि य छिन्नाइ थूलभद्दंमि ॥ २१ ॥
चरमजिणमुक्कगए चालीसेहिं चउहिं वरिससए ।
वइरो दसपुव्वधरो वइरमुणी तस्स साहाए ॥ २२ ॥
दसपुव्वयस्स छेउ संघयणं चउत्थयस्स तह चेव ।
साहंमि वइरनामे खीरासवलद्धि संपन्ने ॥ २३

किंचोणनवपुर्व्वधर आर्यरक्षितो जातः ।

आरेण अज्जरक्खियकालाणुन्नाउ नत्थि अज्जाणं ।
सामाइयवयमारोवणं च पच्छित्तदाणं च ॥ २४ ॥
पव्वाविउं सुहत्थी अज्जा[1] जक्खदिन्न नामाए ।
पव्वावणनिस्सेहो[2] इत्थिसपक्केवि अप्पाणं ॥ २५ ॥

[1] अज्जाए ? [2] °निम्मेहो ?

पंचेव य वरिससए सिद्धसेणदिवायरो य जयपयडो ।
छच्चसए वीसहिए सक्कथुई अज्जरक्खिपहू ॥ २६ ॥
सिरिवीरजिणवरिंमि मुक्के पत्तंमि गुरुदुरितदलणे ।
नवसय नऊहिं अहिए कालियसूरी समुप्पन्नो ॥ २७ ॥

सक्किसंथुणिउं । तेन य ।

पज्जुसवणं चउत्थि तह चउद्दसीए पडिक्कमणं ।
विहियं संघसमक्कं दसासुयक्कंधनिद्दिट्ठं ॥ २८ ॥
चउत्थीए पज्जुसवणं कालयसूरीहिं जुगप्पहाणेहिं ।
सिरिसालवाहणकए कथमणुमयमेव संघस्स ॥ २९ ॥
पंचसए पणतीए विक्कमभूयाउकत्ति अत्थमिउं ।
हरिभद्दसूरिसूरो धम्मरउं देउ मुक्कसुहं ॥ ३० ॥

अहवा ।

पणपन्न दससएहिं हरिसूरी आसि तत्थ पुव्वकवी ।
तेरसवरिससएहिं अहिएहिंवि बप्पहट्टिपहू ॥ ३१ ॥

Ends:

गाहग्ग नवसयाइं सिलोयमाणेण चउदससयाइं ।
नंदउ जा ससिसूरा पज्जुन्नसूरिवयणेणं १०० ॥

इति विचारसारप्रकरणं समाप्तं ॥

20. Nyayakandali by ŚRÎDHARA with the **Panjika** of RÂJAŚEKHARA [न्यायकन्दल्याः श्रीधरकृतायाः पञ्जिका । राजशेखरः].
Folios 1 to 73. Dated Saṃvat 1480 = A. D. 1424.
Begins:

ॐ नमः सर्वज्ञाय ॥

अनंतदर्शनज्ञानसुवीर्यमयात्मने[1] ।
जिनाय तस्मै कस्मैचित्परस्मै रहसे नमः ॥ १

[1] सवीर्यसमयात्मने?

श्रीमज्जिनप्रभविभोरधिगत्य न्यायकंदलीं किंचित् ।
तस्यां विवृतिलवमहं करवै स्वपरोपकाराय ॥ २

इह किल पूर्वमजिह्मब्रह्माभ्यासदूरीकृतप्रमादाय मुनये कणादाय स्वयमीश्वर उलूकरूपधारी प्रत्यक्षीभूय द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणं पदार्थषट्कमुपदिदेश । तदनु स महर्षिर्लोकानुकंपया षट्पदार्थरहस्यप्रपंचनपराणि सूत्राणि रचयांचकार । तेषु सूत्रेषु प्रशस्तकरदेवो भाष्यं सकृद्ध्वननमात्रेण महोग्रदष्टकविषापहारदृष्टलोकोत्तरवैभवं चकार । तत्र चतस्रो वृत्तयो निवृत्ताः । एकां व्योमवतीनाम्नीं वृत्तिं व्योमशिवाचार्यो जुगुंफ । द्वितीयां तु न्यायकंदल्यभिधानां श्रीधराचार्यः संददर्भ । तृतीयां किरणावलीनाम्नीमुदयनाचार्यस्तनुते । चतुर्थीं तु लीलावतीति ख्यातां श्रीवत्साचार्यो बबंध । चतस्रोपि गंभीरार्थाः । तत्रेमां न्यायकंदलीं प्रारभमाणः श्रीधरदेवः शिष्टसमयपरिपालनायेश्वरविष्णुब्रह्मलक्षणामिष्टदैवतत्रयीमेकेनाद्यश्लोकेन प्रणिदधानः प्राह ।

स चायं ।

अनादिनिधनं देवं जगत्कारणमीश्वरं ।
प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहं ॥ १

Ends :

इति समवायपदार्थः समर्थितस्तत्समर्थनायां च समर्थितेयं भट्टश्रीश्रीधरविरचितन्यायकंदलीवृत्तिरिति ॥

अथ भट्टश्रीधरो ग्रंथप्रशस्तिं प्रस्तौति । सुवर्णेत्यादिपद्यैः । अक्षीणनिजपक्षेष्विति । अक्षीणनिजप्रतीतेषु विद्वत्सु इति यावत् । अच्छुकेति । अंभोकेत्यपि पाठः । षट्पदार्थहितामिति । तर्कपक्षे षड्भ्यः पदार्थेभ्यो द्रव्यगुणकर्मसामान्यविशेषसमवायेभ्यो हितां । द्वितीय-

पक्षे षट्पदार्थे भ्रमरार्थे हितां श्रीपांडुदासेति कायस्थस्याख्या । उपायं करोतीति । अत्रत्यं जल्पं तैरेवार्थैः शब्दपरावर्त्तेन स्वग्रंथांतर्निक्षिपति ततश्च मयेदं रचितमिति वक्तीत्यर्थः । पंचानामिति ब्रह्महत्यासुरापानस्तेयगुर्वंगनागमनतत्संसर्गाख्यानामिति न्यायकंदलीप्रशस्तिः ।

श्रीप्रभवाहनकुले कोटिकनामनि गणे जगद्वंद्ये ।
श्रीमध्यमशाखायां वंशे श्रीस्थूलिभद्रमुनेः ॥ १
गच्छे हर्षपुरीये श्रीमज्जयसिंहसूरिवरशिष्यः ।
षष्ठाष्टमतीव्रतपाः षड्विकृतित्यागसाहसिकः ॥ २
देव्याश्चक्रेश्वर्याः प्रतिपन्नः सुतः श्रुताब्धिगोविंदः ।
श्रीअभयसूरिरवभवन्निःसंगसिद्धबहुविद्यः ॥ ३ ॥

त्रिभिर्विशेषकं ।

परःसहस्रान् भूदेवान् यक्षं कडमडं च यः ।
प्रबोध्य मेडतपुरे वीरचैत्यमचीकरत् ॥ ४
श्रीगूर्जरेश्वरो दृष्ट्वा तीव्रं मलपरीषहं ।
श्रीकर्णो विरुदं यस्य मलधारीत्यघोषयत् ॥ ५
नाथं सुराष्ट्राराष्ट्रस्य खेंगारं प्रतिबोध्य यः ।
उज्जयंततीर्थपथं खिलीभूतमवीवहत् ॥ ६
यस्योपदेशान्निर्मुच्य चतस्रश्चपलेक्षणः ।
प्रद्युम्नो राजसचिवश्चारित्रं प्रत्यपद्यत ॥ ७
श्रीहेमचंद्र इत्यासीत्सूरिर्भूरिगुणः स तु ।
ग्रंथलक्षविनिर्माता निर्ग्रंथानां विशेषकः ॥ ८
प्रतिबोध्य सिद्धभूधवमुद्दंडैः कनकदंडकलसैर्यः ।
उत्तंसितवान् परितः स्वदेशपरदेशचैत्यानि ॥ ९

प्रतिवर्षजीवरक्षामशीत्यहमशीत्यहं ।
यस्योपदेशात्सिद्धेशस्ताम्रपत्रेष्वलीलिखत् ॥ १०

श्रीश्रीचंद्रमुनीद्रो विबुधेंदुमुनिश्च तस्य वंद्यौ द्वौ ।
यौ लाटदेशमुद्रामुज्झित्वा जगृहतुर्दीक्षां ॥ ११

श्रीचंद्रसूरिशिष्यः श्रीमुनिचंद्रः प्रभुः शुचिचरित्रः ।
चौलुक्यमानलनृपं वाग्मी प्रव्राजयामास ॥ १२

तत्क्रमिको देवप्रभसूरिः किल पांडवायनचरित्रं ।
श्रीधर्मसारशास्त्रं च निर्ममे सुकविकुलतिलकः ॥ १३

तदीयसिंहासनसार्वभौम-
सूरीश्वरः श्रीनरचंद्रनामा ।
सरस्वतीलब्धवरप्रसाद-
स्त्रैविद्यमुष्टिंधयधीर्बभूव ॥ १४

टिप्पनमनर्घ्यराघवशास्त्रे किल टिप्पनं च कंदल्यां ।
सारं ज्योतिषमदृभद्यः प्राकृतदीपिकामपि च ॥ १५

तस्य गुरोः प्रियशिष्यः प्रभुर्नरेंद्रप्रभः प्रभावाढ्यः ।
योलंकारमहोदधिमकरोत्काकुत्स्थकेलिं च ॥ १६

राजानः प्रतिबोधिताः कति कति ग्रंथाः स्वयं निर्मिता
वादींद्राः कति निर्जिताः कति तपांस्युग्राणि तप्तानि च ।
श्रीमद्धर्षपुरीयगच्छमुकुटैः श्रीसूरिसुत्रामभि-
स्तच्छिष्यैर्मुनिभिश्च वेत्ति नवरं वागीश्वरी तन्मतिं ॥ १७

नरचंद्रसूरिवंशे सूरिः श्रीपद्मदेव इत्यासीत् ।
सूरिः श्रीश्रीतिलकस्तस्य मृगेंद्रासने जयति ॥ १८

तच्चरणरेणुकणिकाभूषितभालस्थलोत्र कंदल्यां ।
श्रीराजशेखरोयं सूरिः श्रीपंजिकामतनोत् ॥ १९
पूज्यश्रीतिलकाभिधानसुगुरोः सामर्थ्यमेतद्ध्रुवं
मादृक्षोपि यदत्र सभ्यपुरतो धत्ते वचश्चापलं ।
यद्विंभा अपि शुद्धसंस्कृतगिरः कश्मीरदेशोद्भवा
वाग्देव्याः स खलु प्रभावविभवस्तत्र स्थितायाश्चिरात् ॥ २०
यदत्र दोषकालुष्यं जातं मे मतिमांद्यतः ।
तत्क्षालयंतु संतः स्वबुद्धिगंगांबुधारया ॥ २१

21. **Kshetrasamgrahani** by HARIBHADRASÛRI with the **Commentary** of PRABHÂNANDASÛRI [क्षेत्रसंग्रहणिः सटीका । मू० हरिभद्रसूरि. । टी० प्रभानन्दसूरिः].

Folios 1 to 17.

Begins :

॥ नमो वीतरागाय ॥

नत्वा श्रीवीरजिनं संदर्शितविश्वविश्ववस्तुचयं ।
श्रीक्षेत्रसंग्रहण्या वृत्तिं कुर्वे यथाशक्ति ॥ १ ॥

दत्तैकांतवादिसंदोहविशारदानां गिरा स्वर्गापगानादानुवादानां श्रीहरिभद्रसूरिपादानां कृतेर्व्याचिख्यासायां मादृशस्याल्पमेधसः कोवकाशस्तथाप्यर्थनिपुणप्रकरणरागाच्च शक्तिमजानानोप्युपक्रमे ॥ इह तावत्सूत्रकारः प्रथमं चतुरतिशयस्वरूपभगवच्चमस्कारमंगलाद्यभिधायिकां शिष्टोपदिष्टमार्गानुसरणार्थमाद्यगाथामाह ॥

नमिय जिणं सव्वन्नुं जयपुज्जं जयगुरुं महावीरं ।
जंबुद्दीवपयत्थे वुच्छं सुत्ता सपरहेउ ॥१॥

Ends :

कैः कृतेयमित्याह । श्रीहरिभद्रसूरिभी रचितास्तत्र तया निबद्धेति भद्रं ॥

नित्यं श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुत-
ज्ञानश्रीसमलंकृताः सुविशदाचारप्रभाभासुराः ।
येषां वासस्नपया[1] प्रसन्नतरया शीलांबुसंपूर्णया
भव्यस्येह न कस्य कस्य विदधे [2]रंतोमलक्षालनं ॥१॥

वित्ते श्रीकृष्णगच्छे श्रवणपरिवृढश्रीप्रभानंदसूरिः
क्षेत्रादेः संग्रहण्या अकृतसमयगैः संवदंतीं सदर्थैः ।
एतां वृत्तिं खनंदज्वलनविधुमिते विक्रमाब्दे चतुर्थ्यां
भाद्रस्य श्यामलायामिह यदनुचितं तद्बुधाः शोधयंतु ॥२॥

॥ क्षेत्रसंघयणीवृत्तिः समाप्ता ॥

22. **A Great Commentary** on the **Yatijitakalpa** by SÁDHURATNA [यतिजीतकल्पवृहद्वृत्ति । साधुरत्न].

Folios 1 to 115.

Begins :

॥ ॐ नमः श्रीजिनप्रवचनाय ॥

जयति महोदयशाली भास्वान् श्रीवर्द्धमानतीर्थपतिः ।
विशदं चरणपथं सा तपःस्थितिर्यदुदिता तनुते ॥ १ ॥

जयति प्रवचनदीपः प्रतिहतदुरपोहमोहतिमिरौघः ।
चित्रं निरंजनोयं जगति गुणग्रामवृद्धिकरः ॥ २ ॥

सकलत्रिलोकाविस्मयविधायिनिस्सीमगुणातिशयान् ।
बहुविधलब्धिसमृद्धान्निखिलानपि गणधरान्नौमि ॥ ३ ॥

प्रणमामि विश्रुतश्रीजिनभद्रगणिक्षमाश्रमणमुख्यं ।
संक्षिप्तजीतकल्पं महाश्रुताद्यः समुद्ध्रे ॥ ४ ॥

---

[1] वाग्भवया ? [2] चेतो ?

श्रीसोमप्रभसूरीन् गुरूत्तमान्स्तौमि विश्रुतातिशयान् ।
सुविहितहिताय विहितः सव्यासो यैरसावेव ॥ ५ ॥
श्रीसोमतिलकसूरीन् वंदे विख्यातवैभवाभ्युदयान् ।
यैरस्य जीतकल्पस्यातेने वृत्तिरतिविशदा ॥ ६ ॥
मंदमतिबोधहेतोरतिगहनमहागमावगाहनया ।
कालानुभाववशतो व्युच्छिन्ना सा तदैव परं ॥ ७
युग्मं ।
जगति जयंति गरिष्ठा गुरवः श्रीदेवसुंदरमुनींद्राः ।
संप्रति निष्प्रतिमगुणप्रभाप्रभावाद्भुता विदिताः ॥ ८ ॥
ये निजवचनसुधांजनवशेन शिष्यस्य मादृशस्यापि ।
उद्घाटयंति लोचनमांतरमज्ञानतिमिरभृतं ॥ ९ ॥
तस्याः पुनरालेखे चित्रकलाकौशलेन विकलोपि ।
तैः स्वविनेयकनिष्ठोप्यादिष्टोयं ततो यतते ॥ १० ॥
यद्यपि साहसमेवं कुर्वन् हास्योस्मि तदपि किं कुर्वे ।
यन्मामत्र प्रसभं प्रेरयति गुरुप्रसादोयं ॥ ११ ॥

इह दुःषमांधकारनिमग्नजिनप्रवचनप्रदीपायमानश्रीजिनभद्रगणिक्षमाश्रमणविरचितो जीतकल्पोतिसंक्षिप्तः । निशीथभाष्यादिच्छेदग्रंथाश्चातिमहांतो दुरवगाहाश्च । अतः साध्वनुग्रहाय श्रीपूज्यसोमप्रभसूरयः किंचित्सविस्तरप्रायश्चित्तप्रतिपत्तये प्रायो जीतकल्पनिशीथाद्यंतर्गतगाथाभिरेव यतिप्रायश्चित्तविभागाविर्भावकं जीतकल्पनामकं प्रकरणं चिरंतनजीतकल्पार्त्किंचित्समधिकगाथाकदंबकं कृतवंतः । परं द्विधा विनेया योग्या अयोग्याश्च । तत्र योग्या ये रंगत्संवेगतरंगिणीतरंगप्रक्षालितांतरमलाः परिमलितबुद्धयः समस्तसिद्धांतमहार्णवपारीणाः परिणतवयसः सर्वपथीनप्रतिभाप्राग्भारसारचेतसः सततमुत्स-

र्गापवादगोचराचारचतुराश्चिरप्रव्रजिताः । ये च तद्विपरीतास्तिंतिणिकादयश्चाग्रतो वक्ष्यमाणस्वरूपास्तेयोग्याः । एतेषामयं जीतकल्पो न दातव्यः । यतः ।

आमे घडे निहित्तं जहा जलं तं घडं विणासेइ ।
इअ सिद्धंतरहस्सं अप्पाहारं विणासेइ ॥ १ ॥

अतो योग्यानामेव दातव्यः । अत्र चादौ पूर्वजीतकल्पगतास्तद्रूपा एव चतुर्विंशतिगाथाः संति तासां व्याख्यापि प्रायस्तद्रूपैव । तथाहि । सर्वाण्यपि शास्त्राणि मंगलाभिधेयप्रयोजनप्रतिपादनपुरस्सराण्येव प्रणीयंते विशेषतो निःशेषकल्मषकरीषंकषो जीतकल्पस्ततस्तस्यादौ मंगलादिप्रतिपादिकेयं गाथा ॥

कयपवयणप्पणामो वुच्छं पच्छित्तदाणसंखेवं ।
जीअव्ववहारगयं जीवस्स विसोहणं परमं ॥ १ ॥

Ends:

अमुद्रसकलपरमागमसमुद्रं महाप्रयत्नेनावगाह्यामृतकल्पं प्रकटमकारीति ।

इति श्रीयतिजीतकल्पवृत्तिर्जगत्प्रतीतश्रीतपागच्छाधिराजसुविहितशिरोमणिभट्टारकप्रभुश्रीदेवसुंदरसूरिशिष्यश्रीसाधुरत्नसूरिकृता ॥

वर्षे तर्कशराब्धिचंद्रगणिते १६५६श्रीविक्रमार्काद्गते
गुर्वादेशवशाद्विलोक्य सकलाः कल्पादिशास्त्रावलीः ।
सूरिः श्रीयुतदेवसुंदरगुरोः शिष्याग्रणीरातनो-
देतां श्रीयतिजीतकल्पविवृतिं श्रीसाधुरत्नाह्वयः ॥ १ ॥

प्राज्ञैरुद्देशतो वृत्तौ ग्रंथमानं विनिश्चितं ।
सहस्राः पंच श्लोकानां शतैः सप्तभिरन्विताः ॥ २ ॥

23. **A Short Commentary** on the **Gitagovinda** by MÂNÂNKA [गीतगोविंदकाव्यस्य टिप्पनिका । मानांकः].

Incomplete.

Folio 1.

Begins:

|| श्रीपरमात्मने नमः ||

चराणां स्थावराणां च येन ज्ञानं चराचरं ।
सर्वज्ञाय नमस्तस्मै ज्ञानदात्रेच्युतात्मने || १
कवीनां मतिमतानां च स्वार्थाय सुखबुद्धये ।
कृता टिप्पनिका मुख्या मानांकेन महीभुजा || २
वासना वासुदेवस्य सद्यः पापापनुत्तये ।
गीतगोविंदकं काव्यं जयदेवश्चकार सः || ३

यस्यायमाद्यश्लोकः । मेघैरित्यादि ||

24. **Navatattvaprakarana** by JINACHANDRAGAṆI, with **Bhashya** by ABHAYADEVASÛRI and **Vivarana** by YAŚODEVASÛRI [नवतत्त्वस्य सभाष्यस्य विवरणम् । मू० जिनचन्द्रगणिः । भाष्य० अभयदेवसूरि. । टी० यशोदेवसूरि·].

Folios 1 to 51.

Begins:

|| ॐ नमः सर्वज्ञाय||

मोक्षस्यादिमकारणं जिनवरोद्दिष्टार्थरुच्यावहं
लक्ष्यं लक्षविपन्नबुद्धिविभवैः क्षांत्यादिभिः सद्गुणैः ।
यैरादेशि सुरासुरेंद्रविनतैः सद्दर्शनं देहिनां
नत्वा तान्निहतांतरारिनिकरान्नाभेयमुख्यान् जिनान् || १
सम्यक्त्वार्थनिरूपणगाथाः श्रीदेवगुप्तसूरिर्याः ।
कृतवांस्तासां विवरणमभिधास्ये भाष्यसहितानां || २

इह क्रोधादिकलुषकषायकरालपातालभीषणे जन्मजरामरणनीरपूरपूरिते महामोहावर्त्तपतितानंतजंतुसंतानसंकटे नानाधिव्याधिबा-

धासहस्रक्रूरजलचराकुलेनर्वाक्परपारसंसारपारावारे प्रचुरतरमिथ्या-
प्रकारमकरनिकरावलुप्यमानमवलोक्य सकलजीवलोकमनन्यशरणं
परमकारुणिकः श्रीमन्महावीरवर्द्धमानस्वामी सिद्धसांयात्रिको वि-
हिततदुत्तारणाभिलाषोनंतसुखसंदोहमहानंदनगरनिनीषयानेकविधवि-
शुद्धजीवपरिणामफलकावबद्धं प्रशमादिलिंगसितपटोपलक्ष्यमाणं स-
म्यक्त्वयानमादर्शयत् । तस्य च समस्तधर्ममूलभूतत्वात्स्वरूपादिप्रति-
पादनपराः श्रीदेवगुप्तसूरिणा कतिचिद्गाथा जिनमतोदधेरुद्धृतास्तासां
चातिमहार्थत्वाद्यद्यप्यभयदेवसूरिणा भाष्यं गाथाभिः कृतं तथापि
तासां तद्भाष्यगाथानां च गंभीरमहार्थतया विषमत्वात्तावन्मात्रेण
बोद्धुमशक्यत्वान्मंदमतिबोधार्थं व्याख्या प्रस्तूयते । तासु चेयमा-
दिसूत्रगाथा ॥

सम्मं च मोक्खबीयं तं तु ण भूयत्थसद्दहणरूवं ।
पसमाइलिंगगम्मं सुहायपरिणामरूवं तु ॥ १

Ends :

सूत्रकार एवाधुना प्रकरणकरणफलमुपदर्शयितुं स्वकृतत्वं च
प्रकरणस्य सूचयितुं स्वनामगर्भां समाप्तिगाथामाह ।

इय एए नवतत्ता सभेयभिन्नाउ संगहनिमित्तं ।
गणिणा जिणचंदेणं सरणत्थं अप्पणो रइया ॥

व्याख्या ।

इयत्ति । एवं पूर्वोक्तनीत्या एतानि नवतत्त्वानि प्राकृतत्वाच्च पुंसा
निर्द्दिष्टानि सभेदभिन्नानि नवानामपि तत्त्वानां ये भेदाः संभवंति तैः
सह भिन्नानि पृथग्भूतानि प्रत्येकभणनात्तुशब्दः पूरणे संग्रहः संक्षेप-
करणं तदर्थं संग्रहनिमित्तं गणिना षाण्मासिकभगवत्यंगोपधानोद्व-
हनावाप्तगणिनाम्ना जिनचंद्रेण पूर्वावस्थानामैतत्तस्योत्तरावस्थायां तु

श्रीदेवगुप्ताचार्येणेत्यर्थः । जिनचंद्रगणिनेति भणनेन चैतज्ज्ञापितमेतन्नाम्ना सता मयेदं प्रकरणमकारि । किमर्थं पुनरेतेन च पदार्थाः संगृह्यंते नोक्तास्तत्त्वार्थादिप्रकरणेषु पूर्वसूरिभिरेवामीषां प्रपंचितत्वादित्याशंकापनोदाय स्वयमेवाह स्मरणार्थमात्मनो रचिता । अयमर्थो यद्यपि गंधहस्तिभाष्यादिषु प्रपंचेनामी दर्शितास्तथापि ते कार्यकालोपयोगिनो नास्मादृशां मंदमतीनामतः संक्षेपेणात्मस्मरणार्थं रचिता आत्मस्मरणार्थं कृताश्चान्येषामप्युपयोगिनो भविष्यंतीति गाथार्थः ॥ १९२ ॥

इदानीं भाष्यकार आत्मव्यापारं सप्रयोजनमुपदर्शयन्समाप्तिगाथामाह ॥

इय पुव्वसूरिविरइय संमत्तपरूवणत्थगाहाणं ।
विवरणमेयं भणियं मंदमईणं विबोहत्थं ॥

व्याख्या ॥

इयत्ति । एवं पूर्वोक्तसूरिभिः श्रीदेवगुप्ताचार्यैर्विरचिताः कृता याः सम्यक्त्वप्ररूपणार्थं सम्यग्दर्शनप्रकटनार्थं गाथास्तासां विवरणं व्याख्यानमेतद्गणितं गदितं मंदमतीनामल्पबुद्धीनां विबोधार्थमवगमार्थमिति भाष्यकर्तुः श्रीमदभयदेवसूरेः स्थानांगादिवृत्तिकृतो वचनमिति गाथार्थः ॥ १९३ ॥

समाप्तं नवतत्त्वप्रकरणस्य सभाष्यस्य विवरणं ।

नमो नवतत्त्वप्ररूपणाविधायकेभ्यो धर्मतीर्थकरेभ्यो नमः श्रुतदेवतायै नमो जिनशासनप्रभावकेभ्यः ॥

कृत्वा विवरणमेद्यदर्जितं पुण्यमिह मया किंचित् ।
तस्मात्तदर्थिलोकस्य भवतु नवतत्त्वसद्बोधः ॥ १

उत्सूत्रमत्र रचितं यदनुपयोगान्मया कुबोधाद्वा ।
तच्छोधयंतु सुधियः सदाशया मयि विधाय कृपां ॥ २
विलसद्गुणमणिनिकरः पाठीनविराजितो नदीनश्च ।
जलनिधिरिवास्ति गच्छः श्रीमानूकेशपुरनिसृतः ॥ ३
तत्रासीदतिशायिबुद्धिविभवश्चारित्रिणामग्रणीः
सिद्धांतार्णवपारगः स भगवान् श्रीदेवगुप्ताभिधः ।
सूरिर्भूरिगुणान्वितो जिनमतादुद्धृत्य येन स्वयं
श्रोतृणां हितकाम्यया विरचिता भव्याः प्रबंधा नवाः ॥ ४
तेनैव स्वपदप्रतिष्ठिततनुः श्रीकक्कसूरिप्रभु-
र्नानाशास्त्रसुबोधबंधुरमतिर्जज्ञे स विद्वानिह ।
मीमांसां जिनचैत्यवंदनविधिं पंचप्रमाणीं तथा
बुद्ध्वा यस्य कृतिं भवंति कृतिनः सद्बोधशुद्धाशयाः ॥ ५
तत्पादपद्मद्वयचंचरीकः शिष्यस्तदीयोजनि सिद्धसूरिः ।
तस्माद्बभूवोज्ज्वलशीलशाली त्रिगुप्तिगुप्तः खलु देवगुप्तः ॥ ६

अपि च ।

यं वीक्ष्य निःसीमगुणैरुपेतं
श्रीसिद्धसूरिः स्वपदे विधातुं ।
श्रीमत्युपाध्यायपदे निवेश्य
प्रख्यापयामास जनस्य मध्ये ॥ ७

तदंतेवास्युपाध्यायो धनदेवाद्यनामकः ।
यशोदेवो जडोप्येतद्भाष्टर्चाद्विवरणं व्यधात् ॥ ८
विक्रमनृपतेरेकादशशतसंख्येष्वितेषु वर्षेषु ।
अधिके चतुःसप्ततिसमाभिरिदमागमत्सिद्धिं ॥ ९

श्रीमदणहिल्लपाटकनगरोकेशीयवीरजिनभवने ।
रचितमदः श्रीजयसिंहदेवनृपतेश्च सौराज्ये ॥ १०
श्रीमद्देवाचार्यैः कुशलैः सिद्धांतमुख्यविद्याङ्ग ।
शोधितमिदमु -- सूरिश्रीसिद्धसूरियुतैः ॥ ११
यावज्जैनेश्वरो धर्मो भव्यचेतस्सु वर्त्तते ।
वाच्यमानमिदं तावत्साधुभिर्भवताद्भुवि ॥ १२
प्रत्यक्षरं निरूप्यास्य ग्रंथमानं विनिश्चितं ।
अनुष्टुभां सहस्रे द्वे चतुःशतसमन्विते ॥ १३ ॥

शुभं भवतु ।

C

Extracts from Books preserved in other Libraries.

Gathasahasri by SAMAYASUNDARA [गाथासहस्री । समयसुंदर].
Folios 42. Dated Samvat 1686 = A. D. 1630.
Folio 5:

पंचसया चोआला तईया सिद्धिं गयस्स वीरस्स ।
तो अंतरंजिआए तेरासिअदिट्ठिउप्पत्ति ॥ ९६
छव्वाससएहिं नउत्तरेहिं सिद्धिं गयस्स वीरस्स ।
तो बोडीअणदिट्ठी रहवीरपुरे समुप्पन्ना ॥ ९७
बारसवाससएहिं सड्ढेहिं निव्वुअस्स वीरस्स ।
जिणधरमठआवासो पगप्पिउं सायसीलेहिं ॥ ९८
पंचसु सएसु वरिसाण अईगएसु जिणाउ वीराउं ।
वइरो सोहग्गनिही सुनंदगम्भे समुप्पन्नो ॥ ९९
पंचसए पणतीए विक्कमकालाउज्झति अत्थमिउं ।
हरिभद्दसूरिसूरो निव्वुउ दिसउ सिवसुक्खं ॥ १००

तेरसवाससएहिं वीराउ समहिएहिं निवुत्तो ।
सिरिबप्पभट्टिसूरी विउसाण सिरोमणी जाउ ॥ १०१
पणसयरि वरिसाणं तिन्निसयसमन्नियं अइक्कमियं ।
विक्कमकालाउ तउ वलहीभंगो समुप्पन्नो ॥ १०२

श्रीविक्रमादित्यनृपस्य काला-
दष्टोत्तरे वर्षशते व्यतीते ।
शत्रुंजये जावडिना प्रतिष्ठा
विंबस्य पाषाणमयस्य कारिता ॥ १०३

छव्वाससएहिं नवुत्तरेहिं रयणेण रेवयगिरिंमि ।
संठविअं मणिबिंबं कंचणभवणाउ तेऊणं ॥ १०४
बारसवाससएहिं पन्नासहिएहि वद्धमाणाउ ।
चउदसिपढमपदेसो पकप्पिउ साईसूरीहिं ॥ १०५

॥ इति गच्छोत्पत्तिप्रकीर्णके ॥...

तेणउअ नवसएहिं समइक्कंतेहि वद्धमाणाउ ।
पज्जोसवणचउत्थी कालगसूरीहि तो ठविआ ॥ ६
वीसहिं दिणेहिं कप्पो पंचगहाणीइ कप्पठवणा य ।
नवसयतेणउहिं वुछिन्ना संघआणाए ॥ ७
सालाहणेण रन्ना संघाएसेण कारिउ भयवं ।
पज्जोसवणचउत्थी चउम्मासं च चउदसिए ॥ ८
चाउमासयपडिकमणं पक्खियदिवसंमि चउव्विहो संघो ।
नवसयतेणउवेहिं आयरणं तं पमाणंति ॥ ९

॥ इति गाथाचतुष्टयं तीर्थोद्गालिप्रकीर्णके ॥

सिरिवीराउ गएसुं पणतीसहिएसु तिवरससएसु । ३३५
पढमो कालगसूरी जाउ सामज्जनामुत्ति ॥ १०

चउसयतिपन्नवरिसे ४५३ कालिगगुरुणा सरस्सई गहिआ ।
चउसयसत्तरि ४७० वरिसे वीराउ विक्कमो जाउ ॥ ११

इति श्रीहरिभद्रसूरिकृते पंचवस्तुके ॥...

Folio 33 :

इति ज्ञानपंचकविवरणं प्रकरणं श्रीहरिभद्रसूरिकृतं [तत्र गाथाः २६]।

Folio 34 :

चतुस्तिलैर्जवः प्रोक्तश्चतुर्जवैश्च अंगुलं ।
चतुर्भिरंगुलैर्मुष्टिश्चतुर्मुष्टिमितः करः ॥ ४३
चतुर्हस्तैश्च दंडः स्यात् क्रोशस्तैर्द्विसहस्रकैः ।
चतुर्भिः क्रोशकैश्चाथ योजनं परिकीर्त्तितं ॥ ४४
शतयोजनदेशः स्याच्छतदेशं तु मंडलं ।
शतमंडलखंडः स्यान्नवखंडा वसुंधरा ॥ ४५

॥ इति गाथात्रयं गणिते ॥

Folio 34 :

पुव्वभवा सो पेच्छइ इक्कं दो तिन्नि जाव नवमं वा ।
उवरिं तस्स अविसउ सभावउ जाइसरस्स[1] ॥ ४७

॥ इतींद्राचार्यकृतयोगविधौ ॥

चउदस वासाणि तया जिणेण उप्पाडियस्स नाणस्स ।
तो बहुरयाण दिट्ठी सावत्थीए समुप्पण्णा॥ ४८ ॥
जेट्ठासुदंसणजमालिणुज्ज सावत्थितिंदुजाणे[2] ।
पंचसया य सहस्सं ढंकेण जमालिपुत्तेणं ॥ ४९

॥ इति जमालिमतं ॥

सोलसवासाणि तया जिणेण उप्पाडियस्स नाणस्स ।
जीवपएसिअदिट्ठी उसभपुरंमि समुपन्ना ॥ ५०

---

[1] °समरस्स ? [2] °तिंदुकुज्जाणे ?

रायगिहे गुणसिलए वसुचउद्दसपुव्वितीसगुत्ताऊ ।
आमलकप्पानयरी मित्तसिरिकूरपिउडाई ॥ ५१
॥ इति द्वितीयस्तिष्यगुप्तनिह्नवः ॥
चउदस दोवाससया तईया सिद्धिं गयस्स वीरस्स ।
अचित्तयाण दिट्ठी सेअवियाए[1] समुप्पन्ना ॥ ५२
सेअंविपोलासाढे जोगे तद्दिवसहिअयसूले अ ।
सोहम्मिनलणगुम्मे[2] रायगिहे सुरिअ बलभद्दे ॥ ५३
॥ इति आषाढाचार्यस्तृतीयोनिह्नवः ॥
वीसा दोवाससया तईआ सिद्धिं गयस्स वीरस्स ।
सामुच्छेइअदिट्ठी महिलपुरीए समुपन्ना ॥ ५४
महिलाए लच्छिधरे महगिरिकोडिन्नआसमित्ते अ ।
नेउणि अनुप्पवायण रायगिहे खंडरक्काय ॥ ५५
॥ इति आसमित्तश्चतुर्थो निह्नवः ॥
अडवीस दोवाससया तइआ सिद्धिं गयस्स वीरस्स ।
दोकिरिआणं दिट्ठी उल्लगतीरे समुप्पन्ना ॥ ५६
नइखेडजणवउल्लगमहिगिरिधणगुत्तअज्जगंगे अ ।
किरिआदो रायगिहे महातवो तीरमणनाणे ॥ ५७
॥ इति गांगेअनिह्नवः पंचमः ॥
पंचसया चोआला तईआ सिद्धिं गयस्स वीरस्स ।
पुरिमंतरंजिआए तेरासिदिट्ठी उप्पन्ना ॥ ५८
पुरिमंतरंजिभुयगुहबलसिरिसिरिगुतरोहगुत्ते अ ।
परिवारपोट्टसाले घोसणपरिसेहणावाए ॥ ५९
॥ इह रोहगुप्तनामा षष्ठो निह्नवः ॥

---

[1] सेअंबियाए ? [2] नलिणगुम्मे ?

पंचसया चुलसीआ तईआ सिद्धिं गयस्स वीरस्स ।
अव्वाद्धिआण दिट्ठी दसपुरनयरे समुप्पन्ना ॥ ६०
दसपुरनयरुछुधरे अज्जरक्खिअपूसमित्ततिअगं च ।
गोट्ठामाहिलनवमट्ठे नेअ पुछाय बिंज्झस्स ॥ ६१
पुट्ठो जहा अबद्धो कंचुईणं कंचुउं सम्मन्नेई ।
एवं पुट्ठमबद्धं जीवं कम्मं स मन्नेई ॥ ६२
॥ इति गोष्ठामाहिलः सप्तमो निह्नवः ॥
॥ एते सप्तापि निह्नवा देशविसंवादिनः ॥
छवाससएहिं नवुत्तरेहिं सिद्धिं गयस्स वीरस्स ।
तो बोडियाण दिट्ठी रहवीरपुरे समुप्पन्ना ॥ ६३
इति दिगंबरमतप्रवर्त्तकः सहस्रमल्लनामा सर्वविसंवादिनिह्नवः ।
एताः षोडश गाथाः श्रीआवश्यकचूर्णितो लिखिताः । आसां
व्याख्या संबंधसहिता मत्कृतविशेषसंग्रहतो ज्ञेयाः ॥ ...

Folio 36 :

स्वामिभक्तो१महोत्साहः२कृतज्ञो३धार्मिकः४शुचिः ५ ।
अकर्कशः६कुलीनश्च७शास्त्रज्ञः८सत्यभाषकः९ ॥
विनीतः १०स्थूललक्ष्यश्च११व्यसनी१२वृद्धसेवकः १३ ।
अक्षुद्रः१४सत्त्वसंपन्नः१५प्राज्ञः१६ शूरो१७चिरक्रियः१८ ॥ ८५
पूर्वपरीक्षितः सर्वोपधासु १९ निजदेशजः २० ।
राजार्थस्वार्थलोकार्थकारको२१निःस्पृहः२२शमी२३ ॥ ८६
अमोघवचनः२४कल्पः२५पालिताशेषदर्शनः२६ ।
पात्रौचित्येन सर्वत्र नियोजितपदक्रमः २७ ॥ ८७
आन्वीक्षिकीत्रयीवार्त्तादंडनीतिकृतश्रमः २८ ।
क्रमागतो२९वणिक्पुत्रो३०भवेन्मंत्री न चापरः ॥ ८८
॥ इति कुमारपालचरित्रे उदयनमंत्रिस्थापने गुणाः ॥

Folio 37 :

आदौ मज्जनचारुचीरतिलकं नेत्रांजनं कुंडलं
नासामौक्तिकपुष्पहारचिकुरालंकारकं नूपुरं ।
अंगे चंदनलेपकंचुकमणी क्षुद्रावलीघंटिका
तांबूलं करकंकणं चतुरता शृंगारकाः षोडश ॥ ९८

स्नानं १ कुंतलधूपनं २ च कबरीगुंफः ३ करे बीटकं ४
चीरं ५ चंदनलेप ६ कंचुक ७ रदोद्योतां ८ जना ९ लक्तकं १० ।
तांबूलं ११ तिलकं १२ च पत्रलतिका १३ कर्पूरपूरस्तथा १४
पुष्पाणां मुकुटो १५ नखेषु रचना १६ शृंगारकाः षोडश ॥ ९९

प्रकारांतरम् ॥

क्षौरं १ मज्जन २ वस्त्र ३ शीर्षतिलकं ४ गात्रे विलेपार्चनं ५
कर्णे कुंडल ६ मुद्रिका च ७ मुकुटं ८ पादौ च चर्मोज्जितौ ९ ।
हस्ते खड्ग १० पटांबरं ११ कटिछुरी १२ विद्याविनोदो मुखे १३
तांबूलं १४ करकंकणं १५ चतुरता १६ शृंगारकाः षोडश ॥ १०० ...

Folio 41 :

दोपंथे हि न गम्मई दोमुहसुईइ न सीवए कंथा ।
दोवि कयावि न हुज्जा इंदियसुखं च मुक्कं च ॥ ६८

इति सुदर्शनकथायां चिवालवगच्छीयश्रीदेवेंद्रसूरिकृता गाथा ॥

नाम्ना गाथासहस्रीति ग्रंथोयं ग्रथितो मया ।
पंडितास्तांबूलमिवादीयतां मुखमंडनं ॥ १

गाथाः कियत्यः प्रकृताः कियत्यः
श्लोकाश्च काव्यानि कियंति संति ।
नानाविधग्रंथविलोकनश्रमा-
देकीकृता अत्र मया प्रयत्नात् ॥ २ ...

श्रीजिनचंद्रगणाधिपशिष्यादिमसकलचंद्रगणिशिष्यैः ।
श्रीसमयसुंदरोपाध्यायैः संदर्भितो ग्रंथः ॥ ५
ऋतुवसुरसशशि १६८६ वर्षे विनिर्मितो विजयतां चिरं ग्रंथः ।
व्याख्यानपुस्तकेषु व्याख्याने वाच्यमानोसौ ॥ ६ ...
राज्ये श्रीजिनराजस्य प्रतापाक्रांतविष्टपे ।
आचार्यपदवीं प्राप्ते सूरिश्रीजिनसागरे ॥ ४

Visamvadasataka by SAMAYASUNDARA · [विसंवादशतकम् । समयसुंदरः].

Folios 13.

Begins:

सूत्रवृत्त्यादिसंबंधिविसंवादाभिधानकं ।
शतकं श्रीजिनं नत्वा ब्रूते समयसुंदरः ॥ १

Ends:

वृहत्खरतरे गच्छे सुविशुद्धपरंपरे ।
राज्ये श्रीजिनराजस्य सर्वसूरिशिरोमणेः ॥
सूत्रप्रकरणटीकाप्रबंधसंबंधचारुचरितेषु ।
ये केपि विसंवादा दृष्टा एकीकृता इह ते ॥
शरवसुरसशशिवर्षे १६८५ पाठकवरसमयसुंदरैः सम्यक् ।
स्वपरस्मृतिहेतुकृते कृतं विसंवादशतकमिदम् ॥

Chandraprabha Haimakaumudi, by MEGHAVIJAYA UPÂDHYÂYA [चंद्रप्रभाख्या हैमकौमुदी । मेघविजयमहोपाध्यायः].

Folios 86:

विजयंते ते गुरवः शैलशरर्षींदुवत्सरे १७५७तेषां ।
आदेशाद्देशपतेः स्थितिः कृता राजधान्यंतः ॥ ७
चातुर्मास्यामस्यां नाम्ना श्रीअगरावराख्यायां ।
नानायोगै रचितै रचिता चंद्रप्रभा सुधिया ॥ ८ ...

Folio 87:

भट्टोजिनाम्ना भवदीक्षितेन
सिद्धांतयुक्ता वरकौमुदी या ।
श्रीसिद्धहैमानुगता व्यधायि
सैवाश्रिता भानुविभोदयाय ॥१२...
संवत्सरे बाणकरिक्षमाधर-
चंद्रोन्मिते श्रावणपौर्णमास्यां ।
महीतले खारतरे सुगच्छे
जगत्प्रसिद्धे सति भासमाने ॥ ६ ॥

Vrindavanakavya by MÂNÂNKA [वृन्दावनकाव्यम् । मानांक :].

Begins:

वरदाय नमो हरये पतति जनो यं स्मरन्न मोहरये ।
बहुशश्चक्रंद हता मनसि दितिर्येन दैत्यचक्रं दहता ॥ १

Ends:

इत्याह पीतवाससमायतनेऽत्रस्तं
कंसासुरात्पशुमतामायतनेत्रस्तं ।
हसितानां विलसितया स हली लाजानां
छायां विकरन्दशनैः सह लीलाजानां ॥ ३७ ॥
॥ इति वृंदावनकाव्यं पंचदशवृत्तन्यूनम् ॥

Meghabhyudayakavya by MÂNÂNKA [मेघाभ्युदयकाव्यम् । मानांकः].

Begins:

जितालिमालामधुभित्तमालं
द्युमार्गमाधाय महत्तमालं ।
पयो विमुंचत्यचिरप्रभाभि-
र्महांबुदाली चलदीप्रभाभिः ॥१ ॥

Ends:

विद्युल्लता लसतिकांचनसन्निभारं
धात्रा वहंति घनवंति न भानि भारं ।
उच्चैरसत्यविरतं जलदोऽस्तवारि-
रस्मिन्प्रयातु समये प्रिय यस्तवारिः ॥ ३० ॥

इति मेघाभ्युदयकाव्यं सप्तवृत्तहीनम् ॥

Chandradutakavya by JAMBÛKAVI [चन्द्रदूतकाव्यम् । जंबूकवि·]

Begins:

यदतिशितशरायस्तमापन्न दुःखं
त्यजति जगदशेषं दीनमापन्नदुःखं ।
स्मरत तदतनूनं सर्वदा शासनस्य
प्रभुमजरमनंतं श्रीमदाशासनस्य ॥ १

Ends:

इति विविधवचोभिश्चंद्रमा यामवत्यां
गदित उदयमानो दीनमायामवत्यां ।
कथयितुमिव तस्मै तूर्णमध्वन्यबाधां
सरति रतिमिलाभृत्यंबराध्वन्यवध्वा ॥ २३

इति चंद्रदूतकाव्यं संपूर्णम् ॥

Sivabhadrakavya by SIVABHADRA [शिवभद्रकाव्यम् । शिवभद्रः]

Begins:

प्रणमत सदसिगदं तं चैद्यमहन्योऽप्रियाणि सदसि गदंतं ।
चूर्णितचक्रतुरंगं रुक्मिणममुंचच्च यस्यं च क्रतुरंगं ॥ १...
इति शिवभद्रकाव्ये प्रथम आश्वासो नववृत्तरहितः ॥ ...

Ends:

दृष्टा वानरहरिणाः के ते स्थास्यंति वीर वानरहरिणा ।
गुप्तिं कां तव पुर्यां पश्यसि च स नाभिहंति कां तव पुर्यां ॥ २८

इति शिवभद्रकाव्ये द्वितीय आश्वासो विंशतिकाव्यरहितः समग्रः ॥

इति शिवभद्रकवीश्वरविरचितमिदं काव्यम् ॥

Panchasutra with **Commentary** by HARIBHADRASÛRI [पञ्चसूत्रकम् । सटीकम् । टी० हरिभद्रसूरिः].

Folios 9.

॥ नमो वीअरागाणं सव्वन्नूणं देविंदपूइआणं जहट्ठियवत्थुवाईणं । तेलुक्कगुरुणं । अरुहंताणं । भगवंताणं । जे एव माइक्खंति ।...

इति पावपडिग्घायगुणबीजाहाणसुत्तं समत्तं ॥...

साहुधम्मपरिभावणासुत्तं ॥...

पव्वज्जागहणविहिसुत्तं ॥...

पव्वज्जापरिपालणसुत्तं ॥...

पव्वज्जाफलसुत्तं ॥

समाप्तं पंचसूत्रकं ॥

कृतं चिरंतनाचार्यैर्विवृतं च जाकिनीमहत्तरासूनुश्रीहरिभद्राचार्यैः ॥

Siyachariya by BHUVANATUNGASÛRI [सीयाचरियम् । भुवनतुंगसूरिः].

Folios 8:

Begins:

जस्स पयपउमनहचंदजुन्हजलखालियमलोहं ।
तिजयंपि सुई जातं तं मुणिसुव्वयजिणं नमिउं ॥ १
तिजगचमक्कारकरं मुणिसुव्वयतित्थलद्धमाहप्पं ।
सीयामहासईए चरिअं किंत्तेमि लवमित्तं ॥ २

Ends:

सीलगुणसवणसंभूयवरपवरमाणंदकारइयं ।
सीयाचरियं सिरिभुवणतुंगपयसाहगं होउ ॥४६९

इति सीयाचरियं समत्तम् ॥

Dharmapariksha by AMITAGATI [धर्मपरीक्षा । अमितगतिः].
Folios 36.
Begins:

श्रीमान्नभस्त्रत्रयतुंगशालं[1]
जगद्गृहे बोधमयः प्रदीपः ।
समंततो द्योतयते यदीयो
भवंतु ते तीर्थकराः श्रिये नः ॥ १

Ends:

सिद्धांतपाथोनिधिपारगामी
श्रीवीरसेनो जिनसूरिवर्यः ।
श्रीमाथुराणां यमिनां गरिष्ठः
कषायविध्वंसविधौ पटिष्ठः ॥ १
ध्वस्ताशेषध्वांतवृत्तिर्महस्वी
तस्मात्सूरेर्देवसेनोजनिष्ट ।
लोकोद्योती पूर्वशैलादिवार्कः
सिष्टाभीष्टः स्थेयसोपास्तदोषः ॥ २
भासिताखिलपदार्थसमूहो
निर्मलोमितगतिर्गणनाथः ।
वासरो दिनमणेरिव तस्मा-
ज्जायते स्म कमलाकरबोधी ॥ ३
नेमिषेणगणनायकस्ततः
पावनं वृषमधिष्ठितो विदुः ।
पार्वतीपतिरिवास्तमन्मथो
योगगोपनगणार्चितक्रमः ॥ ४

[1] शाले?

क्रोपनिवारी शमदमधारी
माधवसेनः प्रणतरसेन ।
सोभवदस्माद्दलितमदात्मा
यो यतिसारः प्रसमितमारः ॥ ५
धर्मपरीक्षामकृत वरेण्यां
धर्मपरीक्षामखिलसरण्यां ।
शिष्यवरिष्ठोमितगतिनामा
तस्य पटिष्ठोनघमतिधामा ॥ ६
बद्ध मया जलधियात्र विरोधि यत्तत्
गृह्णंत्विदं स्वपरशास्त्रविदो विशोध्य ।
गृह्णंति किं बुसमपास्य न सस्यजातं
सारं न सारमिदमूह्यधियो विबुध्य ॥ ७
कृतिः पुराणा सुखदा न नूतना
न भाषणीयं वचनं बुधैरिदं ।
भवंति भव्यानि फलानि भूरिसो
न भूरुहां किं प्रसवः प्रसूनतः ॥ ८
पुराणसंभूतमिदं न गृह्यते-
पुराणमित्यस्य न सुंदरेति गीः ।
सुवर्णपाषाणविनिर्गतं जने
न कांचनं गच्छति किं महार्थतां ॥ ९
न बुद्धिगर्वेण न पक्षपातता
मयान्यशास्त्रार्थविवेचनं कृतं ।
ममैष धर्मं शिवशर्मदायकं
परीक्षितुं केवलमुत्थितः श्रमः ॥ १०

अहारि किं केशवशंकरादिभि-
र्व्यतारि किं वस्तु जिनेन मेर्थितं ।
स्तुवे जिनं येन निषिध्य तानहं
बुधा न कुर्वंति निरर्थकां क्रियां ॥ ११

विमुच्य मार्गं कुगतिप्रवर्त्तकं
श्रयंतु संतः सुगतिप्रवर्त्तकं ।
चिराय मा भूदखिलांगतापकः
परोनुतापो नरकादिगामिनां ॥ १२

निगूह्यते ये विनिवेदितं हितं
व्रजंति ते दुःखमनेकधाग्रतः ।
कुमार्गलग्नो व्यवतिष्ठते न यो
निवारितोसौ पुरतो विषीदति ॥ १३

विनिष्ठुरं वाक्यमिदं ममादितः
सुखं परं दास्यति नूनमग्रतः ।
निषेव्यमाणं कटुकं किमौषधं
सुखं विपाके न ददाति कांक्षितं ॥ १४

विविच्य गृह्णीय[1] बुधा ममोदितं
शुभाशुभं ज्ञास्यथ निश्चितं स्वयं ।
निषेव्यमाणं शतशोपि जायते
स्फुटं भृशं नानुभवं विना जनाः ॥ १५

क्षतसकलकलंका प्राप्यते तेन कीर्त्ति-
र्बुधमतमनवद्यं बुद्ध्यते तेन तत्त्वं ।

---

[1] गृह्णीत?

हृदयसदनमध्ये धूतमिथ्यांधकारो-
जिनपतिमतदीपो दीप्यते [1]यस्य दीप्रः ॥ १६
वदति पठति भक्त्या यः शृणोत्येकचित्तः
स्वपरसमयतत्त्वावेदि शास्त्रं पवित्रं ।
विदितसकलतत्त्वः केवलालोकनेत्र-
स्त्रिदशमहितपादो यात्यसौ मोक्षलक्ष्मीं ॥ १७
धर्मो जैनः पवित्रः प्रभवतु भुवने सर्वदा शर्मदायी
शांतिं प्रामोतु लोको धरणिमवनिपा न्यायतः पालयंतु ।
हत्वा कर्मारिवर्गं यमनियमजैरैः [2]साधवो यांतु सिद्धिं
विस्तीर्णा शुद्धबोधाजितहितनिरता जंतवः संतु सर्वे ॥ १८
इत्यमितगतिकृता धर्मपरीक्षा समाप्ता ॥

Gathakosa by MUNICHANDRASÛRI [गाथाकोशः । मुनिचंद्रसूरिः].

Folio 1:

बम्मह १ छयल्ल २ विज्ज ३ जोइसिउ ४ लेहउ ५ तहा वेसा ।
६ सिहिणा ७ सुरय ८ दिट्ठी ९ दूई १० असईण ११ पावलिया ॥
१२ पहियाण १३ पुणो माणं १४ बालालायण्णं १५ तहयमहिलाण ।
१६ दयियाणुराय १७ णेहो १८ पडिवण्ण १९ उण विरहो ॥
२०आलावो पुरिसाणं २१महिलाणं२२धण्ण२३विज्ज२४जिणसंखा ॥

दिट्ठी दिट्ठीपसरो पसरेण रईइ सब्भाउ ।
सब्भावेण य नेहो पंचवि बाणा अनंगस्स ॥
डज्झणभयेन णट्ठो कामो वसिउ कामिणीगुज्झे ।
ईसरपय जे भत्ता हणंति ते णिट्ठुरे घाए ॥

---

[1] यस्य? [2] °भरैः?

हरविसमनयणकोवानलेण दड्ढेण तहवि मयणेण ।
कज्जलमसेण तरुणीणयणम्मि संकामिउ अप्पा ॥
णिवसंति जत्थ छेया ललियकरक्कव्वबंधणे कुसला ।
जाणंति वंकभणियं सुंदरि णयरं ण सो गामो ॥
तं नत्थि तं न होसिइ तिलतुसमित्तंपि [1]तिहुयले ।
तं विहिणा ण य विहियं ज ण हु णाउ छयल्लेहिं ॥
दोतिन्निबुहा दोतिन्निमाणिणो पंचसत्तरंगिल्ला ।
जत्थ न हुंति निवेसे तं नयरं रण्णसारित्थं ॥

Folio 2 :

लोहमई गुणविमुक्का रत्तं दट्ठूण जीवियं हरइ ।
विसभक्खियव्व वेसा जं पावइ तं विणासेइ ॥
उवयारसहस्सहवि तिण्णि ण लज्जंति माणुसे लोए ।
वेसा अविवेयपहू खलाण हियय तह चेव ॥

Folio 3 :

दुल्लह जणाण राउ लज्जा गुरू ईय परवसो अप्पा ।
पियसहि विसमं पिम्मं मरणं सरणं णवरमेकं ॥
पीडे नियथणहारं वहेइ कंपं [2]ससभ्भसं सेयं ।
चुंबेइ डिंभयावि हु मम्महसरपीडिया बाला ॥
अइलज्जियमइभीयं अइभूमिपलोयणं च अइमोणं ।
पुरिसस्स महिलियाए ण सुद्धसीलस्स चरियाइ ॥

Folio 4 :

संताविय ण विहडइ पिम्मं णवजुव्वकंचणच्छायं ।
वड्ढइ कलाहि अहियं मिहुणाणं माणकसवट्टे ॥

---

[1] तिहुयणतले ? [2] ससम्भमं ?

Folio 5:

अहह मयमोहमच्छरपमुक्कसंगाण वरमुणीणंपि ।
कामिणिकाबालहसियं णूणं हियए चमक्केइ ॥
अहरं कंठकवोले थणजुयलं नाहिमंडलं रमणं ।
एयं जणसामन्नं हिययं जं जस्स तं तस्स ॥
लायण्णसलिलभरियं वयणसरं दप्पणे पलोयंती ।
फुट्टणभएण बाला कोरइ सीमंतपरिवाहं ॥
एकेण कवडवलिबंधणेण भुयणे ण माइ गोविंदो ।
अच्चरियं भमइ पियाणवि मियमुही तिवलिबंधेवि ॥
ते धण्णा जाण घरंमि दीसंति धूलिधूसरा णिच्चं ।
उट्ठंत पडंत रडंत दोतिण्णि जत्थ डिंभाइं ॥
आयासं पायालं सयलं महिमंडलं सगहचक्कं ।
जाणंति बुद्धिमंता महिलाचरियं न याणंति ॥
मच्छपयं जलमज्झे आयासे पंखियाण पयपंती ।
जाणंति बुद्धिमंता महिलाहिययं न याणंति ॥

Folio 6 :

धवला मइलणसीला सिणेहपरिपूरियावि तावेइ ।
दीवयसिहिव्व महिला कज्जलमइलं घरं कुणइ ॥
जम्मंतीए सोगो वड्ढंतीए विवड्ढए चिंता ।
परणीयाए दंडो जुवइपिउ दुक्किउ निच्चं ॥
मा वच्चह वीसंभं णईण णारीण सरइवारीण ।
पसरिय पउहराउ कूलाइ कुलाइ पाडंति ॥
एवं चिय स लहिज्जइ दिणेसदियहाण णेहनिव्वहणं
आजम्मं एक्कमेकेहि विरहो चिय ण दिट्ठो ॥

णेहो कहवि ण कीरइ अहवा कीरइ रत्तकंबलसरित्थो ।
अणवरयं धोयमाणो अण्णं वण्णं ण गिण्हेइ ॥
कज्जेण विणा णेहो अत्थविहूणेण गोरवं लोए ।
पडिवण्णे णिव्वहणं कुणंति जे ते जए विरला ॥
अणुराय जस्स जेहिं तेणं चिय हिययणिव्वुई तस्स ।
मेहसलिलेण तप्पइ बप्पीहो ण सरसलिलेण ॥

Folio 7:

सज्जणपिईपसंगो गुलियारंगव्व दुक्कपक्कालो ।
इयरजणाण य णेहो हलिद्दिरंगव्व [1]उ गिलइ ॥

Folio 8:

जह बप्पीउ खरगिम्हताविउ सुसियतालहुड्डो ।
घणआगमणं जोअइ तह अम्हे तुम्ह आगमणं ॥

Folio 9:

सव्वोवि जणो पच्चक्कदंसणे कुणइ णिब्भरं णेहं ।
सो सुयणो जो दूरट्ठियाण पालेइ पडिवण्णं ॥
सो चिय कीरइ मित्तो जो चिय पत्तंमि वसमयंमि ।
ण होइ परायत्तो सेलसिलाघडियपुरिसव्व ॥
णयणेहि को ण दीसइ केण समं णह हवंति आलावा ।
जं पुण हियाणंदं जणेइ तं माणुसं विरलं ॥
जह चक्कवायजुयलं ण लहइ सुरकं विओय संतत्तं ।
तुह दंसणमलहंतं अह्माण मणं तह च्चेय ॥
सज्जणजणाण संगो पइदियहं जं ण होइ अम्हाणं ।
ता मण्णे पुव्वभवे मयावि विच्छोहिउ कोइ ॥

Folio 10:

णह जाणेमि गुणा तुह कित्तियमित्ताइ संति ससिवयणे ।
एक्क चिय तुह दोसो जं विरहे दहसि अंगाइ ॥
अमयरसपाणिसरिसं सुंदरि तुह दंसणं जइ लहेमि ।
ता एत्तिएण तित्तो अण्णंपि ण किंपि पत्थेमि ॥
संसारंमि असारे जीविज्जइ तुज्झ दंसणाए[1] ।
जइ सावि ण होइ पिए ता किं जीएण अफलेण ॥
सरणागयंवि काऊण धरसि पासम्मि मह मणं बाले ।
किं अवरुद्धं ण याणहि जेहिं तादूं विजोजेसि ॥
[2]अमयमउणि सुणिज्जइ णूणं पसयच्छि पुण्णमाइंदो ।
सा चेव तुज्झ विरहे हुयवहसविसेसउ जाउ ॥
जे णामंति ण सीसं कस्सवि भुवणेवि ते महासुहडा ।
रागंधा गलियबला रुलंति महिलाण चलणतले ॥
मरणेवि दीणवयणं माणधरा जे नरा ण जंपंति ।
तेवि य कुणंति लल्लिं अबलाणं णेहगहगहिला ॥
तत्थवि जत्थवि णूणं कामियणो णियइ तम्मयं सयलं ।
उम्मत्तयरसरसिउ पिच्छइ णण्णं विणा कणयं ॥

Folio 11:

जाणामि तुज्झ विरहे जइ जलणहुयासणंमि पविसामि ।
डज्झहिसि मज्झ हियए अत्थं तो तेण बीहामि ॥
पियमहिलामुहकमलं बालमुहं धूलिधूसरच्छायं ।
सामिमुहं सुपसण्णं ते धण्णा जेइ पिच्छंति ॥

Folio 12:

हंसा रचंति सरे भमरा रचंति केतकीकुसुमे ।
चंदणवणे भुयंगा सरिसा सरिसेहि रचंति ॥

---

[1] दंसणासाए? [2] अमिय?

णेहो कहवि ण कीरइ अहवा कीरइ रत्तकंबलसरित्थो ।
अणवरयं धोयमाणो अण्णं वण्णं ण गिण्हेइ ॥
कज्जेण विणा णेहो अत्थविहूणेण गोरवं लोए ।
पडिवण्णे णिव्वहणं कुणंति जे ते जए विरला ॥
अणुराय जस्स जेहिं तेणं चिय हियय णिव्वुई तस्स ।
मेहसलिलेण तप्पइ बप्पीहो ण सरसलिलेण ॥

Folio 7:

सज्जणपिईपसंगो गुलियारंगव्व दुरुक्परकालो ।
इयरजणाण य णेहो हलिद्दिरंगव्व [1]उ गिलइ ॥

Folio 8:

जह बप्पीउ खरगिम्हताविउ सुसियतालहुट्टुट्ठो ।
घणआगमणं जोअइ तह अम्हे तुम्ह आगमणं ॥

Folio 9:

सव्वोवि जणो पच्चक्खदंसणे कुणइ णिब्भरं णेहं ।
सो सुयणो जो दूरट्ठियाण पालेइ पडिवण्णं ॥
सो चिय कीरइ मित्तो जो चिय पत्तंमि वसमयंमि ।
ण होइ परायत्तो सेलसिलाघडियपुरिसव्व ॥
णयणेहि को ण दीसइ केण समं णह हवंति आलावा ।
जं पुण हियाणंदं जणेइ तं माणुसं विरलं ॥
जह चक्कवायजुयलं ण लहइ सुक्कं विओय संतत्तं ।
तुह दंसणमलहंतं अह्माण मणं तह चेय ॥
सज्जणजणाण संगो पइदियहं जं ण होइ अम्हाणं ।
ता मण्णे पुव्वभवे मयावि विच्छोहिउ कोइ ॥

Folio 10:

णह जाणेमि गुणा तुह कित्तियमित्ताइ संति ससिवयणे ।
एक्क चिय तुह दोसो जं विरहे दहसि अंगाइ ॥
अमयरसपाणिसरिसं सुंदरि तुह दंसणं जइ लहेमि ।
ता एत्तिएण तित्तो अण्णंपि ण किंपि पत्थेमि ॥
संसारंमि असारे जीविज्जइ तुज्झ दंसणाए[1] ।
जइ सावि ण होइ पिए ता किं जीएण अफलेण ॥
सरणागयंवि काऊण धरसि पासम्मि मह मणं बाले ।
किं अवरुद्धं ण याणहि जेहिं तादूं विजोजेसि ॥
[2]अमयमउणि सुणिज्जइ णूणं पसयच्छि पुण्णमाइंदो ।
सा चेव तुज्झ विरहे हुयवहसविसेसउ जाउ ॥
जे णामंति ण सीसं कस्सवि भुवणेवि ते महासुहडा ।
रागंधा गलियबला रुलंति महिलाण चलणतले ॥
मरणेवि दीणवयणं माणधरा जे नरा ण जंपंति ।
तेवि य कुणंति लल्लिं अबलाणं णेहगहगहिला ॥
तत्थवि जत्थवि णूणं कामियणो णियइ तम्मयं सयलं ।
उम्मत्तयरसरसिउ पिच्छइ णण्णं विणा कणयं ॥

Folio 11:

जाणामि तुज्झ विरहे जइ जलणहुयासणंमि पविसामि ।
डज्झहिसि मज्झ हियए अत्थं तो तेण बीहामि ॥
पियमहिलामुहकमलं बालमुहं धूलिधूसरच्छायं ।
सामिमुहं सुपसण्णं ते धण्णा जेइ पिच्छंति ॥

Folio 12:

हंसा रच्चंति सरे भमरा रच्चंति केतकीकुसुमे ।
चंदणवणे भुयंगा सरिसा सरिसेहि रच्चंति ॥

---

[1] दंसणासाए? [2] अमिय?

णेहो कहवि ण कीरइ अहवा कीरइ रत्तकंबलसरित्थो ।
अणवरयं धोयमाणो अण्णं वण्णं ण गिण्हेइ ॥
कज्जेण विणा णेहो अत्थविहूणेण गोरवं लोए ।
पडिवण्णे णिव्वहणं कुणंति जे ते जए विरला ॥
अणुराय जस्स जेहिं तेणं चिय हिययणिव्वुई तस्स ।
मेहसलिलेण तप्पइ बप्पीहो ण सरसलिलेण ॥

Folio 7:

सज्जणपिईपसंगो गुलियारंगव्व दुक्कपरकालो ।
इयरजणाण य णेहो हलिद्दरंगव्व [1]उ गिलइ ॥

Folio 8:

जह बप्पीउ खरगिम्हताविउ सुसियतालहुट्टो ।
घणआगमणं जोअइ तह अम्हे तुम्ह आगमणं ॥

Folio 9:

सव्वोवि जणो पच्चक्खदंसणे कुणइ णिब्भरं णेहं ।
सो सुयणो जो दूरट्ठियाण पालेइ पडिवण्णं ॥
सो चिय कीरइ मित्तो जो चिय पत्तंमि वसमयंमि ।
ण होइ परायत्तो सेलसिलाघडियपुरिसव्व ॥
णयणेहि को ण दीसइ केण समं णह हवंति आलावा ।
जं पुण हियाणंदं जणेइ तं माणुसं विरलं ॥
जह चक्कवायजुयलं ण लहइ सुक्कं विओय संतत्तं ।
तुह दंसणमलहंतं अह्माण मणं तह चेय ॥
सज्जणजणाण संगो पइदियहं जं ण होइ अम्हाणं ।
ता मण्णे पुव्वभवे मयावि विच्छोहिउ कोइ ॥

Folio 10:

णह जाणेमि गुणा तुह कित्तियमित्ताइ संति ससिवयणे ।
एक्क चिय तुह दोसो जं विरहे दहसि अंगाइ ॥
अमयरसपाणिसरिसं सुंदरि तुह दंसणं जइ लहेमि ।
ता एत्तिएण तित्तो अण्णंपि ण किंपि पत्थेमि ॥
संसारंमि असारे जीविज्जइ तुज्झ दंसणाए[1] ।
जइ सावि ण होइ पिए ता किं जीएण अफलेण ॥
सरणागयंवि काऊण धरसि पासम्मि मह मणं बाले ।
किं अवरुद्धं ण याणहि जेहिं तादूं विजोजेसि ॥
[2]अमयमउणि सुणिज्जइ णूणं पसयच्छि पुण्णमाइंदो ।
सा चेव तुज्झ विरहे हुयवहसविसेसउ जाउ ॥
जे णामंति ण सीसं कस्सवि भुवणेवि ते महासुहडा ।
रागंधा गलियबला रुलंति महिलाण चलणतले ॥
मरणेवि दीणवयणं माणधरा जे नरा ण जंपंति ।
तेवि य कुणंति लल्लिं अबलाणं णेहगहगहिला ॥
तत्थवि जत्थवि णूणं कामियणो णियइ तम्मयं सयलं ।
उम्मत्तयरसरसिउ पिच्छइ णण्णं विणा कणयं ॥

Folio 11:

जाणामि तुज्झ विरहे जइ जलणहुयासणंमि पविसामि ।
डज्झहिसि मज्झ हियए अत्थं तो तेण बीहामि ॥
पियमहिलामुहकमलं बालमुहं धूलिधूसरच्छायं ।
सामिमुहं सुपसण्णं ते धण्णा जेइ पिच्छंति ॥

Folio 12:

हंसा रच्चंति सरे भमरा रच्चंति केतकीकुसुमे ।
चंदणवणे भुयंगा सरिसा सरिसेहि रच्चंति ॥

---

[1] दंसणासाए? [2] अमिय?

पुव्वकइरइयगाहा गहिऊणं एगउवि काऊण ।
पुण्णिमपरहुप्पण्णो मुणिचंदो तेण णिम्मिउ ॥...
तिसउचउरासीउ रसालउ जयउ भुवणंमि ॥...

Vichararatnasamgraha by JAYASOMASÛRI. [विचाररत्नसंग्रहः] जयसोमसूरिः].

Folios 1 to 222. Dated Saṃvat 1748.=A. D. 1692.

The Granthâgra is given as 14,000.

1. *From the praśasti of a Munisuvratacharitra* [मुनिसुव्रतचरित्र-प्रशस्तौ].

पूर्वं चांद्रकुले बभूव विपुले श्रीवर्द्धमानः प्रभुः
सूरिर्मंगलभाजनं सुमनसां सेव्यः सवृत्तास्पदं ।
शिष्यस्तस्य जिनेश्वरः समजनि स्याद्वादिनामग्रणी-
र्बंधुस्तस्य च बुद्धिसागर इति त्रैवेद्यपारंगमः ॥ १
सूरिः श्रीजिनचंद्रोभयदेवगुरुर्नवांगवृत्तिकरः ।
श्रीजिनभद्रमुनींद्रो जिनेश्वरविभोस्त्रयः शिष्याः ॥ २
चक्रे श्रीजिनचंद्रसूरिगुरुभिर्धुर्यैः प्रसन्नाभिध-
स्तेन ग्रंथचतुष्टयीस्फुटमतिः श्रीदेवभद्रः प्रभुः ।
देवानंदमुनीश्वरोऽभवदतश्चारित्रिणां ग्रामणीः
संसारांबुधिपारगामिजनताकामेषु कामं सखा ॥ ३
यन्मुखावासवास्तव्या व्यवस्यति सरस्वती ।
गंतुं नान्यत्र स न्याय्यः श्रीमान् देवप्रभुः प्रभुः ॥ ४
मुकुरतुलामंकुरयति वस्तुप्रतिबिंबविशदमतिंवृत्तं ।
श्रीविबुधप्रभचित्तं न विधत्ते वैवरीत्यं तु ॥ ५
तत्पदपद्मभ्रमरश्चक्रे पद्मप्रभश्चरितमेतत् ।
विक्रमतोतिक्रांते वेदग्रहरविमिते समये ॥ ६ ॥

2. *From a Kalpâdhyananaduryapadanirukta by Vinayachandra* [कल्पाध्ययनदुर्गपदनिरुक्तम् । विनयचन्द्रः].

प्रणम्य श्रीमहावीरं द्वादशांगीगुरूनपि ।
कल्पाध्ययनशब्दानां पर्यायान् कांश्चन ब्रुवे ॥...

नववाससयाइंति । श्रीवीरनिवृतेर्नवसु वर्षशतेष्वशीत्या त्रिनवत्या वाधिकेषु इयं वाचना जाता । यद्वा पंचम्याः चतुर्थ्यां पर्युषणा प्रववृते । तेणउ य नवसएहिं० ।

वीसहि दिणेहि कप्पो पंचयहाणीए कप्पठवणा य ।
नवसयतेउणएहिं वुछिन्ना संघआणाए ॥
सालाहणेण रन्ना संघाएसेण कारियं भयवं ।
पज्जूसवणचउत्थी चाउम्मासं चउद्दसीए ॥ ३
चउमासपडिकमणं पक्खियं दिवसम्मि चउविहा संघो ।
नवसयतेणउयएहिं आयरणं ते पमाणंति ॥ ४

इति तीर्थोद्गरादिषु भणनात् ।

3. *From a Sthavirâli* [स्थविराली].

गोमय सुहम्म जंबू पभवो सिज्जंभवो य जसभद्दो ।
संभूइविजय सिरिथूलभद्द गणहरमहागिरिणो ॥ १
सूबलसह साई सामज्जो संडिलो य जीयधरो ।
अज्जसमुद्दो [1]मंनंनंदिल्लो नागहत्थी य ॥ २
रेवइ सिंह खंदिल्ल हिमवन्नागज्जुणाइ गोविंदो ।
सिरिभूईदिन्न लोहिच्च दूसगणिणो य देवड्ढी ॥ ३...
अज्जसुहत्थी तहेव दिन्ने तहिंदादिन्ने य ।
सीहगिरि वइरसामी एमाइ सुहत्थिवंसो य ॥ ६

[1] मंगू?

समाप्तं श्रीपर्युषणाकल्पाध्ययनस्य कतिचिद्दुर्गपदनिरुक्तमिति ।

सैद्धांतिकश्रीमुनिचंद्रशिष्या
अनूचानवरा[1] जयंति ।
श्रीरत्नसिंहाह्वयसूरिमुख्या
यच्छिष्यलेशो विनयेंदुसूरिः ॥ १
श्रीविक्रमात्तत्त्वगुणेंदुवर्षे १३२९
चूर्ण्यादि वीक्ष्य स्वगुरोर्मुखाच्च ।
ज्ञात्वानघं पर्युषणाभिधान-
कल्पस्य किंचिद्विदधे निरुक्तं ॥ २

4. *From the praśasti of a Commentary by Devaguptisuri on the Navapada* [नवपदलघुवृत्तिः । देवगुप्तसूरिः].

नवपदटीका प्रोक्ता श्रावकानंदकारिणी ।
श्रीदेवगुप्तसूरिभिर्भावयितव्या प्रयत्नेन ॥
त्रिःसप्त्यधिकसहस्रे मासे कार्त्तिकसंज्ञिते ।
श्रीपार्श्वनाथचैत्ये तु [2]दुर्गमाय च पत्तने ॥
श्रावकानंदटीकेयं नवपदस्य प्रकीर्त्तिता ।
जिनचंद्रगणिनाम्ना तु गच्छे उकेशसंज्ञके ॥
कत्कदाचार्यशिष्येण कुलचंदसंज्ञितेन च ।
तेनैषा सूत्रिता टीका निर्जरार्थं तु कर्मणां ॥

5. *From a Commentary on the Sârdhaśataka by Dhaneśvarasûri* [सार्धशतकवृत्तिः । धनेश्वरसूरिः].

जिणवल्लहगणिलिहियं सड्ढमत्थवियारलवमिणं ।
सुयणा निसुणंतु सुणंतु सयं परिविबोहिंतु सोहिंतु ॥

व्या० जिनवल्लभगणिनामकेन मतिमता सकलार्थसंग्राहिस्थानांगाद्यंगोपांगपंचाशकादिशास्त्रवृत्तिविधानाप्रावदातकीर्त्तिसुधाधवलि तस्य

[1] प्राज्ञा अनूचान°? [2] दुर्गमायतपत्तने ?

रामंडलानां श्रीमदभयदेवसूरीणां शिष्येण लिखितं कर्मप्रकृत्यादि-
गंभीरशास्त्रेभ्यः समुद्धृत्य दृब्धं जिनवल्लभगणिलिखितं ॥

इति सार्द्धशतकवृत्तौ विशवालगच्छे धनेश्वरसूरिकृतायां ।

शशिमुनिपशुपतिसंख्ये वर्षे नृपविक्रमादतिक्रांते ।
[1]चैत्रे सप्तम्यां समर्थितेयं गुरौ वारे ॥

6. *From the prasasti of a Srivacharitra by Guruchandraganî* [श्रीवीरचरित्रप्रशस्तिः । गुरुचन्द्रगणिः].

आसि सिरिवद्धमाणो मुणिनाहो संजमनिहिव्व ।
बहुलकलिकालतमपसरपूरियासेससविसमसमभागे ॥
दीवेणं व मुणीणं पयासिउं जेहि [2]मुत्तिपत्तो ।
मुणिवइणो तस्स हरइहाससिरिजसपयासियासस्स ॥
आसि दुवे वरसीसा जयपयडा सूरससिगुव्व ।
भवजलहिवीहिसंभंतभवियणसंताणतारणसमत्थो ॥
बोहित्थोव्व समत्थो सिरिसूरजिणेसरो पढमो ।
गुरुसाराउं धवलाउं खरयसाहुसंतई जाया ॥
हिमवंताउं गंगुव्व निग्गया सयलजणपुज्जा ।
अण्णो य पुण्णिमाचंदसुंदरो बुद्धिसागरो सूरी ॥
निम्मवियपवरवागरणछंदमत्थोवसत्थमई ।
एगंतवायविलसिरपरवायकुरंगभंगसीहाण ॥
तेसिं सीसो जिणचंदसूरी नामा समुप्पण्णो ।
संवेगरंगसाला न केवलं कव्वविरईया जेण ॥
सव्वजणविम्हयकरी विहिया संजमपवित्तीवि ।
ससमयपरसमयन्नू विसुद्धसिद्धंतदेसणाकुसलो ॥

[1] चैत्रे सितसप्तम्यां ? [2] मुत्तिपथो ?

समाप्तं श्रीपर्युषणाकल्पाध्ययनस्य कतिचिद्दुर्गपदनिरुक्तमिति ।

सैद्धांतिकश्रीमुनिचंद्रशिष्या
अनूचानवरा[1] जयंति ।
श्रीरत्नसिंहाह्वयसूरिमुख्या
यच्छिष्यलेशो विनयेंदुसूरिः ॥ १
श्रीविक्रमात्तत्त्वगुणेंदुवर्षे १३२५
चूर्ण्यादि वीक्ष्य स्वगुरोर्मुखाच्च ।
ज्ञात्वानघं पर्युषणाभिधान-
कल्पस्य किंचिद्विदधे निरुक्तं ॥ २

4. *From the praśasti of a Commentary by Devaguptisuri on the Navapada* [नवपदलघुवृत्तिः । देवगुप्तसूरिः].

नवपदटीका प्रोक्ता श्रावकानंदकारिणी ।
श्रीदेवगुप्तसूरिभिर्भावयितव्या प्रयत्नेन ॥
त्रिःसप्त्यधिकसहस्रे मासे कार्त्तिकसंज्ञिते ।
श्रीपार्श्वनाथचैत्ये तु [2]दुर्गमाय च पत्तने ॥
श्रावकानंदटीकेयं नवपदस्य प्रकीर्त्तिता ।
जिनचंद्रगणिनाम्ना तु गच्छे उकेशसंज्ञके ॥
कक्कदाचार्यशिष्येण कुलचंदसंज्ञितेन च ।
तेनैषा सूत्रिता टीका निर्जरार्थं तु कर्मणां ॥

5. *From a Commentary on the Sârdhaśataka by Dhaneśvarasûri* [सार्धशतकवृत्तिः । धनेश्वरसूरिः].

जिणवल्लहगणिलिहियं सड्ढमत्थवियारलवमिणं ।
सुयणा निसुणंतु सुणंतु सयं परिविबोहिंतु सोहिंतु ॥

व्या० जिनवल्लभगणिनामकेन मतिमता सकलार्थसंग्राहिस्थानांगाद्यंगोपांगपंचाशकादिशास्त्रवृत्तिविधानाप्तावदातकीर्त्तिसुधाधवलि तस्य

[1] प्राज्ञा अनूचान°? [2] दुर्गमायतपत्तने ?

रामंडलानां श्रीमदभयदेवसूरीणां शिष्येण लिखितं कर्मप्रकृत्यादि-
गंभीरशास्त्रेभ्यः समुद्धृत्य दृब्धं जिनवल्लभगणिलिखितं ॥

इति सार्द्धशतकवृत्तौ विशवालगच्छे धनेश्वरसूरिकृतायां ।

शशिमुनिपशुपतिसंख्ये वर्षे नृपविक्रमादतिक्रांते ।
[1]चैत्रे सप्तम्यां समर्थितेयं गुरौ वारे ॥

6. *From the praśasti of a Śrīvīracharitra by Guruchandragaṇi* [श्रीवीरचरित्रप्रशस्तिः । गुरुचन्द्रगणिः].

आसि सिरिवद्धमाणो मुणिनाहो संजमनिहिव्व ।
बहुलकलिकालतमपसरपूरियासेससविसमसमभागे ॥
दीवेणं व मुणीणं पयासिउं जेहि [2]मुत्तिपत्तो ।
मुणिवइणो तस्स हरइहाससिरिजसपयासियासस्स ॥
आसि दुवे वरसीसा जयपयडा सूरसासणुव्व ।
भवजलहिवीहिसंभंतभवियणसंताणतारणसमत्थो ॥
बोहित्थोव्व समत्थो सिरिसूरजिणेसरो पढमो ।
गुरुसाराउं धवलाउं खरयसाहुसंतई जाया ॥
हिमवंताउं गंगुव्व निग्गया सयलजणपुज्जा ।
अण्णो य पुण्णिमाचंदसुंदरो बुद्धिसागरो सूरी ॥
निम्मवियपवरवागरणछंदमत्थोवसत्थमई ।
एगंतवायविलसिरपरवायकुरंगभंगसीहाण ॥
तेसिं सीसो जिणचंदसूरी नामा समुप्पण्णो ।
संवेगरंगसाला न केवलं कव्वविरईया जेण ॥
सव्वजणविम्हयकरी विहिया संजमपवित्तीवि ।
ससमयपरसमयन्नू विसुद्धसिद्धंतदेसणाकुसलो ॥

[1] चैत्रे सितसप्तम्यां ? [2] मुक्तिपथो ?

सव्वमहिवलयवित्तो अन्नोभयदेवसूरित्ति ।
जेणालंकारधरा सलक्खणा वरपया पसन्ना य ॥
नवरंगवित्तिवररयणभारई कामिणीव कया ।
तेसिं अत्थि विणेउं समत्थसत्थबोहकुसलमई ॥
सूरी पसन्नचंदो चंदो इव जणमणानंदो ।
तव्वयणेणं सिरिसुमइवायगाणं विणेयलेसेणं ॥
गणिना गुरुचंदेणं रइयं सिरिवीरचरियमिमं ।
नंदसिहिरुद्द११३९संखे वोक्कंते विक्कमाउ कालम्मि ।
जेट्ठस्स सुद्धतईयातिहिम्मि सोमे समत्तमिमं ॥

7. *From the Vasudevahindi* [वसुदेवहिंडौ मध्यमखण्डप्रारंभः].

तत्थ य सामापिययमादियाणं रोहिणिपज्जुवसाणं एगुणतीसं लंभगा संघदासवायगेणं उवणिबद्धा एग्गत्तरिसं च वित्थारभीरुणा कथामज्झे छड्डिया ततोहं लोइयसिंगारकहापसंसणं असहमाणो आयरियसगासे अवधारे ऊण पवयणाणुरागेणं आयरियनिउएण य तस्सि मज्झिल्लंभाणं गंथणत्थे अब्भुज्ज उहंतं सुणह ॥

8. *From the Yogavidhi by Ajitadevasúri* [योगविधिः । अजितदेवसूरिः

चंद्रकुले ते जाताः श्रीशीलगणाख्यगणभृतः ख्याताः ।
श्रीमानतुंगगणभृन्मलयप्रभसूरिमुख्याश्च ॥ १
श्रीभद्रगुप्तगुरवः कुवलयसुप्रीतिकारिवरचरिताः ।
तन्नाममंत्रभक्तिस्मरणादपि जायतेभिमतं ॥ २
द्वादशवर्षशतेषु श्रीविक्रमतस्त्रिसप्ततियुतेषु ।
श्रीभानुप्रभगुरुराजपट्टकल्याणकुंभाभैः ॥ ३
श्रीअजितदेवसूरिभिरिति योगविधिः प्रपंचितः ।
किंचित्पाक्षिकनंद्यादुक्तं विभाव्य भव्यबुधैः कार्यं ॥ ४

9. *From a Commentary by Prithvichandrasúri on the Paryushana-kalpa* [पर्युषणाकल्पटिप्पनकम् । पृथ्वीचन्द्रसूरिः].

चांद्रकुलांबरशशिनश्चारित्रश्रीसहस्रपत्रस्य ।
श्रीशीलभद्रसूरेर्गुणस्य महोदधेः शिष्यः ॥ २
अभवद्वदनमदहारः षट्तर्कीभोजबोधनदिनेशः ।
श्रीधर्मघोषसूरिर्बोधितशाकंभरीनृपतिः ॥ ३
चारित्रांभोजशशी त्रिपथीपरिहारजनितबुधहर्षः ।
दर्शितविधिशर्मनिधिः सिद्धांतमहोदधिः प्रवरः ॥ ४
बभूव श्रीयशोभद्रसूरिस्तच्छिष्यशेखरः ।
तत्पादपद्ममधुपोभूच्छ्रीदेवसेनगणिः ॥ ५
टिप्पनकं पर्युषणाकल्पस्यालिखदवेक्ष्य शास्त्राणि ।
तच्चरणकमलमधुपः श्रीपृथ्वीचंद्रसूरिरिदं ॥ ६ ॥

10. *From a "Duḥkhamakálaśrīśramaṇastotra* [दुःखमाकालश्रीश्रमणसंघस्तोत्रम्].

वीरजिणभुवणविस्सुयपवयणगयणिक्कदिणमण[1]समाणे ।
वट्टंतसुयनिहाणे थूणामि सूरी जुगप्पहाणे ॥ १
वीस[1]तिवीस[2]ठनवइ[3]अडसयरि[4]पंचसयरि[5]गुणनउई[6] ।
सउ[7]सगसी[8]पणनउई[9]सगसी[10]छस्सयरि[11]अडसयरी[12] ॥ २
चउनवइ[13]अठ[14]तिय[15]सग[16]चउ[17]पन्नुत्तरसयं[18]तितीससयं[19]।
सउ[20]पण नउइ[21] नव नवइ[22]चत्त[23]तेवीसुदयसूरी ॥ ३
अह उदयाणं पढमे जुगप्पवरे पणवयामि तेवीसं ।
सिरिसुहम[1]वयर[2]पडिवय[3]हरिस्सहं[4]नंदिमित्तं च ५ ।
सिरिसूरसेण[6]रविमित्त[7]सिरिप्पहं[8]मणिरहं च ९ ।
जसमित्तं[10]धणसिंह[11]सव्वमित्तं[12]धम्मिल्लं[13]सिरिविजयणंदं[14]॥ ५

---

[1] दिणमणि?

वंदामि सुमंगल १५ धम्मसिंह १६ जयदेव १७ सूरसुरदित्तं १८ ।
वइसाहा१९कोडिन्नं२० माहुर२१वणिपुत्तं२२सिरिदत्तं २३ ॥ ६
उदयाणंतिमसूरी पुसमित्त१अरहमित्त२वइसाहं ३ ।
वंदे सुकित्ति४थावर५रहसुय६जयमंगलमुणिंदं७ ॥ ७
सिद्धत्थं८ईसाणं९रथमित्तं १०भरणिमित्त ११दढमित्तं १२ ।
सिरिसंगयमित्तं१३सिरिधरं१४मागह१५ममरसूरिं१६ ॥ ८
सिरिरेवइमित्तं १७ कित्तिमित्त१८सुरमित्त१९ फग्गुमित्तं च२० ।
कल्लाण२१देवमित्तं२२नमामि दुप्पसहमुनिवसहं२३ ॥ ९
वंदे सुहम्मजंबूपभवं सिज्जंभवं च जसभद्दं ।
संभूयविजयसिरिभद्दबाहुसिरिथूलभद्दं च ॥ १०
महागिरिसुहत्थगुणसुंदरं च सामज्जखंदिलायरियं ।
रेवइमित्तं धम्मं च भद्दगुत्तं च सिरिगुत्तं ॥ ११
सिरिवयरमज्जरक्खियसूरिं पणमामि पूसमित्तं च ।
इय सत्त कोडिनामे पढमुदए वीस जुगपवरे ॥ १२
बीए तिवीस वइरं च नागहत्थिं च रेवईमित्तं ।
सीहं नागुज्जणभूइदिन्नयं कालयं वंदे ॥ १३
सिरिसच्चमित्तहारिलजिणभद्दं वंदिमो उमासाइ ।
पुसमित्तं संभूयं मोढरिसिं भूयधम्मसिरिं ॥ १४
जिइंकपग्गुमित्तं धम्मघोसं च विणयमित्तं च ।
सिरिसीलमित्तरेवइमित्तसुमित्तं अरिहमित्तं ॥ १५
इय सव्वोदयजुगपवरसूरिणो चरणसंजुए वंदे ।
चउरूत्तरदुसहस्सं दुप्पसहंते सुहम्माई ॥ १६
इय सुहमजंबू तब्भवसिद्धा एगावयारिणो सेसा ।
सट्ठिदुजोयणमज्झे जयंतु दुब्भिक्खडमरहरा ॥ १७ ॥ ...

एवं देविंदनयं सिरिविज्जाणं धम्मकित्तिपयं ।
वीरजिणपवयणट्ठियं दुसमसंघं नमह निच्चं ॥
इति दुःखमाकालश्रीश्रमणसंघस्तोत्रं ।

11. *From an "Ashtakavritti by Jineśvarasúri* [अष्टकवृत्तिः । जिनेश्वरसूरिः].

जिनेश्वरानुग्रहतोष्टकानां विविच्य गंभीरमपीदमर्थं ।
अवाप्य सम्यत्क्रमपेतरेकं सदैव लोकाश्वरणे यतध्वं ॥ १
सूरेः श्रीवर्द्धमानस्य निःसंबंधविहारिणः ।
हारिचारित्रपात्रस्य श्रीचंद्रकुलभूषिणः ॥ २
पादांभोजद्विरेफेण श्रीजिनेश्वरसूरिणा ।
अष्टकानां कृता वृत्तिः सत्त्वानुग्रहहेतवे ॥ ३
समानामधिकेशीत्या सहस्रे विक्रमाद्गते ।
श्रीजावालपुरे रम्ये वृत्तिरेषा समापिता ॥ ४

इति श्रीजिनेश्वरसूरिवराचार्यकृता श्रीमदभयदेवसूरिप्रतिसंस्कृताष्टकवृत्तिः समाप्ता ॥ ग्रंथमानं ३३७०

Folio 222:

श्रीमत्खरतरगच्छे विजयिनि मंदाकिनीजलस्वच्छे ।
श्रीजिनचंद्रविवस्वति युगप्रधानेतिपदवर्ये ॥ १
श्रीवामेयप्रमेयप्रमेयपारंगतं च पारगतं ।
कृत्वा चेतोविषयं विषयांतरविरतनिजमनसः ॥२
वागीसदयातिलकक्रमकमलरजोलवस्य परिचरणात् ।
समवसितसमयसारा बाल्येपि कृतश्रुताचाराः ॥ ३
श्रीचंद्रमंत्रिदेवाः सारणदासादिविबुधसामग्र्या ।
नानाग्रंथविचारव्याख्याकरणाच्च संयत्य ॥४

अणहिलपत्तनजेसलमेरुस्थितसमयकोशवीक्षायाः ।
समवसितगोप्यगंभीरभावश्रुतनिकरसंचाराः ॥ ५
खरतरसमाचारीविचारणप्रवणमानसैः सद्भिः ।
सूजामेघोदयकर्णडुंगराद्यैः परिश्रमिताः ॥ ६
हिंसारमहिमजेसलमेसलमेरुषु चर्चाश्रमेण विख्याताः ।
रेजुः श्रीगुरुकृपया लब्धजया जगति हरिवद्ये ॥ ७
श्रीमत्प्रमोदमाणिक्यगुरूणामनुशासनात् ।
साहाय्याच्च सतीर्थ्यश्री ५ दयारंगगणीशितुः ॥ ८
यथालब्धागमव्यूहाद्गृहीत्वा सारमादृताः ।
नानाप्रश्नपदश्रेणिप्रत्युत्तरपदात्मकं ॥ ९
परोपकारसंसिद्धचै स्वस्य च स्मृतिहेतवे ।
मृक्षणमिव तेयं श्रीजयसोमबुधा व्यधुः ॥१०
विक्रमतो मुनिशररसशशिमाने वत्सरे विजयमाने ।
गुणविनयस्तच्छिष्यः सेरूणानाम्नि वरनगरे ॥ ११
विशकलितपत्रराशिं दृष्ट्वा तस्य क्रमेण तं कृत्वा ।
ग्रंथं ब्राग्बोधार्थं लेखकतो लेखयांचक्रे ॥ १२ ग्रंथाग्रं१४,०००

विचाररत्नसंग्रहः समाप्तः ॥

Yamakastuti by DHARMAGHOSHASŪRI with the **Commentary** of SOMATILAKASŪRI [यमकस्तुतिः सटीका । मू० धर्मघोषसूरिः । टी० सोमतिलकसूरिः].

Folios 1 to 21 :

Commentary begins :

ॐ नमः सिद्धं ॥ अर्हं ॥

श्रीमत्तीर्थपतीन्सर्वाननर्वाचीनचिन्मयान् ।
अद्वैतसंविदे वंदे सानंदेन स्वचेतसा ॥ १

अधिकृत्य श्लेषमहं प्रकृतिप्रत्ययविभक्तिरचनाढ्यं ।
एकामपि हि चतुर्द्धा विवृणोमि स्तुतिमिमां सुकृतां[1] ॥ १

सा चेयं ।

श्रीतीर्थराजः पदपद्मसेवा-
हेवाकिदेवासुरकिंनरेशः ।
गंभीरगीस्तारतरो वरेण्य-
प्रभावदाता ददतां शिवं वः ॥ १

व्याख्या० श्रीतीर्थराजः ।...

Folio 3 :

Commentary ends :

प्रकाशितमिति चतुर्थः स्तुत्यर्थः ॥ ४

श्रीसोमतिलकसूरिः स्तुतिमेकामपि स्वयं रचितां ।
विवृणोति स्म चतुर्द्धा श्लेषवशात्स्वपरहितकृतये ॥ १

इत्येकरूपस्तुतिचतुष्टयवृत्तिः समर्थितेति भद्रं ।

Commentary begins:

॥ अर्हं ॥

श्रेयःश्रीवरदं जिनौघमनघं प्रणम्य विवृणोमि ।
यमकैरलंकृतयतीर्जिनस्तुतीः स्वपरहितकृतये ॥ १

तास्त्वष्टाविंशतिः स्वष्टा मालिनीछंदसाद्भुताः ।
अष्टाष्टयमकै रम्या वर्णयुग्मविनिर्मिताः ॥ २

तत्रादिदेवत्वादादौ श्रीवृषभजिनस्तुतिमाह ।

जय वृषभजिनाभिष्टूयसे निम्ननाभि-
र्जडिमरविसनाभिर्यः सुपर्वांगनाभिः ।

---

[1] स्वकृतां?

तम इह किल नाभिक्षोणिभृत्सूनुनाभि-
द्रुतभुवनमनाभिक्षांतिसंपत्कुनाभिः ॥ १

व्याख्या० जय रागादिरिपुवर्गजयनाज्जयवान् भव ।...

Commentary ends:

तथेति श्रुतदेवतास्तुत्यर्थः ३ ॥ २८ ॥

श्रीदेवेंद्रमुनींद्रपट्टमुकुटैः श्रीधर्मघोषाख्यया
ख्यातैः सूरिवरैर्विंशिष्टकविभिश्चारित्रिभिर्ज्ञानिभिः ।
संघाचार इति प्रसिद्धमहिमा सिद्धांततत्त्वाचित-
श्चक्रे ग्रंथवरः परोपकृतये यैः कृप्रयत्नैर्भृशं ॥ १

तस्यांतिर्यतिपर्यंतविन्यस्तयमका इमाः ।
व्यरच्यंत च यैरष्टाविंशतिः स्तुतयोनघाः ॥ २

तच्छिष्यशेखरश्रीसोमप्रभसूरिपादपद्मालिः ।
श्रीसोमतिलकसूरिस्तनुमतिरपि विवृतिमकृतेमां ॥ ३

एतस्यां शुचिसंप्रदायविगमात्तादृक्सुशास्त्रेक्षणा-
भावाद्ग्रंथगतार्थबोधविरहान्मांद्याच्च बुद्धेर्मया ।
दुष्टं क्लिष्टमशिष्टमिष्टसमयातीतं च यत्किंचन
प्रोचे शास्त्रविचारचारुहृदयैः क्षम्यं च शोध्यं च तत् ॥ ४

जयति जगतीह यावज्जिनमतममिकृप्रभावपात्रमिदं[1] ।
यमकस्तुतिवृत्तिरियं तावद्भव्योपकृतयेस्तु ॥ ५

इति यमकस्तुतिवृत्तिः समर्थितेयं ॥ भद्रमस्तु ॥ पंडितश्री०
मुनिचंद्रवाचनार्थं गणिदेवचंद्रेण लिखितं ॥ संवत् १६४८ वर्षे०

---

[1] अमितप्रभाव?

Yogaratnamala by NÂGÂRJUNÂCHÂRYA with the **Commentary** of GUṆÂKARA [योगरत्नमाला सटीका। मू० नागार्जुनाचार्यः। टी० गुणाकरसूरिः]·

Commentary begins:

गुरुचरणकमलममलं चरणे च नागार्जुनप्रणीतायाः ।
विवृतिं सुखावबुद्धयै वक्ष्येहं योगरत्नमालायाः ॥ १

Text begins:

विमलमतिकिरणनिकरप्रभिन्नसच्छिष्यकमलसंघावाः ।
सकलभुवनैकदीपा जयंति गुरुभास्करा भुवने ॥ १

